प्रथमोऽङ्कः—पुरा किल सोमकुलावतंसः पुरूरवा नाम राजा बभूव । तस्यो-पगङ्गायमुनासङ्गमं प्रतिष्ठानं नामर्द्धिमत्पुरं राजधान्यासीत् । स राजैकदा सूर्यो-पस्थानात्प्रतिनिवर्तमानः कमप्यार्तरवं श्रुत्वा तद्दिशि प्रहितेक्षणोऽप्सरसो ददर्श । ताभिश्च 'स्वर्गस्यालंकारभूता नः प्रियसख्युर्वशी समापत्तिदृष्टेन केशिना बन्दिग्राहं गृहीतेत्यसुरावलेपाद्वयं परित्रातव्याः' इति निवेदिताक्रन्दनकारणस्ता आश्वास्य प्रतिपालनस्थलसंकेतं विधाय तं मघोनोपकारिणमेव जवेनानुससार । ताश्च यावत्संकेतस्थानं हेमकूटशिखरं गच्छन्ति तावदुर्वशीं दैत्यहस्तान्मोचयित्वा राजा प्रत्याययौ । रथस्थोर्वशी चित्रलेखया प्रतिबोध्यमाना शनैः शनैः संज्ञां प्रतिपेदे । प्रकृतिस्थायास्तस्या अप्रतिमलावण्यं दृष्ट्वा राजा मोहितोऽभूत् । उर्वश्यपि राजानं दृष्ट्वात्मानं कृतार्थाममन्यत । अथ हेमकूटशिखरमवतरतोश्च-

क्रोद्घातेनांससंघट्टनं जातं । येनोभयोः कामो लब्धाङ्कुरो बभूव । अनन्तरमुर्वश्यात्मनः सखीजनं सस्वजे ताभिश्च परिष्वङ्गेनाभिननन्दे । अत्रान्तरे मघवतोर्वशीप्रत्यानयनार्थमादिष्टो गन्धर्वराजश्चित्ररथः पुरूरवसमेत्याह--'महत्खलु मघोनः प्रियमनुष्ठितं भवता । स भवानुर्वशीं पुरस्कृत्य सहास्माभिर्भगवन्तं द्रष्टुमर्हति' इति । ततो राजा 'सखे नायं ममावसरः शतक्रतुं द्रष्टुम्' इत्युक्त्वा न ययौ । पश्चात्स्वर्गं गच्छन्त्युर्वश्यपि सव्याजं विलम्ब्य राजानं सस्पृहं विलोकयन्ती सखीभिः सह प्रस्थिता । गतासु तासु राजापि मारमार्गणविद्धहृदयः स्वं नगरमियाय ।

द्वितीयोऽङ्कः—स्वपुरं निवृत्तो राजानङ्गपरवश उर्वशीमेवानुदिवसं ध्यायन्न कुत्रापि निर्वृतिं लेभे । एकदा मदनशरविधुरः स पर्युत्सुकत्वविनोदनार्थं प्रमदवनं गतः । किंतु वसन्ताभिनवावतारसूचकं प्रमदवनस्याभिरामत्वं पश्यतस्तस्य कामस्य संधुक्षणमेव जातम् । ततोऽभिमुक्तलतामण्डप आसीनो राजा 'वयस्य उपायश्चिन्त्यतां येन सफलप्रार्थनो भवेयम्' इति माणवकमादिदेश । उपायचिन्तापरे माणवके निमित्तं सूचयित्वा स्वयं जाताशो बभूव । अत्रान्तरे मदनेन तरलतां नीतोर्वशी चित्रलेखाद्वितीया तिरस्करिणीप्रतिच्छन्ना भूत्वा राजानमभिसरन्ती तदेवोद्यानं प्रविवेश । प्रविश्य च तिरस्करिणीप्रतिच्छन्नैव पार्श्ववर्तिना वयस्येन सह राज्ञो विश्रम्भामन्त्रितानि श्रोतुकामा पार्श्वगतास्य भूत्वा स्थिता । तत आत्मनो मदनकृतां दुरवस्थां निवेदयतो राज्ञो मुखात् 'वयस्य सा [उर्वशी] मम मानसीं नितान्तकीठनां रुजं न वद प्रभावविदितानुरागमपि मामवमन्यते वा । अतो मम मनोरथानलब्धफलनीरसान्विधाय पञ्चबाणः सुखं भवतु' इति निर्वेदाक्षराणि श्रुत्वा प्रभावनिर्मितं भूर्जपत्रमादाय तुल्यानुरागपिशुनेनोदाहरणेन संपादितोत्तराभवत् । तेनाश्वासितो राजा 'धार्यतामयं प्रियायाः स्वहस्तः' इति तद्विदूषकस्य हस्ते ददौ । अतन्तरं तिरस्करिण्यपनयनेन राज्ञः पुरत आविर्भूय तं जयशब्दोच्चारणेन वर्धयन्तीमुर्वशीं यावद्राजा हस्ते गृहीत्वा स्वासन उपवेशयति तावदाकाशे कस्यचिद्देवदूतस्य वचनमश्रावि--चित्रलेखे भरतेन भवतीषु नियुक्तं प्रयोगमद्य मरुतां भर्ता द्रष्टुमना वर्ततेऽतो त्वरयोर्वशीमिति । तद्देवदूतवचनमाकर्ण्य राजानं सखीमुखेनामन्त्र्योर्वशी वियोगदुःखं वहन्ती दिवं प्रस्थिता । गतायां तस्यां पर्युत्सुको राजा भूर्जपत्रेण दृष्टिविलोभनं कर्तुमिच्छन्विदूषकप्रमादात्प्रभ्रष्टस्य तस्यान्वेषणव्यग्रोऽबभूव । अत्रान्तरे राजानं विचिन्वती देव्यांशीनरी मारुतेन नीयमानं तद्भूर्जपत्रमासाद्य तदेवोपायनं कृत्वा राजानमुपेत्य 'आर्यपुत्र अलमावेगेनेदं तद्भूर्जपत्रम्' इत्यभिदधाना तत्तस्मायर्पयत् । ततोऽनयोर्वशीव्यतिकरो ज्ञातः स्यादिति मन्यमानो राजा तस्याः पादयोः पपात । तथा पादपतितमपि तं विधूय कुपिता राज्ञी सपरिवारा

निश्चक्राम । ततः खिन्नो राजापि दिवसार्धं गतमवलोक्य स्नानभोजनं सेवितुं गृहाभ्यन्तरं प्रविवेश ।

तृतीयोऽङ्कः—भर्तुः प्रणिपातलंघनाज्जातपश्चात्तापा राज्ञी चन्द्रसाक्षिकं प्रियानुप्रसादनं नाम व्रतं चचार । प्रतिजज्ञे च 'अद्यप्रभृति यां स्त्रियमार्यपुत्रः कामयते आर्यपुत्रसमागमप्रणयिनी तया मया प्रीतिबन्धेन वर्तितव्यम्' इति । एवं च भर्तारं प्रसाद्य मा मेति वदत्येव तस्मिन्सपरिजना निरगात् । अत्रान्तरे कृताभिसारिकावेषोर्वशी चित्रलेखा च राज्ञ्यागमनात्प्रागेव तत्रोपस्थिते तद्राज्ञीवचनं श्रुत्वा मुमुदाते । यातायां राज्ञ्यामुर्वश्यात्मनः समागमायोत्कण्ठमानस्य राज्ञो नयने उपगम्य हस्ताभ्यां पिहितवती । समनन्तरं च हस्तावपनीय पुरो भूत्वा जयशब्दमुदीरयामास । ततश्चित्रलेखा राजानमामन्त्र्य स्वर्गलोकं प्रतस्थे । राजापि लब्धनिष्प्रत्यूहप्रियासमागमो मुहूर्तं प्रदोषरमणीयांश्चन्द्रपादान्सेवित्वा प्रियया सहान्तःपुरं विवेश । ततः परं तावभिमतान्योन्यसमागमोपाहितसुखावानन्देन कालं नयतः स्म ।

चतुर्थोऽङ्कः—एकदोर्वशी रतिसहायं राजार्षिं गृहीत्वा गन्धमादनवनं विहर्तुं गता । तत्र मन्दाकिन्यास्तीरे क्रीडन्ती काचिद्विद्याधरदारिका तेन राजर्षिणा निध्यातेति कुपिता सती भर्तुः प्रणयमप्रतिपद्यमाना स्त्रीजनपरिहरणीयं कुमारवनं प्रविश्य । समनन्तरं च वासन्ती लता संवृत्ता । प्रियाया अतर्कितोपनतविनाशाद्विस्मितो निर्व्रतानामप्युत्कण्ठाकारिणा मेघोदयेनोन्मादितः पुरूरवा अपि तस्मिन्नेव कानने प्रियतमां विचिन्वन्वनं प्रियोदन्तं याचमानोहोरात्रानत्यवाहयत् । एकदा मुनिप्रसादलब्धसंगमनीयमणिः प्रियानुकारिण्याः कस्याश्चिल्लतायाः परिष्वङ्गःप्रणयी भूत्वा यावत्तामालिङ्गति तावत्तत्स्थान एवोर्वशी प्रादुर्बभूव । अनन्तरं परं मुदितस्तया सह प्रतिष्ठानं प्रति निवर्तते ।

पञ्चमोऽङ्कः—नगरं प्रति निवृत्तो राजा प्रकृतिभिरनुरज्यमानो राज्यमकरोत् । एवं वहति काले कदाचित्तिथिविशेषे गंगायमुनयोः संगमं स्नानार्थं गतस्य सदारस्य राज्ञः केनापि परिजनेन तालवृन्ताधारे निक्षिप्य नीयमान उर्वशीलाभाद्राज्ञो बहुसंमतः स संगमनीयमणिरामिषशङ्किना गृध्रेणाक्षिप्यानायि । परिगतार्थो राजा यावच्छरासनं गृहीत्वा तं हन्तुं गृहाद्बहिर्याति तावत्स विहगदस्युर्दृष्टिपथमतीत्य गतः । पश्चात्कञ्चुकिनागत्य 'देव कस्यापि नामाङ्कितेन बाणेन विद्धः स विहगतस्करः समौलिरत्नो लब्धः' इत्यावेदिते नामाक्षराण्यनुवाच्यात्मन एव पुत्रस्योर्वशीसंभवस्य स बाण इति ज्ञात्वा विस्मयमाप । अत्रान्तरे च्यवनाश्रमात्कुमारं गृहीत्वा तापसी राजानमुपस्थिता । तदोर्वश्यपि तत्रागत्य महाराजवियोगपरिजिहीर्षैव मम पुत्रसंवरणे कारणमेतदवधिश्चावयोः समागम इति राज्ञेनिवेदयामास । तत उर्वशीविरहं सोढुमसमर्थः पुरूरवा वनगमनाय मतिं

व्यधत्त । इत्थं गतेऽकस्माद्भगवान्नारदस्तत्रागत्य ' न त्वया शस्त्रं संन्यस्तव्यम् । इयं चोर्वशी यावदायुस्ते धर्मचारिणी भवतु ' इति महेन्द्रसन्देशं राजानं श्रावितवान् । स्वयं च कुमारमायुषं यौवराज्येऽभिषिषेच । एवं यावदायुरुर्वशीलाभेन सम्पन्नमनोरथः पुरूरवा अभिमतभर्तृलाभेनोर्वशी पुत्रस्य यौवराज्यलाभेन तावुभौ मातापितृप्राप्त्या राज्यलाभेन चायुः इति सर्वेपि ते आनन्दस्य परां कोटिमध्यगच्छन् ।

अस्य नाटकस्याधारभूताः कथाः ।

ऋग्वेद मं. १०, सू. ९५.

अत्र सायनाचार्यः ।

ऐलोर्वशीतिहासोत्र वैशद्यार्थं प्रवर्ण्यते । मित्रश्च वरुणश्चोभौ दीक्षितौ प्रेक्ष्य चोर्वशीम् ॥ रेतः सिषिचतुः सद्यस्तत्कुंभे न्यदधुस्तदा । तां शप्तवन्तौ मनुजभोग्या भूमौ भवेति तौ । अत्रान्तर इलो राजा मनोः पुत्रैश्च संयुतः । मृगयां संचरन् साश्वो देवीक्रीडं विवेश ह ॥ यत्र देवं गिरिसुता सर्वैर्भावैरतोषयत् । अत्राविशन्पुमान् स्त्री स्यादित्युक्त्वा तत्र चाविशत् ॥ स्त्री भूत्वा व्रीडितः सोगाच्छरणं शिवमञ्जसा । इयं प्रसाद्यतां राजन्नित्युक्तः शंभुना नृपः ॥ जगाम शरणो देवीमात्मनः पुंस्त्वसिद्धये । अकरोत्सा नृपं देवी षण्मासात्प्राप्तपुंस्त्वकं ॥ ततः कदाचित्स्त्रीकाले बुधः सौन्दर्यमोहितः । अप्सरोभ्यो विशिष्टां तामिलां संगतवान्मुदा ॥ तदेलायां सोमपुत्राज्जातो राजा पुरूरवाः । तमुर्वशी तु चकमे प्रतिष्ठानपुरे स्थितं ॥ तत्पादन्यत्र नग्नं त्वां दृष्ट्वा यामि यथागतं । सुतावुरणकौ त्वं च समीपे कुरु मे द्रुतं ॥ इति सा समयं कृत्वा रमयामास तं नृपं । चतुरब्दे गते रात्रौ देवैरुरणकद्वयं ॥ हृतं तस्य ध्वनिं श्रुत्वा नग्न एव स भूपतिः । उत्थाय जित्वा तावागच्छेत्येवं जल्पको नृपः ॥ विद्युता दर्शितोऽस्यै स नग्न एव पुरूरवाः । अथ सादृष्टसमया ह्युर्वशी तु दिवं ययौ ॥ तत उन्मत्तवद्राजा दिदृक्षुस्तामितस्ततः । कुर्वन्नन्वेषणं तीरे सरसो मानसस्य तां । विहरन्तीमप्सरोभिः सहापश्यत्पुरूरवाः । पुनः स चकमे भोक्तुमुर्वशीं च पुरूरवाः । साश्रुं सापश्यदुक्त्वा च प्रत्याचष्ट व्रजेति तं ॥ इत्युर्वश्यैलसंवादमिममेषोप्यसूचयत् ॥ इति । अत्र वाजसनेयकं—उर्वशी हाप्सराः पुरूरवसमैलं चकमे तꣳ हाविन्दमानोवाच त्रिः स्म माहो वेतसेन दण्डेन हतादकामास्म मा निपद्यासै मा स्म त्वा नग्नं दर्शमेष वै नः स्त्रीणामुपचार इति । साहास्मिन् ज्योगुवासापि हस्माद्बिभ्यास तावज्ज्योग्घास्मिन्नुवास । ततो ह

गंधर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरा-गच्छेदिति । तस्यै ह्याविद्धुरणा शयने उपबद्धास । ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः । सा होवाचावीर इव बत मे जन इव पुत्रं हरन्तीति । द्वितीयं प्रमेथुः । साह तथैवोवाचाथहायमीक्षांचक्रे कथं नु तदवीरं कथमजनꣳ स्याद्यत्राहꣳ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने यद्वासः पर्यधास्यत । ततो ह गन्धर्वा विद्युतं जनयांचक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव । पुनरैनमीत्येत्तिरो-भूताꣳ स आध्याजल्पन्कुरुक्षेत्रꣳ समया चचारान्यतः प्लक्षेति बिसवती तस्यैहाध्य-न्तेन वव्राज तद्वता अप्सरस आतयो भूत्वा परिप्लुविरे । तꣳ हेयं ज्ञात्वोवाचायं वै स मनुष्यो यस्मिन्नहमवात्समिति । ता होचुस्तस्मै वा आविरसामेति । तथेति तस्मै हाविरासुस्तागꣳ हार्यं ज्ञात्वाभिपरोवाद——हये जाये मनसा इति ।

पुरू०—' हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु । न न मंत्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥ ' **उर्व०**—किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव । पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥ **पुरू०**—इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयंत धुनयः ॥ **उर्व०**—सा वसु दधती श्वशुराय वय उषो यदि वष्टयंतिगृहात् । अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्रथिता वैतसेन ॥ त्रिः स्म माह्नः श्रथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि । पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥ **पुरू०**—या सुजूर्णिः श्रेणिः सुम्नआपिर्हदेचक्षुर्न ग्रंथिनी चरण्युः । ता अंजयोऽ-रुणयो न सस्रुः श्रिये गावो न धेनवोऽनवंत ॥ **उर्व०**—समस्मिञ्जायमान आसत मा उतेमवर्धन्नद्यः स्वगूर्ताः । महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥ **पुरू०**—सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे । अपस्म मत्तरसंती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः ॥ **पुरू०**—यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृंक्ते । ता आतयो न तन्वः शुंभत स्वा अश्वासो न क्रीळयो दंदशानाः ॥ **पुरू०**—वियुन्न या पतंती दविद्योद्धरंती मे अप्या काम्यानि । जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥ **उर्व०**—जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः । अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि ॥ **पुरू०**—कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन् । को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥ **उर्व०**—प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंद-दाध्ये शिवायै । प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥ **पुरू०**—सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गंतवा उ । अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥ **उर्व०**—पुरूरवो मा मृथा मा

प्र पत्नो मा त्वा वृकासो अशिवास उ क्षन् । वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता ॥ **उर्व०**—यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः । घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥ **पुरू०**—अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वासिष्ठः । उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥ **उर्व०**—इति त्वा देवा इम आहुरैळ **यथैमेतद्भवसि मृत्युबंधुः** । प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि **मादयासे** ॥"

मत्स्यपुराणं, अ० २४.

इलोदरं च धर्मिष्ठं बुधः पुत्रमजीजनत् । अश्वमेधशतं साग्रमकरोद्यः स्वतेजसा । पुरूरवा इति ख्यातः सर्वलोकनमस्कृतः ॥ अहन्यहनि देवेन्द्रं द्रष्टुं याति स राजराट् । कदाचिदारुह्य रथं दक्षिणाम्बरचारिणम् ॥ सार्धमर्केण सोपश्यन्नीयमानामथाम्बरे । **केशिना** दानवेन्द्रेण **चित्रलेखामथोर्वशीम्** ॥ तं विनिर्जित्य समरे विविधायुधपाणिना । बुधपुत्रेण **वायव्य**मस्त्रं मुक्त्वा यशोर्थिना ॥ तथा शक्रोपि समरे येन चैव विनिर्जितः । मित्रत्वमगमद्देवैर्ददाविन्द्राय चोर्वशीम् ॥ ततः प्रभृति मित्रत्वमगमत्पाकशासनः । **लक्ष्मीस्वयंवरं** नाम **भरतेन** प्रवर्तितम् । मेनकामुर्वशीं रम्भां नृत्यतेति तदादिशत् ॥ ननर्त सलयं तत्र **लक्ष्मारूपेण चार्वशी** । सा पुरूरवसं दृष्ट्वा नृत्यन्ती कामपीडिता ॥ विस्मृताभिनयं सर्वं यत्पुरा भरतोदितम् । **शशाप भरतः क्रोधाद्वियोगादस्य भूतले** ॥ पञ्चपञ्चाशदब्दानि **लता** सूक्ष्मा भविष्यसि । पुरूरवाः पिशाचत्वं तत्रैवानुभविष्यति ॥ ततस्तमुर्वशी गत्वा भर्तारमकरोच्चिरम् । शापान्ते भरतस्याथ उर्वशी बुधसूनुतः ॥ अजीजनत्सुतानष्टौ नामतस्तान्निबोधत । आयुर्दृढायुरश्वायुर्धनायुर्धृतिमान्वसुः । शुचिविद्यः शतायुश्च सर्वे दिव्यबलौजसः ॥

भागवते, स्कं. ९ अ. १.४

अथातः श्रूयतां राजन् वंशः सोमस्य पावनः । यस्मिन्नैलादयो भूपाः कीर्त्यन्ते, पुण्यकीर्तयः ॥ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् । जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥ तस्य दृग्भ्योभवत्पुत्रः सोमोमृतमयः किल । तस्या (बुधपुत्रस्य) त्मयोनिरकृत बुध इत्यभिधां नृप । ततः पुरूरवा जज्ञे इलायां य उदाहृतः । तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥ श्रुत्वोर्वशीन्द्रभवने गीयमानान्सुरर्षिणा । तदान्तिकमुपेयाय देवी स्मरशरार्दिता ॥ मित्रावरुणयोः शापादापन्ना नरलोकताम् । निशम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ॥ धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः । उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ स्वागतं ते

वरारोहे आस्यतां करवाम किम् । संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ उर्वश्युवाच । कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर । यद्-ङ्गान्तरमासाद्य च्यवते हि रिरंसया ॥ एतावुरणकौ राजन्न्यासौ रक्षस्व मानद । संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वा.....। विवाससं तत्तथेति प्रतिपेदे महामनाः ॥ अहो रूपमहो भावो नरलोकविमोहनम् । को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥ तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः । रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥ रममाण-स्तया देव्या पद्मकिञ्जल्कगन्धया । तन्मुखामोदमुषितो मुमुदेऽहर्गणान् बहून् ॥ अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समनोदयत् । उर्वशीरहितं मह्यमास्थानं नातिशो-भते ॥ त उपेत्य महारात्रे तमसि प्रत्युपस्थिते । उर्वश्या उरणौ जह्रुर्न्यस्तौ रा-जनि जायया । निशम्याक्रन्दितं देवी पुत्रयोर्नीयमानयोः । हृतास्म्यहं कुनाथेन नपुंसा वीरमातिना ॥ यद्विश्रम्भादहं नष्टा हृतापत्या च दस्युभिः । यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥ इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुञ्जरः । निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः । आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥ ऐलोपि शयने जायामप-श्यन्विमना इव । तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीम् ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः । पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि । मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया । खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य ना-स्पदम् ॥ मा मृथाः पुरुषोसि त्वं मा स्म त्वायुर्वृका इमे । क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः । घ्नन्त्यल्पार्थेपि विश्रब्धं पतिं भ्रातरमप्युत ॥ विधायालीकविश्रम्भमज्ञेषु त्यक्त-सौहृदाः । नवं नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥ संवत्सरान्ते हि भवाने-करात्रं मयेश्वर । वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥ अन्तर्वत्नीमुपा-लक्ष्य देवीं स प्रययौ पुरम् । पुनस्तत्र गतोऽब्दान्त उर्वशीं वीरमातरम् ॥ उप-लभ्य मुदा युक्तः समुवास तया निशाम् । अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥ गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति । तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप । उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ॥ स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि । त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥ स्थालीस्थानं गतोश्वत्थं शमीगर्भं विलक्ष्य सः । तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तराम् । आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ॥ तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः । त्रय्या स विद्यया राज्ञा पुत्रत्वे क-ल्पितस्त्रिवृत् ॥ तेनायजत यज्ञेशं भगवन्तमधोक्षजम् । उर्वशीलोकमन्विच्छन्स-र्वदेवमयं हरिम् ॥ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः । देवो नारायणो

नान्य एकोऽग्निर्वेणे एव च ॥ पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप। अग्निना प्रजया राजा लोकं गन्धर्वमेयिवान् ॥

विष्णुपुराणे अं. ४. अ. ६.

ततः स्फुरदुच्छ्वसितामलकपोलकान्तिर्भगवानुडुपतिस्तमालिङ्ग्य कुमारं साधु साधु वत्स प्राज्ञोसीति बुध इति नाम चक्रे। स चाख्यातमेवैतद्यथेलायां पुरूरवसमुत्पादयामास। पुरूरवास्त्वतिदानशीलोऽतितेजस्वी यं सत्यवादिनमतिरूपस्विनं मित्रावरुणशापान्मानुषे लोके मया वस्तव्यमिति कृतमतिरुर्वशी ददर्श । दृष्टमात्रे च यस्मिन्नपहाय मानमशेषस्वर्गसुखाभिलाषमपास्य तन्मना भूत्वा तमेव चोपतस्थे । सोऽपि च तामतिशयितसकललोकस्त्रीकांतिसौकुमार्यलावण्यातिविलासहासादिगुणामवलोक्य तदायत्तचित्तवृत्तिर्बभूव । उभयमपि तन्मनस्कमनन्यदृष्टि परित्यक्तसमस्तान्यप्रयोजनमासीत् । राजा तु प्रागल्भ्यात्तामाह । मुभ्रु त्वामहमतिकामोऽस्मि प्रसीदानुरागमुद्वह । इत्युक्ता लज्जावखण्डितमुखमुर्वशी प्राह । भवत्वेवं यदि मे समयपरिपालनं भवान्करोति । आख्याहि मे समयमित्यथ पृष्टा पुनरब्रवीत । शयनसमीपे ममोरणकद्वयं पुत्रभूतं नापनेयम् । भवांश्च मया नग्नो न द्रष्टव्यः । घृतमात्रं च ममाहार इति । एवमेवेति भूपतिराह । तया च सहावनीपतिरलकायां चैत्ररथादिवनेष्वमलपद्मखण्डेषु सरःस्वभिरममाण एकषष्टिं वर्षसहस्राण्यनुदिनप्रवर्धमानप्रमोदोऽनयत् । उर्वशी च तदुपभोगादनुदिनप्रवर्धमानानुरागामरलोकवासेऽपि न स्पृहां चकार । विना चोर्वश्या सुरलोकोऽप्सरसां सिद्धगन्धर्वाणां च नातिरमणीयोऽभूत् । ततश्चोर्वशीपुरूरवसोः समयविद्विश्वावसुर्गन्धर्वसमवेतो निशि नयनाभ्यासादेकमुरणकं जहार । तस्य चाकाशे नीयमानस्योर्वशी शब्दमशृणोत् । आह च । ममानाथायाः पुत्रः केनाप्यपहियते । कं शरणमुपयामि । इत्याकर्ण्य राजा नग्नं मां देवी द्रक्ष्यतीति न ययौ । अथान्यमप्युरणकमादाय गन्धर्वा ययुः । तस्याप्यपहियमाणस्य शब्दमाकर्ण्याकाशे पुनरप्यनाथास्म्यहमभर्तृका कुपुरुषाश्रयेत्यार्तवाणी बभूव । राजाप्यमर्षवशादंधकारमेतदिति खड्गमादाय दुष्ट हतोसीति व्याहरन्नभ्यधावत् । तावच्च गन्धर्वैरतीवोज्वला विद्युज्जनिता । तत्प्रभया चोर्वशी राजानमपगताम्बरं दृष्ट्वापवृत्तसमया तत्क्षणादेवापक्रान्ता । परित्यज्य तावुरणकौ गन्धर्वाः सुरलोकमुपगताः । राजापि च तौ मेषावादाय हृष्टमनाः स्वशयनमायातो नोर्वशीं ददर्श । तां चापश्यन्नपगताम्बर एवोन्मत्तरूपो बभ्राम । कुरुक्षेत्रे चाम्भोजसरस्यन्याभिश्चतुर्भिरप्सरोभिः समवेतामुर्वशीं ददर्श । ततश्चोन्मत्तरूपो " जाये ह तिष्ठ मनसि घोरे तिष्ठ वचसि " इत्यनेकप्रकारं सूक्तं (ऋग्वेद १०—९५) अवोचत् । आह चोर्वशी । महाराज अलमनेनाविवेकचेष्टितेन । अंतर्वन्त्यहम् । अब्दान्ते भवतात्रागन्तव्यम् । कुमारस्ते भविष्यति । एकां च निशामहं त्वया सह वत्स्यामि । इत्युक्तः प्रहृष्टः स्वपुरमाजगाम । तासां चा-

प्सरसामुर्वशी कथयामास । अयं पुरुषोत्कर्षो येनाहमेतावन्तं कालमनुरागाकृष्टमनसा सहोषिता । इत्येवमुक्तास्तामप्सरस ऊचुः । साधु साध्वस्य रूपम् । अनेन सहास्माकमपि सर्वकालमभिरन्तुं स्पृहा भवेत् । इत्यब्दे च पूर्णे स राजा तत्राजगाम । कुमारं चायुषमसौ तदोर्वशी ददौ । एकां च निशां तेन राज्ञा सहोषित्वा पञ्चपुत्रोत्पत्तये गर्भमवाप । उवाचैनं राजानम् । अस्मत्प्रीत्या महाराजाय सर्व एव गन्धर्वा वरदाः सन्तुष्टाः । तस्माद् व्रियतां वर इति । आह राजा च विजितसकलारातिरविहतेन्द्रियसामर्थ्यो बंधुमानमितबलकोशः । नान्यदस्माकमुर्वशीसालोक्यादप्राप्यमस्ति । तदहमनया सहोर्वश्या कालं नेतुमभिलषामि । इत्युक्ते गन्धर्वा राज्ञेऽग्निस्थाली ददुः । ऊचुश्चैनम् । अग्निमाम्नायानुसारीभूत्वा त्रिधा कृत्वोर्वशीसलोकतामनोरथमुद्दिश्य सम्यग्यजेथाः । ततोवश्यमभिलषितमवाप्स्यसि । इत्युक्तस्तामग्निस्थालीमादायाजगाम । अंतरटव्यामचिन्तयत् । अहो मेतिमूढता यदग्निस्थाली मयानीता नोर्वशीति । अथैनामटव्यामेवाग्निस्थालीं तत्याज । स्वपुरं चाजगाम । व्यतीतार्धरात्रौ विनिद्रश्चिंतयत् । ममोर्वशीसालोक्यप्राप्त्यर्थमग्निस्थाली गन्धर्वैर्दत्ता । सा च मयाटव्यां परित्यक्ता । तदहं तत्र तदाहरणाय यास्यामि । इत्युत्थाय तत्राप्युपगतो नाग्निस्थालीमपश्यत् । शमीगर्भं चाश्वत्थमग्निस्थालीस्थाने दृष्ट्वाचिन्तयत् । मयात्र स्थाली निक्षिप्ता स चाश्वत्थः शमीगर्भोऽभूत् । तदेतदेवाहमग्निरूपमादाय स्वपुरमभिगम्यारणिं कृत्वा तदुत्पन्नाग्नेरुपास्तिं करिष्यामीति । एवमेव स्वपुरमुपगतोऽरणिं चकार । तत्प्रमाणं चाङ्गुलैः कुर्वन् गायत्रीमपठत् । पठतश्चाक्षरसंख्यान्येवाङ्गुला [न्य] रण्यभवत् । तत्राग्निं निर्मथ्याग्नित्रयमाम्नायानुसारी भूत्वा जुहाव । उर्वशीसालोक्यं चेहफलमभिसंहितवान् । तेनैवाग्निविधिना बहुविधान् यज्ञानिष्ट्वा गन्धर्वलोकान्प्राप्योर्वश्या सह वियोगं नाप । एकोग्निरादावभवदैलेन त्वत्र मन्वन्तरे त्रेता प्रवर्तिता ॥ १७–४६ ॥

कथासरित्सागरे लं. ३ त० ३.

आसीत्पुरूरवा नाम राजा परमवैष्णवः । अभूद्ध्रुवीव नाकेऽपि यस्याप्रतिहता गतिः ॥ भ्रमन्तं नन्दने जातु तं ददर्श किलाप्सराः । उर्वशी नाम कामस्य मोहनास्त्रमिवापरम् ॥ दृष्टमात्रेण तेनाभूत्सा तथा हृतचेतना । यथा सभयरम्भादिसखीचेतांस्यकम्पयत् ॥ सोऽपि तां वीक्ष्य लावण्यरसनिर्झरिणीं नृपः । यत्न प्राप परिष्वङ्गं तृषाक्रान्तो मुमूर्च्छ तत् ॥ अथादिदेश सर्वज्ञो हरिः क्षीराम्बुधिस्थितः । नारदाख्यं मुनिवरं दर्शनार्थमुपागतम् । देवर्षे नन्दनोद्यानवर्ती राजा पुरूरवाः । उर्वशीहृतचित्तः सन्स्थितो विरहनिःसहः ॥ तद्गत्वा मम वाक्येन बोधयित्वा शतक्रतुम् । दापय त्वरितं तस्मै राज्ञे तामुर्वशीं मुने । इत्यादिष्टः स हरिणा तथेत्यागत्य नारदः । प्रबोध्य तं तथाभूतं पुरूरवसमब्रवीत् ॥ उत्तिष्ठ त्वत्कृते राजन्प्रहितोऽस्मीह विष्णुना । स हि निर्व्याजभक्तानां नैवापदमुपेक्षते । इत्युक्त्वाश्वासिते-

नाथ स पुरूरवसा सह । जगाम देवराजस्य निकटं नारदो मुनिः ॥ हरेर्निदेश-मिन्द्राय निवेद्य प्रणतात्मने । उर्वशीं दापयामास स पुरूरवसे ततः ॥ तदभूदुर्व-शीदानं निर्जीवकरणं दिवः । उर्वश्यास्तु तदेवासीन्मृतसंजीवनौषधम् ॥ अथाज-गाम भूलोकं तामादाय पुरूरवाः । स्वर्वधूदर्शनाश्चर्यमपर्यन्मर्त्यचक्षुषाम् ॥ ततो-नपायिनौ तौ द्वावुर्वशी च नृपश्च सः । अन्योन्यदृष्टिपातेन निबद्धाविव तस्थतुः ॥ एकदा दानवैः सार्कं प्राप्तयुद्धेन वज्रिणा । साहाय्यकार्यमाहूतो ययौ नाकं पुरूरवाः ॥ तत्र तस्मिन्हृते मायाधरनाम्न्यसुराधिपे । प्रवृत्तस्त्रवधूसार्थः शक्रस्याभवदुत्सवः ॥ ततश्च रम्भां नृत्यन्तीमाचार्ये तुम्बुरौ स्थिते । चलिताभिनयां दृष्ट्वा जहास स पुरूरवाः ॥ जाने दिव्यमिदं नृत्तं किं त्वं जानासि मानुष । इति रम्भापि तत्कालं सासूयं तमभाषत ॥ जानेऽहमुर्वशीसङ्गात्तद्वृत्तिं न तुम्बुरुः । युष्मद्गुरुरपीत्ये-नामुवाचाथ पुरूरवाः ॥ तच्छ्रुत्वा तुम्बरुः कोपात्तस्मै शापमथादिशत् । उर्वश्या ते वियोगः स्यादा कृष्णाराधनादिति ॥ श्रुतशापश्च गत्वैव तमुर्वश्यै पुरूरवाः । अकालाशनिपातोग्रं स्ववृत्तान्तं न्यवेदयत् । ततोऽकस्मान्निपत्यैव निन्ये क्वाप्य-पहृत्य सा । अदृष्टैस्तेन भूपेन गन्धर्वैरुर्वशी किल ॥ अवेत्य शापदोषं तं सोऽथ गत्वा पुरूरवाः । हरेराराधनं चक्रे ततो बदरिकाश्रमे ॥ उर्वशी तु वियोगार्ता ग-न्धर्वविषयस्थिता ॥ आसीद मृतेव मुग्नेव लिखितेव विचेतना ॥ आश्चर्यं यन्न सा प्राणैः शापान्ताशावलम्बिनी । मुक्ता विरहदीर्घासु चक्रवाकीव रात्रिषु ॥ पुरूर-वाश्च तपसा तेनाच्युतमतोषयत् । तत्प्रसादेन गन्धर्वा मुमुचुस्तस्य चोर्वशीम् ॥ शापान्तलब्धया युक्तः पुनरप्सरसा तया । दिव्यान्स राजा बुभुजे भोगान्भूतल-वर्त्यपि ॥ ४—३०.

अथ

विक्रमोर्वशीयम् ।



वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥१॥

निर्माणं जगतां करोति रजसा हीनं यदानन्दकं
सत्त्वेनापि न लिप्यते तदपि यद्रक्षासुदक्षं सदा ।
अस्पृष्टं तमसापि नाशयति यत्सर्वं च सार्वत्रिकम्
कस्मिंश्चिन्महसि स्ववासमधुना धेत्तां मदीयं मनः ॥ १ ॥

कृपासान्द्रं चक्षुर्भगवति पतेच्चेत्तव जडे
सकृत्प्रज्ञोन्मेषात्स भवति कवीनां कुलगुरुः ।
प्रबध्नन्काव्यार्थं सरसरुचिरालंकृतिजुषं
न कस्तद्वाणि त्वां स्तुतिभिरुपतिष्ठेत जडधीः ॥ २ ॥

अथ सकलकविकुलगुरुः सरस्वत्या देव्या विलास इव तत्रभवान् कालिदासः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि । काव्यादेव यतः" इत्याद्यर्थकालंकारिकवचनप्रामाण्यात्काव्यस्य प्रचुरश्रेयोहेतुकत्वमवधार्य तात्पर्यतो धर्मार्थादिपुमर्थचतुष्टयसाधनान्युपदिदिक्षुः श्राव्यप्रबन्धेभ्यो दृश्यप्रबन्धानां प्रकर्षं विभाव्य तत्राभ्यर्हितत्वान्नाटकं रिरचयिषुः **विक्रमोर्वशीयं** नाम त्रोटकमातेने । तत्र त्रोटकादीनां नाटकान्तःपातित्वादादौ नाटकलक्षणं साहित्यदर्पणोक्तं दृश्यकाव्यप्रस्तावपूर्वकं—"दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ।" तस्य भेदाः—"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश" ॥ किंच "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्" । इत्यादि । तत्र नाटकलक्षणं यथा—नाटकं ख्यातवृत्तं स्यात्पञ्चसंधिसमन्वितम् । विलासद्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥ सुखदुःखसमुद्भूतिनानारसनिरन्तरम् । पञ्चाधिका दशपरास्तत्राङ्काः परिकीर्तिताः । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥ एक एव भवेदङ्गी शृंगारो वीर एव वा । अङ्गमन्ये रसाः सर्वे कार्यं निर्वहणेद्भुतम् ॥ चत्वारः पञ्च वा

मुख्याः कार्यव्यापृतपूरुषाः । गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम् ॥ त्रोटक-लक्षणं–'सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् । त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ' ॥ इति । प्रत्यङ्कं सविदूषकत्वाच्छृङ्गारोत्राङ्की । ' प्रत्यङ्कं सविदूषकम् ' इति प्रायोवादं द्रष्टव्यम् । तेनात्र प्रथमाङ्के विदूषकाभावेऽपि न लक्षणहानिः ।

तत्र प्रारिप्सितग्रन्थस्य निष्प्रत्यूहसमाप्तिकामनया शिष्टाचारपरिप्राप्तं मङ्गलं विदधन्नाटकादौ पूर्वङ्गाङ्गभूतामाशीरूपां चतुष्पदां नान्दीमवतारयति सूत्रधारमुखेन । **वेदान्तेष्विति**—स स्थाणुः शिवः । स्थाणुपदस्य शिवाभिधेयत्वं सुप्रसिद्धमेव । वः युष्माकं सामाजिकानामित्यर्थः । निश्रेयसाय मोक्षाय कल्याणाय वा अस्तु । मोक्षं वितरतु इति यावत् । 'स्थाणू रुद्र उमापतिः ', इत्यमरः । नित्यमव्यय एव तिष्ठतीति स्थाणुः । स्थाणुवन्निश्चलावस्थानात्स्थाणुरिति वा । तथा च श्वेताश्वतरे 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इति । पुराणेषु च 'ततः प्रभृति विश्वात्मा न प्रसूते शुभाः प्रजाः । स्थाणुवन्निश्चलो यस्मात्तस्मात्स्थाणुरिति स्मृतः ' ॥ इति । शिवस्य मोक्षहेतुत्वं च सुप्रतीतमेव । तथा च "तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति" । 'य एनमेवं विदुरमृतास्ते भवन्ति ' इति च श्वेताश्वतरे । 'नमो भवस्य हेत्यै जगतां पतये नमः ' इति च तैत्तिरीये । 'तदेतत्सकलं विश्वं स हि विश्वाधिकः शिवः । स एव जगतां नाथः स हि संसारमोचकः' । इति पराशरस्मरणं च । स्थाणुश्चेत्किं तस्य सेवया इत्याकांक्षायामाह–स्थिरभक्तियोगसुलभः स्थिरा चासौ भक्तिस्तस्या योगस्तेन सुलभः सुप्रापः । यद्वा स्थिरा भक्तिर्योगो ध्यानं च ताभ्यां सुलभः । योगः चित्तवृत्तिनिरोधः पातञ्जलोक्तो वा ग्राह्यः । भक्तिश्च योगश्च भक्तियोगौ स्थिरौ भक्तियोगौ ताभ्यां सुलभः इति वा । तथा चोक्तं कैवल्योपनिषदि–'श्रद्धाभक्तिध्यानयोगादवेहि' इति ॥ योगस्वरूपं चोक्तं कठोपनिषदि पञ्चवल्ल्यां–' यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टते तामाहुः परमां गतिम् । तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ॥ इति । भगवद्गीतास्वपि ' तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ' इत्यादि । स क इत्यपेक्षायामाह–वेदान्तेषु यं रोदसी व्याप्य स्थितं एकपुरुषं आहुः । वेदान्ताः वेदानामन्ताः अवसानभागाः उपनिषदः ॥ ता एव वेदेषु ब्रह्मविद्याधिगमे अन्त्यं प्रमाणमिति वा वेदान्तसंज्ञाः स्युः । तेषु यं रोदसी द्यावापृथिव्यौ वाप्य आवृत्य स्थितं अधिष्ठितम् । ' स भूमिं विश्वतो वृत्वात्यातिष्ठद्दशाङ्गुलम् ' इति श्रुतेः । एकम् । अन्यव्यावृत्त्यर्थमिदं । अद्वितीयं पुरुषमाहुः । अध्यात्मविद्याविदेन इति शेषः । तथा हि–'स एको य एकः स रुद्रो यो रुद्रः स ईशानो य ईशानः स भगवान्महेश्वरः' । इति अथर्वशिरउपनिषदि । 'एको हि रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिः ।' इति श्वेताश्वतरे च । पुरि शेते असौ पुरुषः । पृषोदरादित्वात्साधुः । 'स वायं पुरुषः सर्वासु पूर्षु पुरिशयो नैतेन किञ्च-

नानावृतं नैतेन किंचनासंवृतम्' । इति श्रुतेः । पुरुषत्वव्यापकत्वे चास्य ' पुरुषो वै रुद्रः सन्महो नमः' । ' तेनेदं पूर्णं पुरुषेण सर्वम् ॥ सर्व्वाननशिरोग्रीवः सर्व्वभूत-गुहाशयः । सर्व्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः ॥ महान्प्रभुर्वै पुरुषः सर्वस्यैव प्रवर्तकः' ॥ 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' । 'यो रुद्रो अग्नौ योऽप्सु य ओषधीषु । यो रुद्रो विश्वाभुवना विवेश' । इत्यादिश्रुतिभ्यः प्रतीयेते । रोदसी इति रोदःशब्दस्य सान्तस्य द्विवचनम् । ' भूद्यावौ रोदस्यौ रोदसी च ते' । इत्यमरः यस्मिन्निति–यस्मिन् स्थाणौ ईश्वर इति शब्दः अन्यस्य विषयः न भवतीति अनन्यविषयः तन्मात्रवाचक इत्यर्थः । यथार्थाक्षरः यथार्थानि अक्षराणि यस्य । यौगिक इत्यर्थः । लीलयैव ब्रह्माण्डकोटीः सृजतः पालयतः प्रत्याहरतश्च तस्य सर्वशक्तिमत्वात् । ईष्टे असौ ईश्वरः । 'स्थेशभासपिसकसो वरच्' इति वरच् प्रत्ययः । ' ईश्वरः शर्व ईशानः शङ्करश्चन्द्र-शेखरः' । इत्यमरः । तथा च ' एष सर्वेश्वर एष भूताधिपतिः' 'ईशानः सर्वभूतानां' 'तमीश्वराणां परमं महेश्वरं तं देवतानां परमश्च दैवतम् । पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्' ॥ इत्याद्यनेकश्रुतयोस्येश्वरत्वं दर्शयन्ति । अन्तरिति–चः पूर्वेण सह समुच्चयार्थः । यः नियमितप्राणादिभिः नियमिताः प्राणादयः । आदिशब्देन अपानसमानव्यानोदानानामपि ग्रहः । यैस्तैस्तथोक्तैः । 'अपाने जुह्वति प्राणं प्राणेपानं तथापरे । प्राणापानगती रुध्वा प्राणायामपरायणाः' इति भगवद्वचनात् पूरकाख्यं कुम्भकाख्यं च प्राणायामं कुर्वद्भिरिति यावत् । मुमुक्षुभिः मोक्तुमिच्छुभिः । 'सनाशंसभिक्ष उः ' इति सन्नन्तान्मुच्लृधातोः उप्रत्ययः । अन्तः हृदये मृग्यते अन्विष्यते । एतेन स्थिरप्रज्ञानां परिपक्वसमाधी नामेव तस्य साक्षात्कारयोग्यत्वं ध्वनितम् । अन्तरित्यनेन तस्य हार्दाकाशान्तः' स्थत्वं सूचितम् । तथा च श्रुतयः—'अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्व वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' । इति च्छान्दोग्ये । ' हृत्पुण्डरीकं विरजं...विचिन्त्य मध्ये विशदं विशोकम् । अचिन्त्यमव्यक्तमनेकरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ' । इ० कैवल्ये । 'दहरं विपाप्मं परमेश्वरस्य यद्वेश्मभूतं सकलं पुरस्थम् तत्रापि दहं गगनं विशोकं तदेव नित्यं सकलैरुपास्यम्' ॥ इति । तैत्तिरीये । ईश्वरगीतास्वपि ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति' इति । एतेन वेदान्तेषु एकत्वपुरुषत्वेश्वरत्वान्तःस्थत्व-निश्रेयसहेतुत्वादिधर्मैरान्नातः शिवो वः परं श्रेयो ददात्विति पिण्डितोर्थः । शार्दूलविक्रीडितं छन्दः । तल्लक्षणं तु 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलवि-क्रीडितम् । ' इति । भूमिदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगात् शुभलाभः सूचितः । ' क्षेमं सर्वगुरुर्दत्ते मगणो भूमिदैवतः ' इति भामहोक्तेः । 'शुभदो भो भूमिमयः' इत्यन्यत्रापि । नान्दीत्वादेवास्यादौ मगणः वकारस्यामृतबीजत्वात्प्र-चयगमनादिसिद्धिः ।

(नान्द्यन्ते)

वक्ष्यमाणनान्दीलक्षणप्राप्तं काव्यार्थसूचनमप्यत्र प्रदर्श्यते "अत्र वेदान्तेषु यमाहुरेकपुरुषं इत्यादिभिर्विशेषैर्वक्ष्यमाणः कथानायकः पुरूरवा नाम राजा सूच्यते। कुतः 'उर्वश्यसि पुरूरवा अति घृतेनाक्ते वृषणं दधाथाम्' इत्यादिवेदवाक्येषु कथनाच्च जस्स वाम्बरतले गदी अत्थीत्यादिवाक्यप्रतीयमानरोदः—लंचारवत्वाच्चानन्यसाधारणैश्वर्यवत्वाच्चोर्वश्या मोक्षार्थिभिर्मृग्यमाणत्वाच्च।" इति **काटयवेमः**। 'अनन्यसामान्यप्रजापालनदयादाक्षिण्यादियोगाद्यं पुरुषमेकं मुख्यमाहुर्वर्णयन्ति। बुधा इति शेषः। रोदसी द्यावाभूमी व्याप्य स्थितम्। निजकीर्त्येति शेषः। यस्मिन्राजनीश्वरशब्दो यथार्थाक्षरो निग्रहानुग्रहादिप्रभुशक्तिसंपत्तेरिति भावः। चोऽप्यर्थे। तथा च नियमितप्राणादिभिर्मुमुक्षुभिरपि समलोष्टाश्मकाञ्चनैरत्युदासीनैरपीत्यर्थः। यो राजा अन्तः अन्तःकरणे मृग्यते चिन्त्यते। नैतादृशो धर्मशीलो जगति दृष्टपूर्व इति सर्वदा चेतस्यनुसंधीयत इति भावः। स्थाणुः स्थिरतरः। अतिधीर इति यावत्। यद्वा स्थाणू रुद्ररूपः। तदंशत्वात्। स्थिरा भक्तिर्यासां प्रजानां ताभियोंगेन चित्तानुसरणरूपेणोपायेन सुलभोभिगम्यः। यद्वा 'स्थाणुस्थिर—'इति निर्विसर्गान्तं पाठमङ्गीकृत्य स्थाणुवत्स्थिरः केनाप्यनुच्छेद्यो भक्तियोंगेन सुलभश्च। पश्चात्कर्मधारयः। यद्वा भक्तिर्भागो राजग्राह्यस्तद्योगो यस्य स चासौ सुलभश्च। भागरूपेण वा योगेनोपायेन सुलभः। यद्वा स्थिरा भक्तिरर्थाद्राजनि यस्या उर्वश्यास्तया योगेनार्थात्सङ्गमनीयाख्यमणिसम्बन्धेन सुलभः सुप्रापः तस्या वा योगेन पूर्वोक्तोपायेन सुलभः। एतेनास्योर्वशीकामुकत्वं लतारूपायाश्चास्याः सङ्गमनीयद्वारा सङ्गम इत्याद्यसूचि। 'योगश्चारे पूर्वलाभे सूत्रे विस्रब्धघातिनि। उपाये सङ्गतौ ध्यानौषधसन्नाहयुक्तिषु॥' इति त्रिकाण्डीशेषः। एवं विशेषणगुणविशिष्टः स प्रसिद्धविभवो विशेषणमहिम्ना विशेष्यालाभात्पुरूरवाः। वो युष्माकं सभासदां निःश्रेयसाय योगक्षेमादिरूपकल्याणायास्तु भवतु।' इति **रङ्गनाथः**।

सूत्रधारः पठेन्नान्दीमित्युक्तेः सूत्रधारलक्षणं मातृगुप्ताचार्योक्तं यथा—'चतुरातोद्यनिष्णातोऽनेकभूषासमावृतः। नानाभाषणतत्त्वज्ञो नीतिशास्त्रार्थतत्त्ववित्॥ वेशोपचारचतुरः पौरेषणविचक्षणः नानागतिप्रचारज्ञो रसभावविशारदः॥ नाट्यप्रयोगनिपुणो नानाशिल्पकलान्वितः। छन्दोविधानतत्त्वज्ञः सर्वशास्त्रविचक्षणः। तत्तद्गीतानुगलयकलातालावधारणः। अवधाय प्रयोक्ता च योक्तृणामुपदेशकः॥ एवं गुणगणोपेतः सूत्रधारोभिधीयते।' इति। **नान्द्यन्ते** इति—नान्दीलक्षणं साहित्यदर्पणे—आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥ मङ्गल्यशब्दचन्द्राब्जकोककैरवशंसिनी। पदैर्युक्ता द्वादशभिरष्टभिर्वा पदैरुत॥ इति। तथा चादि-

---

१ विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ। इत्य०।

सूत्रधारः—अलमतिविस्तरेण । (नेपथ्याभिमुखमवलोक्य ।) मारिष इतस्तावत् ।

भरत–' आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः । नान्दीति कथ्यते' इति । नान्दीपदव्युत्पत्तिरुक्ता नाट्यप्रदीपे—' नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदाश्च सन्तः । यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी ॥ ' इति । तत्र भरतः ' सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः । नान्दीपदैर्द्वादशभिरष्टभिर्वाप्यलंकृताम् ॥ ' इति । पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा श्लोकतुरीयांशरूपाणि वावान्तररूपाणि वा तदुक्तं नाट्यप्रदीपे —'श्लोकपादः पदं केचित्सुप्तिङन्तमथापरे । परेवान्तरवाक्यैकस्वरूपं पदमूचिरे॥' इति । सङ्गीतकल्पतरावपि– 'हरोत्तमाङ्कस्थितवस्तुवर्णनैर्वाक्यार्थभूम्नार्थपदैस्त्रिसंख्यैः। षड्भिश्चतुर्भिर्नृपविप्रसंपत्समाशिषा संप्रवदन्ति नान्दीम् ॥ ' इति । अत्र श्लोकतुरीयांशः पदम् । तेन चतुष्पदेयं नान्दी* । अत्र च समासोक्त्या पूर्वोक्तप्रकारेण काव्यार्थप्रकाशनात्पत्रावलीसंज्ञेयं नान्दी । तदुक्तं नाट्यदर्पणे–'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः । श्लेषेण वा समासोक्त्या नाम्ना पत्रावलीति सा ॥ ' इति । सूत्रधारपदनिरुक्तिस्तावत्– सूत्रं सबीजकं नाट्यानुष्ठानं धारयति प्रवर्तयतीति सूत्रधारः । तदुक्तम्—' नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम् । रङ्गदैवतपूजाकृत्सूत्रधार उदीरितः ॥ ' इति । ' दिव्यमर्त्ये स तद्रूपो मिश्रमन्यतरस्तयोः ॥ सूचयेद्वस्तु बीजं वा मुखं पात्रमथापि वा ॥ ' इत्यभिधानात् ' रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः । ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥ भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः । पदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः॥' इत्युक्तलक्षणां वाग्व्यापारात्मकभारतीरूपाम् । ' अलमतिविस्तरेण ' इत्यारभ्य ' प्रस्तावना ' इत्यन्तां प्रस्तावनामवतारयति **अलमित्यादिना**—अति विस्तरेण पूर्वरङ्गाङ्गानामित्यर्थः । अलं आस्तां स इत्यर्थः । अन्यथा प्रयोगदर्शनसमुत्सुकानां सामाजिकानामौत्कण्ठ्यं विहतं स्यादिति भावः । **नेपथ्याभिमुखमिति**—नेपथ्यं जवनिका

---

* यत्त्वत्र साहित्यदर्पणकृदाह–' कालिदासादिमहाकविप्रबन्धेषु च वेदान्तेष्वित्यादौ नान्दीलक्षणात्पूर्वरङ्गस्यैव रङ्गद्वाराख्यमङ्गमारभ्य कविः कुर्यादित्युक्तत्वाच्च रङ्गद्वारमेवेदं न नान्दी' इति तन्मूलादर्शनानिबन्धनम् । यतः प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥ इत्यादि वचनेनास्या अवश्यकर्तव्यत्वात् । श्रव्यैर्द्वादशभिः पदैरथ समैर्यद्वाष्टभिर्निर्मिता इत्यादिनाट्यलोचनकारोक्तनान्दीलक्षणेऽस्याः समपदत्वेनाप्युक्तेरत्र च श्लोकपादे पदाभिधाननयेऽवान्तरवाक्यपदाभिधाने च चतुष्पदात्वेन तत्पदमते स्थिरभक्तीति क्रियाविशेषणान्तपदविधानतः षड्विंशतिपदात्वेन चातिस्पष्टतया नान्द्या विद्यमानत्वान्नान्दीलक्षणायोगाभिधानं गजनिमीलिकया मौर्ख्यमात्रमित्यास्तां विस्तरेण । इति रङ्गनाथः

(प्रविश्य ।)

पारिपार्श्वकः—भाव अयमस्मि ।

सूत्रधारः—मारिष बहुशस्तु परिषदा पूर्वेषां कवीनां दृष्टाः[१] प्रयोगबन्धाः । सोऽहमद्य विक्रमोर्वशीयं नाम नाटकमपूर्वं प्रयोक्ष्ये । तदुच्यतां पात्रवर्गः स्वेषु स्वेषु पाठेष्वसमूढैर्भवितव्यमिति ।

पारिपार्श्वकः—यथाज्ञापयति भावः । (इति निष्क्रान्तः)

सूत्रधारः—यावदिदानीमार्यमिश्रान्विज्ञापयामि ।

(प्रणिपत्य)

यदन्तर्हिता नटा वेषग्रहं प्रसाधनं च कुर्वन्ति । तदभिमुखमवलोक्येति कविवचनम् । ' नेपथ्यं स्याज्जवनिका रङ्गभूमिः प्रसाधनम् । ' इत्यजयः । **मारिषेति**—मारिषः सूत्रधारादीषन्यूनः पारिपार्श्वकाभिधो नटविशेषः । तल्लक्षणं भरते–"सूत्रधारस्य पार्श्वे यः प्रवचन्कुरुतेर्थनाम् । काव्यार्थसूचनालापं स भवेत्पारिपार्श्वकः " इति ॥ ' मान्यो भावेति वक्तव्यः किंचिन्न्यूनस्तु मारिषः ' ॥ इत्यमरः । मारिष एव मर्षणान्मार्षः । सूत्रधारोक्तनिर्वाहसहिष्णुरित्यर्थः । इतस्तावत् [आगम्यतां] इति कालक्षेपांसहमानस्योक्तिः । भाव मान्यनट इति सूत्रधारं प्रति पारिपार्श्वकस्योक्तिः । तदुक्तं–" सूत्रधारं वदेद्भाव इति वै पारिपार्श्वकः । सूत्रधारो मारिषेति । " इति । परिषदा परिषत्सभा । ' सभज्या परिषद्गोष्ठी सभासमितिसंसदः । ' इत्यमरः । प्रयोगबन्धाः–प्रयोगोऽभिनयो बध्यतेऽस्मिन्निति प्रयोगबन्धः नाटकम् । **सोहम्** एतज्जानन्नित्यर्थः । **विक्रमोर्वशीयं** विक्रमेण लब्धा उर्वशी विक्रमोर्वशी तामधिकृत्य कृतं नाटकं । 'अधिकृत्य कृते ग्रन्थे ' इति छः । अस्य त्रोटकत्वेऽपि नाटकान्तः पतित्वात् नाटकसंज्ञायाः सर्वैः सौलभ्येन ग्राह्यत्वान्नाटकमित्युक्तिः । यद्वा नटवृत्तावित्यस्य धञि स्वार्थे कनि नाटकमिति । तेन नाटकं नाट्यमित्यर्थः । अथवा त्रोटकमिति पठनीयम् । अपूर्वं नूतनं प्रयोक्ष्ये । प्रयोगेणाभिनेष्यामि । पात्रवर्गः नटमेलकः । पाठेषु भुमिकाभिनयेषु । असंमूढैः सावधानैः कर्तव्यदक्षैः । यथाज्ञापयति भवदाज्ञामनुवर्ते इत्यर्थः । आर्यमिश्रान्—आर्याश्च ते मिश्राश्च तान् । आर्याः अभ्यर्हिताः साध्वचारा इति वा । तदुक्तम्—'कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स वै आर्य इति स्मृतः' ॥ यद्वा सत्कुलादिसम्पन्ना यदाह भरतः-'कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता । अद्रोह इति येष्वेतत्तानार्यान्संप्रचक्षते ' ॥ मिश्राः पूज्याः । पूज्ये मिश्रवचनं नित्यं बहुवचनान्तम् । ' मरीचिमिश्रैर्देक्षेण' इति विष्णुपुराणात् लोकेपि व्यवहारदर्शनाच्च । आराद्याताः दूरं गता ग्राम्यत्वादिदोषेभ्य

---

१ दृष्टप्रयोगाः प्रबन्धाः ॥

प्रणयिषु वा दाक्षिण्यादथ वा सद्वस्तुपुरुषबहुमानात् ।
शृणुत मनोभिरवहितैः क्रियामिमां कालिदासस्य ॥ २ ॥

(नेपथ्ये)

परित्रायतां परित्रायतां यः सुरपक्षपाती यस्य वाम्बरतले गतिरस्ति । (परित्ताअदु परित्ताअदु जो सुरपक्खवादी जस्स वा अम्बरअले गदी अत्थि ।)

सूत्रधारः—(कर्णं दत्त्वा) अये किं नु खलु मद्विज्ञापनानन्तरं कुररीणामिवाकाशे शब्दः[1] श्रूयते ।

इति आर्याः । इति मालतीमाधवटीकायां **जगद्धरः** । आयाता दूरं गता भ्रान्तत्वादिदोषेभ्यः इति आर्याः । इति **रङ्गनाथः** । **प्रणयिष्विति**—प्रणयःप्रीतिः नम्रता वा सोस्त्येषामिति प्रणयिनः । ' अत इनि ठनौ ' इति इनिप्रत्ययः । तेषु युष्माकं नम्रसेवकेषु । अस्माकमभिनयो द्रष्टव्य इति प्रार्थयमानेषु वास्मासु । दाक्षिण्यादानुकूल्याद्धेतोः । अथ वा पक्षान्तरे । एतदुक्तहेतोरस्य प्राशस्त्यं दर्शयति । शोभनं यद्वस्तु इतिवृत्तं तस्य पुरुषो नायकः तस्यादरातिशयात्प्रशस्तकथानायकगौरवात् । वस्तु च पुरुषश्च तयोरादरातिशयादिति वा । इमामधुनैव प्रयोगेऽधिक्रियमाणां **कालिदासस्य** क्रियां त्रोटकरूपामवहितैरनन्यासक्तैर्मनोभिः शृणुत । कालिदासस्येति नामनिर्देशः कविप्रशंसायै । सद्वस्त्विति रूपकप्रशंसा । उक्तं च भावप्रकाशिकायाम्—इत्थं रङ्गविधानस्य सम्बन्धादिप्रसिद्धये । गोत्रं नाम च बध्नीयात्पूजावाक्यं सभासदाम् ॥ इति । काव्यलिङ्गमलङ्कारः । तदुक्तं ' काव्यलिङ्गं हेतोर्वाक्यपदार्थता ' इति आर्या छन्दः । तल्लक्षणम्—यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेपि । अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ इति । इह वस्तुतदुपकारकसन्ध्याद्यङ्गानां लक्षणानि विस्तरभयान्नोच्यन्ते । तानि दशरूपकादौ द्रष्टव्यानि । **नेपथ्ये** सुरपक्षपाती पक्षे पातः अस्यास्तीति पक्षपाती सुराणां पक्षपाती सुरपक्षपाती देवकार्यकारीत्यर्थः । यो वाकाशे संचरितुं समर्थः । अत्र प्रसङ्गादिदमुच्यते—इतिवृत्तं द्विविधम् । ' सूच्यमेव भवेत्किंचिद् दृश्यश्रव्यमथापि वा ' ॥ इति भेदात् । तत्र ' अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत् । विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः ' ॥ एतन्मध्ये ' अन्तर्जवनिकासंस्थैश्चूलिकार्थस्य सूचना ' । इति लक्षणात् 'नेपथ्ये' इत्यारभ्य ' अम्बरतले गदी अत्थि '

---

१ शब्दः श्रूयते इत्यनन्तरम् ।
मत्तानां कुसुमरसेन षट्पदानां शब्दोऽयं परभृतनाद एष धीरः ।
आकाशे सुरगणसेविते समन्तात्किं नार्यः कलमधुराक्षरं प्रगीताः ॥ ३ ॥
इत्यधिकं श्लोकं रङ्गनाथः पठति व्याचष्टे च ।

(विचिन्त्य) भवतु । ज्ञातम् ।

उरूद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपसृत्य निवर्तमाना ।
बन्दीकृता विबुधशत्रुभिरर्धमार्गे
क्रन्दत्यतः शरणमप्सरसां गणोऽयम् ॥ ३ ॥

(इति निष्क्रान्तः ।)

प्रस्तावना ।

इत्यन्तेन कुबेरभवनान्निवर्तमानायाश्चित्रलेखाद्वितीयाया उर्वश्या दानवापहरणरूपनाटकीयार्थस्य सूचनात्प्रस्तावनान्तर्गतैव चूलिका कृतेति बोध्यम् । एवं यत्र यत्र ' नेपथ्ये ' इत्यादिना यद्यत्सूच्यते सा चूलिकेति ज्ञेयम् । **मद्विज्ञापना०**— ' प्रणयिषु '...इत्यादि विज्ञापनानन्तरम् । कुररीणां—कुरस्त्रीणां । ' उत्कोशकुररौ समौ' इत्यमरः । 'टिटवी' इतिख्यातानाम् । **ऊरूद्भवेति**—नरस्य तदाख्यस्यर्षेः सखा नरसखः । 'राजाहःसखिभ्यष्टच्' इति टच्प्रत्ययः । मुनिर्नारायणस्तस्य ऊरोरुद्भवो यस्याः सा सक्त्थुत्पन्ना । ' सक्थि क्लीबे पुमानूरुः ' इत्यमरः । सुरस्त्री दिव्याङ्गना उर्वशी । तदुक्तं हरिवंशे—"नारायणोरुं निर्भिद्य संभूता वरवर्णिनी । ऐलस्य दयिता देवी योषिद्रत्नं किमुर्वशी" ॥ कैलासनाथं कुबेरमुपसृत्य सेवार्थमुपगम्य । 'उपनृत्य' इति पाठे तत्समीपे नृत्यं कृत्वेत्यर्थः । ' विवक्षातः कारकविभक्तयो नाना भवन्ति' इति शाब्दिकोक्त्यनुसारेणाधिकरणविवक्षायां कर्मत्वम् । निवर्तमाना प्रत्यागच्छन्ती सती अर्धमार्गे मार्गस्यार्धमर्धमार्गः तस्मिन् मार्गान्तराले

किमिति वितर्के । स च सर्वत्र षट्पदादिशब्दादिष्वन्वेति । कलान्यव्यक्तानि मधुराणि चाक्षराणि यस्यां क्रियायामिति यथा तथा । यद्यपि कलशब्दोऽव्यक्तमधुरवाचकः तथापि मधुरपदस्य वर्तमानत्वात्केवलाव्यक्तपरो ग्राह्यः यद्वा कं चित्रं लान्तीति. कलानि आश्चर्यकारीणि मधुराणि अक्षराणि यत्र यस्यां क्रियायाम् । यद्वा कं द्युतिं लान्ति तानि । अनुप्रासादिघटनाच्छोभमानानीति यावत् । तेन च ' प्रसिद्धार्थपदत्वं यत्स प्रसादो निगद्यते ' इति लक्षणोक्तप्रसादाख्यगुणवत्ता ध्वनिता । यद्वा कं स्मरं लान्ति यच्छ्रवणमात्रेण झटिति मदनोद्भवो भगवतीति भावः । यद्वा कं मयूरं लान्ति वशीकुर्वन्ति तद्विधानि । यदाकर्णनेन तिर्यञ्चोऽपि हर्षकलिता वशीभवन्ति किमुतान्ये सचेतस इति हृदयम् । को ब्रह्मानिलसूर्याग्निचित्रारियमकेतुषु । विष्णुवाहनशर्वेऽब्धौ सितकर्णे वसौ द्युतौ ॥ स्वर्गे चक्रे तथा मित्रे शुद्धेऽर्थे स्मरकालयोः ॥ ' इत्येकाक्षरः । 'को ब्रह्मानिलसूर्याग्नियमात्मद्योतबर्हिषु । ' इति विश्वलोचनः । प्रगीता गातुमुपक्रान्ता । प्रगीता इत्यत्र कर्मणि (कर्तरि) क्तः । किन्नर्यः इत्यपि क्वचित्पाठे किन्नरवनिता इत्यर्थः । परं त्वनुपादेयोऽयं पाठः । वितर्कार्थककिंपदस्यात्रातीवावश्यकत्वात् । त्रिगताभिधं चेदं वीथ्यङ्गम् । तल्लक्षणं दशरूपके—'श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं मतम् । ' इति । अत्राकाशे श्रुतः शब्दः श्रुतिसाम्यतः स्वरावयवीभूतसूक्ष्मशब्दसाम्यतः षट्पदादीनां किमित्यादिभिरनेकार्थैर्योजितः । ' प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा यतिः संपरिज्ञेया स्वरावयवलक्षणा ॥ ' इति सङ्गीते ॥

(ततः प्रविशन्त्यप्सरसः ।)

अप्सरसः—परित्रायतां परित्रायतां यः सुरपक्षपाती यस्य वाम्बरतले गतिरस्ति । (परित्ताअदु परित्ताअदु जो सुरपक्खवादी जस्स वा अम्बरअले गदी अत्थि ।)

(ततः प्रविशत्यपटीक्षेपेण राजा पुरूरवा रथेन सूतश्च ।)

राजा—अलमाक्रन्दिते । सूर्योपस्थानात् प्रतिनिवृत्तं पुरूरवसं मामुपेत्य कथ्यतां कुतो भवत्यः परित्रातव्या इति ।

इत्यर्थः । विबुधशत्रुभिः विशेषेण बुध्यन्ते इति विबुधा देवास्तेषां शत्रुभिः दानवैर्बन्दीकृता बलात्कारेण गृहीता । अतोऽस्मात्कारणादयमप्सरसां गणः शरणं रक्षितारं ' शरणं गृहरक्षित्रोः ' इत्यमरः । क्रन्दति आक्रोशति । अद्भ्यः सरन्तीत्यप्सरसः । तथा च रामायणम्-'अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः । उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्' ॥ इति । अयं शब्दः प्रायो बहुवचनान्तः । तदुक्तममरसिंहेन ' स्त्रियां बहुष्वप्सरसः' इति । अप्सरा इत्येकवचनान्तस्यापि प्रयोगदर्शनादिति सुबोधिनीकारः । यथा नलोदये "तुल्योप्सरसा देहि प्रभवो भग्नाप्सरः प्रसरसा देहि" इति । उक्तं चान्यत्र 'आपः सुमनसो वर्षा अप्सरः सिकतासमाः । एते स्त्रियां बहुत्वे स्युरेकत्वेप्युत्तरत्रिकम् ॥' इति । आबन्तोपि क्वचिद्यथाग्रे ' अनप्सरेव प्रतिभासि' इत्यत्र । वसन्ततिलका वृत्तं तल्लक्षणम्—उक्ता वसन्ततिलका तभजा जगौ गः । इति । **प्रस्तावना**-तल्लक्षणं भावप्रकाशे—नटी विदूषको वापि पारिपार्श्वक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा' ॥ अत्र सुधाकरः-" विधेर्यथैव सङ्कल्पो मुखतां प्रतिपद्यते । प्रधानस्य प्रबन्धस्य तथा प्रस्तावना मता ॥ अर्थस्य प्रतिपाद्यस्य तीर्थं प्रस्तावना मता । " इति । दशरूपके च-' सूत्रधारो नटीं ब्रूते मार्षं वाथ विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् । प्रस्तावना वा' इति । 'एषमन्यमतेनार्थं पात्रं वाक्षिप्य सूत्रभृत् । प्रस्तावनान्ते निर्गच्छेत्ततो वस्तु प्रपञ्चयेत् ' ॥ इयं च प्रस्तावना भारत्यङ्गमेव । अस्याः पञ्चाङ्गत्वमुक्तं साहित्यदर्पणे—उद्घातकः कथोद्घातः प्रयोगातिशयस्तथा । प्रवर्तकावगलिते पञ्च प्रस्तावनाभिदः ॥ इति । तत्र ' यदि प्रयोग एकस्मिन्प्रयोगोऽन्यः प्रयुज्यते । तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा ' ॥ इत्युक्तलक्षणक्रमेण सूत्रधारेणेहाप्यप्सरसां प्रवेशसूचनात्प्रयोगातिशयनामात्र प्रस्तावनाङ्गम् । **ततः प्रविशति**—अपटीक्षेपेण ' नासूचितस्य पात्रस्य प्रवेशो नाटके मतः ' । इति वचनाद्यत्रासूचितस्य पात्रस्याकस्मिकः प्रवेशो भवति तत्र स ' अपटीक्षेपेण ' इति वचनेन विशिष्यते । **राजा**—सूर्योदस्थानात् सूर्यमुपास्य । पुरूरवसमिति नामनिर्देशः प्रतिपन्नकार्यनिर्वाह-

रम्भा—असुरावलेपात् । (असुरावलेवादो ।)

राजा—किं पुनरसुरावलेपेन भवतीनामपराद्धम् ।

रम्भा—शृणोतु महाराजः । या तपोविशेषपरिशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य प्रत्यादेशो रूपगर्विताया: श्रियः अलङ्कारः स्वर्गस्य सा नः प्रियसख्युर्वशी कुबेरभवनात्प्रतिनिवर्तमाना समापत्तिदृष्टेन हिरण्यपुरवासिना केशिना दानवेन चित्रलेखाद्वितीया अर्धपथ एव बन्दिग्राहं गृहीता । (सुणादु महाराओ । जा तवोविसेसपरिसङ्किदस्स सुउमारं पहरणं महिन्दस्स पच्चादेसो रूवगव्विदाए सिरीए अलङ्कारो सग्गस्स सा णो पिअसही उव्वसी कुबेरभवणादो पडिणिवुत्तमाणा समावत्तिदिट्ठेण हिरण्यउरवासिणा केसिणा दाणवेण चित्तलेहादुदीआ अद्धपथं जेव्व बन्दिग्गाहं गिहीदा ।

राजा—अपि ज्ञायते कतमेन दिग्विभागेन गतः स जाल्म इति ।

सहजन्या—पूर्वोत्तरेण । (पुव्वुत्तरेण ।)

राजा—तेन हि मुच्यतां विषादः । यतिष्ये वः सखीप्रत्यानयनाय ।

कताव्यञ्जनार्थः । कुतः कस्माद्भयाद्भयहेतोर्वा । **रम्भा**—असुराणामवलेपात् गर्वात् । दर्पादिति यावत् । ' अवलेपस्तु गर्वे स्याल्लेपने द्वेषणेपि च' इति विश्वः । अत्र अवलेपशब्दः तत्कार्यस्योर्वशीहरणरूपाधिक्षेपस्य लक्षकः । यथा रघुवंशेऽष्टमसर्गे ' ददृशे पवनावलेपजम् ' इत्यत्र । **राजा**—भवतीनामपराद्धमपराधः कृतः । **रम्भा**—तपोविशेषपरिशङ्कितस्य कस्यापि तपःप्रकर्षेण जातस्वपदापहारशङ्कस्य इन्द्रस्यान्यसमाधिभीरुत्वं हि पुराणप्रसिद्धम् । सुकुमारं स्त्रीत्वात् । प्रहरणं आयुधम् । प्रहियतेऽनेन प्रहरणं " कारणा० " इति ल्युट् । प्रत्यादेशनं प्रत्यादेशः । ' प्रत्यादेशो निराकृतिः । ' इत्यमरः । रूपेति—गर्वोस्याः सञ्जातासौ गर्विता रूपेण गर्विता रूपगर्विता तस्याः । या लक्ष्मीमपि सौन्दर्येणातिशयानोपहसतीवेत्यर्थः । अलङ्कारः ललामभूता दिव्यलोकस्य । समापत्तिदृष्टेन अकस्मादृष्टेन । यदृच्छयोपस्थितेनेत्यर्थः । हिरण्यपुरवासिना हिरण्यपुरे वस्तुं शीलमस्य । ताच्छील्ये णिनिः । अर्धपथे—पथोर्धमर्धपथस्तस्मिन् । बन्दिनमिव गृहीत्वा बन्दिग्राहम् । " उपमाने कर्मणि च " इति णमुल् । **अप्सरसः**—पूर्वोत्तरेण—पूर्वस्या उत्तरस्याश्च दिशोरन्तरालं दिग्विभागः पूर्वोत्तरस्तेनैशान्या दिशेत्यर्थः । **राजा**—विषादः खेद मनोभङ्गो वा । तदुक्तम्—" विषादश्चेतसो भङ्ग

सर्वाः—सदृशं खलु सोमादेकान्तरस्य । (सरिसं खुं सोमादो एक्कन्दरस्स ।)

राजा—क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ।

अप्सरसः—एतस्मिन्हेमकूटशिखरे । (इमस्सिं हेमकूडसिहरे ।)

राजा—सूत ऐशानीं दिशं प्रति नोदयाश्वानाशुगमनाय ।

सूतः—यदाज्ञापयत्यायुष्मान् (इति यथोक्तं करोति ।)

राजा—(रथवेगं निरूपयन् ।) साधु साधु । अनेन रथवेगेन पूर्वं प्रस्थितं वैनतेयमप्यासादयेयं किं पुनस्तमपकारिणं मघोनः । तथा हि

अग्रे यान्ति रथस्य रेणुवदमी चूर्णीभवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु जनयत्यन्यामिवारावलीम् ।
चित्रन्यस्तमिवाचलं हयशिरस्यायानवच्चामरं
यष्ट्यग्रे च समं स्थितो ध्वजपटः प्रान्ते च वेगानिलात् ॥४॥

उपायाभावनाशयोः" । इति । **अप्सरसः**—सोमादेकान्तरस्य सोमादेकान्तरं व्यवधानं यस्य सोमादेकेन बुधेन व्यवहितस्य । ब्रह्मपुत्रादत्रेः सोमो-जायत । तस्य पुत्रो बुधस्तस्य च पुरूरवाः । इति वंशः । **राजा**—प्रतिपाल-यिष्यन्ति । प्रतीक्षन्ते । आशुगमनाय शीघ्रं गमिष्यन्तीति । पूर्वप्रस्थितं पूर्वं प्रस्थितः तम् । वैनतेयं–विनताया अपत्यं पुमान् वैनतेयः तं गरुडम् । अपकारिणं सुराङ्गनारत्नस्योर्वश्या अपहरणादिति भावः । **अग्रे यान्तीति** । अमी चूर्णी-भवन्तः चक्राघातैः क्षुण्णो इत्यर्थः । घना वेगानिलात् वेगस्य रथजवस्य अनिलः वायुस्तस्माद्धेतो रथस्याग्रे रेणुवद्रजांसीव यान्ति । रङ्गनाथस्तु 'रेणुपदवीं' इति पाठं गृहीत्वैवं व्याख्यति ॥ 'चूर्णीभवन्तो घना मम रथस्याग्रे रेणुपदवीं रेणुमार्गं यान्त्यनुसरन्ति । जलगुरवोऽपि जलदाश्चक्रधारया पिष्टी-कृताः मत्स्यन्दनाग्रतः पांसुवदुत्सर्पन्तीत्यर्थः । यद्वा रथस्याग्रेऽश्वखुरैश्चूर्णभि-वन्तो मेघा रेणुपदवीं यान्ति । रेणवो यथाश्वोद्धूताः पाश्चात्यवातेनाग्रे नीयमाना अपि रथस्य वेगातिशयेन पश्चाद्रवन्ति तथैतेऽपि रथरयात्पश्चाद्गच्छन्तीति भावः । " आर्थी उपमा । वेगानिलात् चक्रभ्रान्तिश्चक्रस्य रथाङ्गस्य भ्रमणमरा-न्तरेषु अराणां नेम्यवष्टम्भकदण्डाकारचक्रावयवानामन्तरेषु अन्तरावकाशेष्व-न्यामरावलीमरपङ्क्तिं जनयतीव । रयातिशयात्तथा भासत इत्यर्थः । 'अरः शीघ्रे च चक्राङ्गे' । इति विश्वः । वेगानिलात् हयशिरसि भूषणार्थं निविष्टं आयामवत् दैर्घ्यवच्चामरं चित्रन्यस्तमिवालेख्यनिवेशितमिवाचलं तिष्ठति ।

---

१ खु एदं सोमवंसप्पसूदस्स, एक्कन्तरितस्स. इ. पा. २ चोदय, प्रेरय. ३ यन्मध्ये च... प्रान्ते चलश्चानिलात; समस्थिति ; ध्वजपटप्रान्तश्च. इ. पा.

(निष्क्रान्तो रथेन राजा सूतश्च ।)

रम्भा—हला गतो राजर्षिः । तद्वयमपि यथासन्दिष्टं प्रदेशं संक्रामामहे । (हला गदो राएसी । ता अम्हेवि जथासंदिट्ठं पदेशं संकमामो ।)

शेषा—तथा । (तह) (इति सर्वाः शैलावतरणं रूपयित्वा स्थिताः ।)

रम्भा—अपि नाम स राजर्षिरुद्धरेन्नो हृदयशल्यम् । (अविणाम सो राएसी उद्धरे णो हिअअसल्लम् ।)

मेनका—हला मा ते संशयो भवतु । उपस्थितसंपरायो महेन्द्रोऽपि मध्यमलोकात्सबहुमानमानाय्य तमेव विजयेसनामुखे नियुङ्क्ते । (हला मा दे संसओ होदु । उवट्ठिदसंपराओ महिन्दो वि मज्झमलोआदो सबहुमाणं आणाविअ तं एव्व विअअसेणामुहे णिओजेदि ।)

रम्भा—सर्वथा इह विजयी भवतु । (क्षणमात्रं स्थित्वा ।) हला समाश्वसित समाश्वसित । एष उच्चलितहरिणकेतनस्तस्य राजर्षेः सोमदत्तो रथो दृश्यते । न खलु एषोऽकृतार्थो निवर्तिष्यते । (सव्वहा इह

उत्प्रेक्षा । वेगानिलात् ध्वजपटः केतनं यष्टयग्रे दण्डाग्रे च प्रान्ते अन्यतरस्मिन् समं उभयपार्श्वयोः समेरखं स्थितः । 'यन्मध्ये' इति पाठोऽर्थतो न सम्यक्सङ्गच्छते । एतद्रथवेगनिरूपणं "मुक्तेषु रश्मिषु" इत्यादिशाकुन्तलगतेन रथवेगवर्णनेन तुलयितव्यम् । शार्दूलविक्रीडितं वृत्तम् । तल्लक्षणं तूक्तम् **रम्भा**—'हला' इति वचनेन सखी सम्बोध्या । "हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ।" इत्यमरः । रूपयित्वा नाटयित्वा । **रम्भा**—अपि नाम इति संभावनायाम् । राजर्षिः—राजा ऋषिरिव । तथा च शाकुन्तलम् 'अध्यक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये । रक्षायोगादयमपि तपः प्रत्यहं संचिनोति ।' इत्यादि । हृदये शल्यमिव दुःखकरं हृदयशल्यं उर्वशीबन्दिग्रहणरूपम् । **मेनका**—उपस्थितसंपराय उपस्थितः संपरायो यस्य । 'युद्धायत्योः सम्परायः' इत्यमरः । मध्यमलोकात् मर्त्यलोकात् । विजयसेनामुखे विजययुक्ता सेना तस्या मुखे । नियुंक्ते तमेव सेनान्यं करोतीत्यर्थः । अनेन राज्ञोऽसुरविजयित्वं सूचितम् । संख्यातिगैर्दानवैः सहोपस्थितसंपरायो महेन्द्रोप्यनेन सेनान्या तान् घातयति । एवं स्थिते एकं दानवं विजेतुमलं स्याद्वा नेति कोऽत्र शङ्कावसर इति भावः । उच्चलि०—हरिणेन लाञ्छितं केतनं हरिणकेतनं उच्चलितं हरिकेतनं यस्य । सोमदत्तः "सोमेन चन्द्रेण दत्तः । चन्द्रीय-

---

१ अस्मात्परं—रंभा—नन्नु दुर्जया दानवाः । मेनका—इत्य० क्वचित्. २ सहजन्या-(क्षणमात्रं इ०)

विअई भोदु (क्षणमात्रं स्थित्वा ।) हला समस्ससध । एसो उच्चलिदहरिणकेदणो तस्स राएसिणो सोमदत्तो रहो दीसदि । ण खु एसो अकिदत्थो णिवत्तिस्सदि ।

(सर्वा उच्चक्षुषो विलोकयन्ति)

(ततः प्रविशति रथारूढो राजा सूतश्च चित्रलेखावलम्बिता भयानमीलिताक्षी चोर्वशी ।)

चित्रलेखा—समाश्वसितु समाश्वसितु प्रियसखी । (समस्ससदु समस्ससदु पिअसही ।)

राजा—सुन्दरि समाश्वसिहि समाश्वसिहि ।

गतं भयं भीरु सुरारिसंभवं
त्रिलोकरक्षी महिमा हि वज्रिणः ।
तदेतदुन्मीलय चक्षुरायतं
महोत्पलं प्रत्युषसीव पद्मिनी ॥ ५ ॥

चित्रलेखा—अहो कथमुच्छ्वसितमात्रसंभावितजीविता अद्यापि संज्ञां न प्रतिपद्यते । (अम्महे कहं उस्ससिदमेत्तसंभाविदजीविदा अज्ज वि सण्णं ण पडिवज्जदि ।)

राजा—बलवदत्रभवती परित्रस्ता । तथा हि[3] ।

मुञ्चति न तावदस्याः कम्पं कुसुमसमबन्धनं हृदयम् ।
पश्य हरिचन्दनेन स्तनमध्योच्छ्वासिना कथितम् ॥ ६ ॥

त्वादेव च हरिणध्वजत्वमपि युक्तम् " इति रङ्गनाथः । अकृतार्थः न कृतोऽथ उर्वशीप्रत्याहरणरूपो येन भयेन निमीलिते अक्षिणी यस्याः सा भयनिमीलिताक्षी । ' बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्पच् ' इति षच् समासान्तः । ' षिद्गौरादिभ्यश्च । इति ङीष् । **राजा**—हे सुन्दरि सुरारिसंभवं असुरोत्पन्नं भयं गतं । हि यस्मात्कारणात् वज्रिणः महेन्द्रस्य महिमा त्रिलोकरक्षी त्रैलोक्यरक्षणशीलः । तत्तस्माद्भयस्य गतत्वादायतं दीर्घं चक्षुरुन्मीलयोन्मेषय । प्रत्युषसि प्रभाते पद्मानि अस्याः सन्तीति पद्मिनी महोत्पलमिव । पूर्णेयमुपमा । **चित्रलेखा**—उच्छ्वसितमेवोच्छ्वसितमात्रं तेन संभावितमनुमितं सूचितं वा जीवितं यस्याः सा संज्ञां न प्रतिपद्यते चेतनां न प्राप्नोति । **राजा**—बलवदत्यन्तम् । **मुञ्चतीति**—पश्य अस्याः कुसुमसमबन्धनं कुसुमेन पुष्पेण समं तुल्यं बन्धनं यस्यातिसुकुमारं हृदयं स्तनमध्यो-

१ सहजन्या—(क्षणमात्रं इ०) । २ निशावसाने नलिनीव पङ्कजम् । इ० पा०
३ मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः ॥ इत्यधिकं रङ्गनाथः पठति !
४ मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम् ।
सिचयान्तेनकथंचित्स्तनमध्योच्छ्वासिना कथितः ॥ इ. पा.

चित्रलेखा—सखि उर्वशि पर्यवस्थापयात्मानम् । अनप्सरेव प्रतिभासि मे । (हला उव्वसि पज्जवत्थावेहि अत्ताणं । अणच्छरा विअ पडिहासि मे ।)

(उर्वशी प्रत्यागच्छति)

राजा—(सहर्षम् ।) अयि ! प्रकृतिमापद्यते ते प्रियसखी पश्य ।

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा ।
मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ॥ ७ ॥

चित्रलेखा—सखि विश्रब्धा भव । पराभूताः खलु त्रिदशपरिपन्थिनो हताशाः । (सहि विस्सद्धा होहि । पराभूदा क्खु तिदसपरिपन्थिणो हदासा ।)

च्छ्वासिना स्तनयोर्मध्ये कञ्चुक्यनावृतस्तनान्तरालावकाशे प्रस्पन्दमानेन हरिचन्दनेन दिव्यचन्दनोत्थानुलेपनेन । ' हरिचन्दनमस्त्री स्याद्त्रिदशानां महीरुहे । नपुंसकं तु गोशीर्षे ज्योत्स्नाकुंकुमयोरपि ॥ ' इति मेदिनी । कथितं सूचितं कम्पं न तावन्मुञ्चति नाद्यापि जहाति । ' पश्य हरिचन्दनेन ' इत्यस्य स्थाने ' सिचयान्तेन कथंचित् ' इति केचित्पठन्ति । तत्र सिचयः वस्त्रम् । ' वस्त्रं सिचयः पटः पोतः ' इति हलायुधः । तस्यान्तेनाञ्चलेन । अयं पाठो नातिसमीचीनः सिचयस्य स्तनद्वयावरकत्वात्स्तनमध्योच्छ्वासिना इत्यनेनासंगतित्वापत्तेः । **चित्रलेखा**—पर्यवस्थापय स्थिरीकुरु धैर्यावलम्बं कुरु इत्यर्थः । अनप्सरेव—धैर्यलोपो हि मानुषाणामुचितो न देवतानामिति भावः । अत्र अप्सराशब्द आबन्तः । तदुक्तं प्राक् । प्रत्यागच्छति संज्ञां लभते । **आविर्भूत** इति । शशिनि चन्द्रमसि आविर्भूते उदिते तमसा तिमिरेण मुच्यमाना । अनेनासंपूर्णप्रकाशेन नाद्यापि सकलध्वान्तक्षतिरिति सूचितं । रात्रिरिव । नैशस्य निशासम्बधिनः । हुतं भुङ्क्ते इति हुतभुग् अग्निस्तस्य छिन्नभूयिष्ठधूमा छिन्नो नाशितो भूयिष्ठो बहुलो धूमो यस्याः सा तथोक्तार्चिर्ज्वालेव । भूयिष्ठ इत्यत्र ' अतिशायने तमबिष्ठनौ ' इति बहुशब्दात् इष्ठन् प्रत्ययः । ' इष्ठस्य यिट् च ' इति यिडागमः बहुशब्दस्य भूरादेशश्च । रोधःपतनकलुषा रोधसस्तटस्य । ' कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ' । इत्यमरः । पतनेन कलुषा आविला भूत्वा प्रसादं प्रसन्नतां गृह्णती आददाना गङ्गेव इयं वरतनुश्चारुगात्री अन्तर्हृदये मोहेन मूर्च्छया मुक्तकल्पा त्यक्तप्राया । ' ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ' इति कल्पप्प्रत्ययः । सती प्रसादं गृह्णती लक्ष्यते । एकस्य बहूपमानत्वेन मालोपमा । **चित्रलेखा**—विश्रब्धा

---

१ आवण्णाणुकम्पिणा महाराएण पडिहदा दाणवा । इति रङ्गनाथः पठति ।

उर्वशी—(चक्षुषी उन्मील्य ।) किं प्रभावदर्शिना महेन्द्रेण । (किं पहावदंसिणा महिन्देण ।)

चित्रलेखा—न महेन्द्रेण । महेन्द्रसदृशानुभावेन अनेन राजर्षिणा पुरूरवसा । (ण महिन्देण । महिन्दसरिसाणुभावेण इमिणा राएसिणा पुरूरवसेण ।)

उर्वशी—(राजानमवलोक्य । आत्मगतम्) उपकृतं खलु दानवैः । (उवकिदं क्खु दाणवेहि ।)

विश्वस्ता भव । त्रिदशपरिपन्थिनः—तृतीया यौवनाख्या दशा सदा येषां ते त्रिदशाः देवाः । त्रिर्दश वा । दश दशद्वयीः । ' श्रियं विन्दति सौमित्रे पञ्चविंशति-वर्षवत ' इति रामायणवाक्येन सदा देवानां पञ्चविंशवर्षात्मकत्वेन तृतीयद-शत्येव वर्तमानत्वात् । त्रिरावृत्ता दश परिणामं येषां ते त्रिदशा इति वा । जन्मसत्ताविनाख्यास्तिस्रः दशा येषां निर्जरत्वात् इति वा । तेषां परिपन्थिनः शत्रवः । परि दोषाख्यानं पन्थयितुं शीलं येषां ते परिपन्थिनः । ' पथि गतौ । चुरादिः । णिनिः । परिशब्दश्च ' दोषाख्याने निरसने पूजाव्याप्त्योश्च भूषणे ' । इति मेदिनी । हताशा नीचा दानवापसदाः । अत्र केचित् ' आपन्नानुकम्पिना महाराजेन ' इत्यधिकं पठन्ति किन्तु तथा कृते ' किं पहावदंसिणा महिन्देण ' इति प्रश्नोनुपपन्नो भवति । अत एव हेयोयं पाठः । **उर्वशी**—प्रभावदर्शिना प्रभावेन दैव्या शक्त्या द्रष्टुं भूतं भविष्यद्वर्तमानं च पर्यालोचयितुं शीलमस्य तेन । **चित्रलेखा**—महेन्द्रेति—महेन्द्रेण सदृशः तुल्यः अनुभावः प्रभावः पराक्रम इति यावत् यस्य तेन । ' अनुभावः प्रभावे स्यान्निश्चये भावबोधने । ' इति विश्वः । **उर्वशी**—आत्मगतम्—तल्लक्षणं साहित्यदर्पणे ' अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ' इति । ' अश्राव्यं स्वगतं मतम् ' इति दशरूपके च । उपकृतं इ०—येन मयायं नयनानन्दजननो नृपो दृष्ट इति शेषः । अत्रोर्वश्या अभिलाषो गम्यते । सा च तस्याः प्रथमावस्थेति ज्ञेयम् । यथा च ' प्रकृतिस्थां उर्वशीं विलोक्यात्मगत'-मित्यादिना राज्ञोभिलाषो गम्यते । स च तस्य प्रथमावस्था । नायकनायिका-लम्बनस्य शृङ्गारस्य दशावस्था वर्णिता दशरूपकादौ । दशावस्थः स तत्रादाव-भिलाषोथ चिन्तनम् । स्मृतिर्गुणकथोद्वेगप्रलापोन्मादसंज्वराः । जडता मरणं चेति दुरवस्थं यथोत्तरम् ॥ इति । केचित्तु ' नयनप्रीतिः प्रथमं चित्तासंगस्ततोऽथ संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा स्मृति-रित्येताः स्मरदशा दशैव स्युः' ॥ इत्याहुः । अयं चोभयोरभिलाषोऽस्मिन्नाटके बीजम् । तदुक्तं दशरूपके—बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः । अर्थप्रकृतयः

राजा—(प्रकृतिस्थामुर्वशीं निर्वर्ण्य । आत्मगतम्) स्थाने खलु नारायणमृषिं विलोभयन्त्यस्तदूरुसंभवामिमां दृष्ट्वा व्रीडिताः सर्वा अप्सरस इति । अथ वा नेयं तपस्विनः सृष्टिर्भवितुमर्हति ।

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तप्रभः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ ८ ॥

पञ्च ता एताः परिकीर्तिताः । स्वल्पोद्दिष्टस्तु तद्धेतुर्बीजं विस्तार्यनेकधा । ' इति । **राजा**—स्थाने इत्यव्ययं युक्तार्थे । ' स्थाने तु कारणार्थे स्याद्युक्तसादृश्ययोरपि । ' इति मेदिनी । व्रीडिताः व्रीडा आसां संजाता । पुरा किल हिमाचले तपश्चरतो नारायणस्य प्रलोभनार्थं गता अप्सरसस्तत्समाधिभेदं कर्तुं न शेकुः । पश्चात्ता विनेतुमिच्छता भगवता नारायणेन आत्मन ऊरुतः काचिदप्रतिमलावण्यवती कन्यका निरमायि तासामुपायनीकृता च । अद्भुतरूपसम्पन्नां तां दृष्ट्वा यस्योरुत ईदृशी सुन्दरी निःसृता किं तस्य प्रलोभनमस्माभिः कर्तव्यमिति लज्जितास्ताः स्वर्गलोकं प्रतिनिवृत्त्याखिलं वृत्तान्तं महेन्द्राय निवेदयांचक्रुरिति पौराणिकी कथात्रानुसंधेया । **अस्या** इति—अस्याः सर्गविधौ निर्माणकर्मणि कान्तप्रभश्चन्द्रः प्रजापतिः स्रष्टाऽभून्नु आसीत्किम् । 'नु' इति वितर्के । अनेनोर्वश्या लावण्यातिशयो ध्वनितः । अथवा शृङ्गारो रतिपोष एको मुख्यो रसो यस्य स शृङ्गारैकरसो मदनः कामः स्वयं प्रजापतिरभून्नु । अनेनास्याः सौभाग्यातिशयः सूचितः । पुष्पाकरः पुष्पोद्भवो मासो वसन्तः अस्याः प्रजापतिरभून्नु । अनेनास्याः सौकुमार्यातिशयो व्यञ्जितः । सति नारायणे मुख्यस्रष्टरि किमनेन वितर्केणेत्याकांक्षायामेवंविधरूपनिर्माणे तस्यासामर्थ्यं दर्शयति-वेदाभ्यासजडः । विषयव्यावृत्तकौतूहलो विषयेभ्यः शब्दादिभ्यः व्यावृत्तं निवृत्तं कौतूहलं स्पृहा यस्य । न तु मदनवच्छृङ्गाराचार्यः । पुराणो जीर्णः । न तु वसन्तवत्सौकुमार्यैकशाली । मुनिर्मौनशीलस्तपस्वी नारायण इदं प्रसिद्धं मनोहरं लावण्यादिगुणैर्हृदयंगमं रूपं निर्मातुं कथं नु प्रभवेत न प्रभवेदेव इत्यर्थः । ससंदेहालङ्कारः । तल्लक्षणं काव्यप्रकाशे—' ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः । ' अत्र सूचितस्य राजाभिलाषरूपबीजस्य विन्यासाद् उपक्षेपः नाम मुखसन्ध्यङ्गमुक्तम् । ' काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ' इति तल्लक्षणम् । अत्र " मुनिरित्यस्य ब्रह्मा इत्येवार्थः । न तु नारायण इति । नारायणस्योत्पादकत्वेपि निर्मातृत्वाभावात्प्रकृते तु मुनिनिष्ठनिर्मातृत्वव्यवच्छेदस्यैव विवक्षितत्वात् । अत एव

१ कान्तिप्रद इति काव्यप्रकाशगतः पाठः ।

उर्वशी—हला स सखीजनः कुत्र खलु इदानीं भवेत् । (हला सो सहीजणो कहिं यक्खु दाणिं भवे ।)

चित्रलेखा—अभयदायी महाराजो जानाति । (अभअदाई महाराओ जाणादि ।

राजा—(उर्वशीमवलोकयन् ।) महति विषादे वर्तते । पश्यतु भवती ।

यदृच्छया त्वं सकृदप्यवन्ध्ययोः
पथि स्थिता सुन्दरि यस्य नेत्रयोः ।
त्वया विना सोऽपि समुत्सुको भवे-
त्सखीजनस्ते किमुतार्द्रसौहृदः ॥ ९ ॥

उर्वशी—(अपवार्य) अभिजातं खल्वस्य वचनम् । अथ वा चन्द्रादमृतमिति किमत्राश्चर्यम् । (प्रकाशम् ।) अत एवैनं प्रेक्षितुं त्वरते मे हृदयम् । (अहिजादं खु से व अणं । अहवा चन्दादो अमिअंत्ति किं एत्थ अच्चरीअं । अदो एव्व णं पेक्खिदुं तुवरदि मे हिअअं ।)

प्रजापतिपदस्वारस्यमपि ।'' इत्यालङ्कारिकाः । तच्चिन्त्यम् । भगवतो नारायणस्य सर्वशक्तिमत्वात्तन्निष्ठनिर्मातृत्वस्य प्रकरणप्राप्तत्वाच्च । मुनिरित्यस्य ब्रह्मेत्यर्थे कृते विधातृ रूपातिशयनिर्माणसामर्थ्यं विहन्येत । तच्च कवेरनभिमतमिति '' स्त्रीरत्न-सृष्टिरपरा प्रतिभाति सा मे । धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः '' इति शाकुन्त-लोक्तेर्भाति । अस्य श्लोकस्य स्फुटत्वे त्वालङ्कारिकसंमतोर्थः साधुरेव । **चित्रलेखा** अभयदायीति हेतुगर्भं विशेषणं । राजोऽभयदानशीलत्वात्तेन सखीजनायाभयं दत्तं स्यादेवेति मन्वानाया इयमुक्तिः । **यदृच्छयेति**—हे सुन्दरि त्वं यदृच्छया स्वेच्छया दैववशाद्वा सकृदपि एकवारमपि यस्यावन्ध्ययोः दृष्टव्यसीमां त्वां दृष्ट्वा सफलयोः यस्य नेत्रयोः पथि स्थिता यस्य दृष्टिगोचरतां याता सोपि त्वया विना समुत्सुकः सोत्कण्ठः भवेत् । किमुत आर्द्रसौहृदः आर्द्रं निरन्तरसहवासेन उपचित-रसं सौहृदं स्नेहो यस्य स ते सखीजनः पर्युत्सुको भवेदिति किं वक्तव्यम् । अत्र ' त्वया विना सोपि समुत्सुको भवेत् ' इति सामान्योक्त्या अहमपि त्वया विना पर्यु-त्सुको भविष्यामीति तदर्थमात्मन औत्सुक्यं सूचयता ' आरम्भः ' नाम कार्यस्य प्रथमावस्थोपन्यस्ता । तेन चात्र बीजारम्भयोः समन्वयाद् मुखसन्धिरिति बोध्यम् तदुक्तं दशरूपके ' अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भयत्न-प्राप्त्याशानियताप्तिफलागमाः ॥ अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः । यथा-संख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥ ' इति । **उर्वशी**—अभिजातं अभिज-

---

१ साखि अभय० २ रूढ.

राजा—(हस्तेन दर्शयन् ।)

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः ।
प्रत्यागतप्रसादं चन्द्रमिवोपप्लवान्मुक्तम् ॥ १० ॥

चित्रलेखा— सखि पश्य । (हला पेक्ख)

उर्वशी—(राजानं सस्पृहं पश्यन्ती) समदुःखः पिबतीव मां नयनाभ्याम् । (समदुक्खो पिबइव्व मं णयणेहिं ।)

चित्रलेखा—(साकूतम् ।) अयि कः । (अइ को)

उर्वशी—ननु सखीजनः । (णं सहिअणो ।)

रम्भा—(सहर्षम् ।) एष चित्रलेखाद्वितीयां प्रियसखीमुर्वशीं गृहीत्वा विशाखासमीपगत इव भगवांश्चन्द्र उपस्थितो राजर्षिः । (एसो चित्तलेहादुदिअं पिअसहीं उव्वसीं गेण्हिअ विसाहासमीवगदो विअ भअवं चन्दो उवट्ठिदो राएसी ।)

मेनका—(निर्वर्ण्य ।) द्वे अपि नः प्रिये उपनते । इयं प्रत्यानीता प्रियसखी अयं चापरिक्षतशरीरो राजर्षिः । (दुवे वि णो प्पिआणि उवणदाणि । इअं पच्चाणीदा पिअसही अअं च अपरिक्खदसरीरो राएसी ।)

सहजन्या—सखि सुष्ठु भणसि । दुर्जेयाः खलु दानवाः । (सहि सुठु भणासि । दुज्जआ खु दाणवा ।)

राजा—सूत इदं तच्छैलशिखरम् । अवतार्यतां रथः ।

नतोचितम् । **प्रकाशम्** । ' सर्वेश्राव्यं प्रकाशं स्यात् ' इति साहित्यदर्पणे । एता इति । हे सुतनु चारुगात्रि एता हेमकूटगता हेमकूटस्थास्ते सख्यः प्रत्यागतप्रसादं मूर्च्छापगमात्पुनरपि प्रसन्नं तव मुखं पश्यन्ति । उपप्लवादुपरागान्मुक्तमत एव प्रत्यागतप्रसादं चन्द्रमिव । **उर्वशी**–समदुःखः पिबति राजा सखीजनश्च । इयमात्मनो मनोभावं चित्रलेखां प्रति व्यञ्जयितुमिच्छन्त्या उर्वश्याः श्लेषोक्तिः । चित्रलेखोर्वश्योः सव्याजं प्रश्नोत्तरे च । **रम्भा**—' चित्रलेखाद्वितीयां ' अनेन चित्राया नातिविप्रकृष्टश्चन्द्र इति गम्यते । चित्राचन्द्रमसोः विशाखाचन्द्रमसोश्च योगः कामप्यभिख्यां जनयतीति कविसमयवर्णनम् । तथाहि ' काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः । हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥ ' इति रघुवंशे । ' किमत्र चित्रं यदि विशाखे शशाङ्कलेखानुवर्तेते ' । इति शाकुन्तले । अपरिक्षतशरीरः—अपरिक्षतं अविद्धं अजातापायं इत्यर्थः । शरीरं यस्य ।

---

१ उत्सुकनयना लोकाः । इ. पा. २ समितम् । सा०

सूतः—यदाज्ञापयत्यायुष्मान् । (इति तथा करोति ।)

राजा—(चक्रोद्धातं रूपयित्वा आत्मगतम् ।) हन्त दत्तफलो मे विषमावतारः ।

यदयं रथसंक्षोभादंसनांसो रथोपमश्रोण्याः ।
स्पृष्टः सरोमविक्रियमङ्कुरितं मनसिजेनेव ॥ ११ ॥

उर्वशी—(सव्रीडम् ।) सखि किमपि परतोऽपसर । (हला किं वि परदो ओसर ।)

चित्रलेखा—नाहं शक्ता । (णाहं सक्का ।)

राजा—चक्रोद्धातं उद्धातः संक्षोभः तम् । रूपयित्वा अभिनीय । विषमावतारः—विषमे नतोन्नतभूमिभागे अवतारः । यदयमिति—यत् यस्मात्कारणात् अयं ममांसो भुजशिरः रथसंक्षोभात् स्यन्दनोपघातात् रथोपमश्रोण्याः रथेन रथाङ्गेन उपमा यस्याः सा रथोपमा चक्रवद्वर्तुला पृथ्वी च श्रोणी यस्याः सा । वक्ष्यति च चतुर्थेङ्के ' रथाङ्गश्रोणिबिम्बया ' इति । तस्या अंसेन सरोमविक्रियं रोम्णां विक्रिया रोमविक्रिया तया सहितं यथा स्यात्तथेति क्रियाविशेषणम् । सरोमोद्गमं स्पृष्टस्तस्माद् दत्तफल इति पूर्वेण सम्बन्धः । अत्र केचिदङ्केनाङ्कमिति पठन्ति । तन्न युक्तं ' अयं तस्या रथक्षोभादंसेनांसो निपीडितः । एकः कृती शरीरेस्मिन् ' इति वक्ष्यमाणत्वादङ्गशब्दस्य मुख्यया वृत्त्यांसावाचिकत्वात् । रोमविक्रयामुत्प्रेक्षते—मनसिजेन कामेन अङ्कुरितमिव पल्लवितमिव । अत्र स्पृष्टः सरोमविक्रियमित्यनेनाभिलाषरूपबीजस्य बहुलीभवनात् ' परिकरः ' नाम मुखसन्ध्यङ्गमुक्तं भवति । 'अङ्कुरितमनोभवेनेव ' इति पाठस्त्वसाधुरेव । तस्य वाक्येऽसंगतत्वापत्तेः । अङ्कुरितः मनोभवो येन इति व्युत्पत्त्या भवदपीदं विशेषणमंसस्यैव स्यात् । तदप्यनुपपन्नमंसाङ्कुरयोः कार्यकारणसम्बन्धाभावात् । नहि रोमाद्भेदमोंसकार्यम् । स्पर्शकार्यं हि सः । कामिनोर्हि प्रथमस्पर्शे रोमोद्गमो नाम सात्विकभाव आविर्भवतीति प्रसिद्धमेव । तदुक्तं वात्स्यायनेन—' कन्या तु प्रथमसमागमे स्विन्नाङ्गुली स्विन्नमुखी च भवति । पुरुषस्तु रोमाञ्चितो भवति । एभिरनयोर्भावं परीक्षेत ' इति । अत्र स्वेदरोमाञ्चाभिधानं सात्विकभावोपलक्षणमात्रम् । न तु नियमो विवक्षितः । एभिरिति बहुवचनसामर्थ्यात् । तथा हि—रघुवंशे ' आसीद्वरः कण्टकितप्रकोष्ठः '

१ यदिदं रथसंक्षोभादङ्केनाङ्कं ममायतेक्षणया ।
स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव ॥ ह० पा०

रम्भा—सख्यः एत प्रियकारिणं संभावयामो राजर्षिम् । (हला एध पिअआरिणं संभावेह्म राएसिम् ।) (सर्वा[1] उपसर्पन्ति ।)

राजा—सूत स्थापय तावद् रथम् ।

यावत्पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका ।
सखीभिर्याति संपर्कं लताभिः श्रीरिवार्तवी ॥ १२ ॥

(सूतस्तथा करोति)

अप्सरसः—दिष्ट्या महाराजो विजयेन वर्धते । (दिट्ठिआ महाराओ विजएण वड्ढदि ।)

राजा—भवत्यश्च सखीसमागमेन ।

उर्वशी—(चित्रलेखादत्तहस्ता रथादवतीर्य ।) सख्यः एत पीडितं मां परिष्वजध्वम् । न खलु ममासीदाशा भूयोपि सखीजनं द्रक्ष्यामीति । (हला एध पीडिदं मं परिस्सजध । ण क्खु मे आसी आसा भूओ वि सहीअणं दक्खिस्सं त्ति ।)

(सख्यस्त्वरिताः परिष्वजन्ते)

रम्भा—सर्वथा महाराजः कल्पशतानि पृथिवीं पालयन्भवतु । (सव्वहा महाराओ कप्पसदाइं पुहविं पालअन्तो होदु ।)

सूतः—आयुष्मन् पूर्वस्यां दिशि महता रथवेगेनोपदर्शितः शब्दः ।

इत्यादि । कुमारसंभवेऽपि ' रोमोद्गमः प्रादुरभूदुमायाः ' इत्यादि । सात्त्विकभावाश्च भरतोक्ताः--'स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्यमित्यष्टौ स्तम्भोस्मिन्निष्क्रियाङ्गता । प्रलयो नष्टसंज्ञत्वं शेषाः सुव्यक्तलक्षणाः ॥' इति **रम्भा**--संभावयामः पूजयामः सत्कुर्मः । **यावदिति**--शोभने भ्रुवौ यस्या सा सुभ्रूः । संपर्कं याति समागच्छति । ऋतुरस्याः संप्राप्त आर्तवी ऋतुसम्बन्धिनी । वासंतिकी इति यावत् । श्रीः शोभा लताभिरिव । अनेन तासामकृत्रिमसौहार्दमुर्वशीसमागमे मुखम्लानतानिरासश्च सूचितः । **दिष्ट्या**- इति आनन्दे । ' दिष्ट्या समुपजोषं चेत्यानन्दे ' इत्यमरः । ' दिष्ट्येत्यानन्दने दिष्ट्यापूर्वो वर्धतिरुत्सवे ' इति सागरः । **उर्वशी**--चित्रलेखादत्तहस्ता चित्रलेखया दत्तो हस्तो यस्याः । पीडितं सुदृढं अशिथिलम् । **सूतः**—पूर्वस्यां दिशि यतः सैव देवाधिष्ठानं । तदुक्तं भुवनकोशे ' सद्रत्नकाञ्चनमयं शिखरत्रयं च मेरौ मुरारिकपुरारिपुराणि तेषु ।

---

१ सर्वाः अस्मात्परं साशंसम् इत्यधिकं क्वचित् । २ अस्मात्परं—नेपथ्ये कलकलः ।

अयं च गगनात्कोऽपि तप्तचामीकराङ्गदः ।
अवरोहति शैलाग्रं तडित्वानिव तोयदः ॥ १३ ॥

(पश्यन्त्यप्सरसः ।)

सर्वाः—अहो चित्ररथः । (अम्मो चित्तरहो ।)

(ततः प्रविशति चित्ररथः ।)[1]

चित्ररथः—(राजानं दृष्ट्वा सबहुमानम्) दिष्ट्या महेन्द्रोपकारपर्याप्तेन विक्रममहिम्ना वर्धते भवान् ।

राजा—अये गन्धर्वराज (रथादवतीर्य) स्वागतं प्रियसुहृदे ।

(परस्परं हस्तौ स्पृशतः)[2]

चित्ररथः—वयस्य केशिनो[3] हृतामुर्वशीं नारदादुपश्रुत्य प्रत्याहरणार्थमस्याः शतक्रतुना गन्धर्वसेना समादिष्टा । ततो वयमन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमुपागताः । स भवानिमां पुरस्कृत्य सहास्माभिर्भववन्तं द्रष्टुमर्हति । महत्खलु तत्रभवतो मघोनः प्रियमनुष्ठितं भवता । पश्य ।

तेषामधः शतमखज्वलनान्तकानां रक्षोम्बुपानिलशशीशपुराणि चाष्टौ ॥ ' **अयमिति**—गगनादाकाशात् । तप्तं भासुरं चामीकरं सुवर्णं तस्याङ्गदे बाहुभूषणे यस्य ' चामीकरं जातरूपं महारजतकाञ्चने ' । इत्यमरः । अतएव तडिद्वान्विद्युत्सनाथस्तोयदो मेघ इव कोपि शैलाग्रं अवरोहति अवतरति । **सर्वाः**—' अम्मो ' इत्याश्चर्ये । ' अम्मो अम्मह इत्येतद्विस्मयद्योतनाविधौ । ' इति सागरोक्तेः । **चित्ररथः**-महेन्द्रोपकाराय पर्याप्तेन समर्थेन विक्रममहिम्ना पराक्रमातिशयेन । **राजा**-स्वागतं प्रियसुहृदे इत्यत्र ' चतुर्थी चाशिष्य-' इति चतुर्थी । हस्तौ स्पृशतः—हस्तग्रहो हि मित्रादिसंमीलने समुचिताचारः । तथा च भागवते भागवांस्तत्र बन्धूनां...सर्वेषां मानमादधे ॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः । इति प्रथमस्कन्धे [अ० ११] । समुपेत्याथ गोपाला हास्यहस्तग्रहादिभि. । विश्रान्तं सुखमासीनं पप्रच्छुः पर्युपागताः ' इति । दशमस्कन्धे च । (अ० ६५) **चित्ररथः**-शतक्रतुना इन्द्रेण । शतं क्रतवो यस्य । अश्वमेधशतानुष्ठानादिन्द्रः शतक्रतुरित्युच्यते । अन्तरा मध्ये । चारणेभ्यः कुशीलवाख्येभ्यः स्तुतिपाठकेभ्यः । ' चारणास्तु कुशीलवाः ' इत्यमरः । जयोदाहरणम्—जयख्यापकं प्र-

---

१ प्रविश्य चित्ररथः. २ उपसृत्य, राजाभिमुखः-खं स्थित्वा. ३ केशिना दानवेन.

पुरा नारायणेनेयमतिसृष्टा मरुत्वते ।
दैत्यहस्तादपाच्छिद्य सुहृदा संप्रति त्वया ॥ १४ ॥

राजा––मा मैवम् ।

ननु वज्रिण एव वीर्यमेतद्
विजयन्ते द्विषदो यदस्य पक्ष्याः ।
वसुधाधरकंदराद्विसर्पी
प्रतिशब्दोपि हरेर्भिनत्ति नागान् ॥ १५ ॥

चित्ररथः––युक्तमेतत् । अनुत्सेकः खलु विक्रमालंकारः ।

राजा––सखे नायमवसरो मम शतक्रतुं द्रष्टुम् । अतस्त्वमेवात्रभवतीं प्रभोरान्तिकं प्रापय ।

बन्धुविशेषं । यशः इति केचित् । ' यशो जयोदाहरणम् ' इति हैमः । प्रतापरुद्रस्तु ' येन केनापि तालेन गद्यपद्यसमन्वितम् । जयत्युपक्रमं मालिन्यादिप्रासविचित्रितम् । तदुदाहरणं नाम विभक्त्यष्टाङ्गसंयुतम् ॥ ' इति उदाहरणलक्षणमाह । ' जयोदाहरणं बाह्वोर्गापयामास किन्नरान् । ' इति रघुवंशे । अतिसृष्टा दत्ता । मरुत्वते इन्द्राय । अपाच्छिद्य बलाद्गृहीत्वा । **नन्विति**-नन्ववधारणे । ' ननु प्रश्नेऽप्यनुनयेऽनुज्ञानेऽप्यवधारणे ' । इति विश्वः । अस्य महेन्द्रस्य पक्षे भवाः पक्ष्याः सपक्षा अनुषङ्गिणः शत्रून् विजयन्ते इति यत्तद्वज्रिण एव वीर्यं पराक्रमफलम् । अस्माकं तदनुयायिनां कोपि गुणो नास्ति । अत्रात्मनो महेन्द्रायायित्वसूचनेन विनयातिशयद्योतनादुदात्तालंकारो व्यज्यते । अस्य समानार्थः श्लोकः शाकुन्तले–'सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः सम्भावनागुणमवेहि तमीश्वराणाम् । किंवाऽभविष्यदरुणस्तमसां विभेत्ता तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् ॥ इति । उक्तं दृष्टान्तेन दृढयति–वसुधाधरकन्दराद्विसर्पी वसुधाधरस्य पर्वतस्य कन्दरो दरी तस्माद्विसर्पितुं शीलमस्यासौ विसर्पः प्रसरणशीलः । हरेः सिंहस्य प्रतिशब्दः प्रतिध्वनिरपि नागान् हस्तिनो भिनत्ति विद्रावयति इति यत्तद्धरेरेव वीर्यम् । हिनस्तीति पाठे मारयति । उपजातिश्छन्दः तल्लक्षणम्–' स्यादिन्द्रवज्रा यदि तौ जगौ गः उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ ' इति ॥ **चित्ररथः**—अनुत्सेकः निरभिमानः अनवलेपः । विक्रमालंकारः पराक्रमभूषणम् । अत्र सर्वत्र पराक्रमशौर्यादीनां स्थाने विक्रमशब्दस्यैव योजनाल्लब्धवर्णभङ्गिक्रमादित्य

---

१ अथ. २ अभिसर्पी, शब्दोपि–शब्दो हि इ. पा.

चित्ररथः—यथा भवान्मन्यते । इत इतो भवत्यः ।

(अप्सरसः प्रस्थिताः ।)

उर्वशी—(जनान्तिकम् ।) सखि चित्रलेखे उपकारिणमपि राजर्षिं न शक्नोम्यामन्त्रयितुम् । तत्त्वं मे मुखं भव । (हला चित्तलेहे उवआरिणं पि राएसिं ण सक्कुणोमि आमन्तेदुं । ता तुमं मे मुहं होहि ।)

चित्रलेखा—(राजानमुपेत्य ।) महाराज उर्वशी विज्ञापयति महाराजेनाभ्यनुज्ञातेच्छामि प्रियसखीमिव महाराजस्य कीर्तिं सुरलोकं नेतुमिति । (महाराअ उव्वसी विण्णवेदि—महाराएण अब्भणुण्णादा इच्छामि पिअसहिं विअ महाराअस्स कित्तिं सुरलोअं णेदुं त्ति ।)

राजा—गम्यतां पुनर्दर्शनाय ।

(सर्वाः सगन्धर्वा आकाशोत्पतनं रूपयन्ति)

उर्वशी—(उत्पतनभंगं रूपयित्वा ।) अहो लताविटप एकावली वैजयन्तिका मे लग्ना । (सव्याजं परिवृत्य राजानं पश्यन्ती ।) चित्रलेखे मोचय तावदेनाम् । (अम्मो लदाविडवे एआवली वैअअन्तिआ मे लग्गा । चित्तलेहे मोआवेहि दाव णं ।)

सापह्नवं स्तुतः स्यादिति गम्यते । कालिदासश्च विक्रमादित्येनानुगृहीतस्तस्य संसदमलंचकारेति सुप्रसिद्धो जनवादः । किं त्वयं प्रश्नो वादग्रस्तोऽपि न सम्यङ् निर्णीतः । **राजा**—अवसरः समयः । **उर्वशी**—जनान्तिकम्—तल्लक्षणं दशरूपके-त्रिपताककरेणान्यानपवार्यान्तरा कथाम् । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते त जनान्तिकम् ॥ त्रिपताककरेण ऊर्ध्वं सर्वाङ्गुलं वक्त्रानामिकं त्रिपताकालक्षणं करं कृत्वा इत्यर्थः । ' वञ्चयित्वेवमन्योन्यं द्वाभ्यां यत्खलु पठ्यते । जनान्तिकं तु तत्कार्यं त्रिपताकेन पाणिना ॥ इति सागरोऽपि तल्लक्षणं व्याचष्टे । आमन्त्रयितुमाप्रष्टुम् । मुखं भव मदर्थं तमापृच्छस्व । **चित्रलेखा**—अभ्यनुज्ञाता अनुमोदिता । **उर्वशी**—उत्पतनभङ्गमुत्पतनस्खलितम् । लताविटपे लताशाखायाम् । एकावली वैजयन्तिका आपादलम्बिनी एकसूत्रा मौक्तिकावली । लग्ना आसक्ता । अत्र सव्याजविलम्बेनात्मनोऽनुरागमाविष्कुर्वत्योर्वश्या ' चित्तासङ्गः ' नाम द्वितीयावस्था सूचिता । तथा चोक्तं रतिविलासे अनुरागेङ्गितमित्यधिकृत्य ' विलम्बस्तु पथि व्याजात्परावृत्त्यापि दर्शनम् ' । इति ।

चित्रलेखा—(सस्मितम् ।) दृढं खलु लग्ना । दुर्मोचनीयेव मम प्रतिभाति । भवतु यतिष्ये तावत् । (दिढं क्खु लग्गा । दुम्मोआ विअ मे पडिहादि । होदु जदिस्सं दाव ।)

उर्वशी—(स्मितं कृत्वा) सखि स्मर तावदेतदात्मनो वचनम् । (सहि सुमरेहि दाव एदं अत्तणो व अणं ।)

चित्रलेखा—(मोचनं नाटयति ।)

राजा—(स्वगतम् ।)

प्रियमाचरितं लते त्वया मे गमनेस्याः क्षणविघ्नमाचरन्त्या ।
यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मयाद्य दृष्टा ॥ १६ ॥

सूतः—आयुष्मन् ।

अदः सुरेन्द्रस्य कृतापराधान्
प्रक्षिप्य दैत्यान् लवणाम्बुराशौ ।
वायव्यमस्त्रं शरधिं पुनस्ते
महोरगः श्वभ्रमिव प्रविष्टम् ॥ १७ ॥

चित्रलेखा—दृढं खलु लग्ना इत्यादि परिहासभाषितम् । दुर्मोचनीया मोचयितुं अशक्या । अनेन 'त्वं पुरूरवसि बद्धभावासीति मया ज्ञातं' इति सूचितम् । यतिष्ये मोचयितुं यत्नं करिष्यामि । **उर्वशी**—स्मर तावदात्मनो वचनं 'यतिष्ये तावद' इति । अनेनास्मिन्व्यतिकरे त्वया मम साहाय्यं करणीयमिति सूचितम् । मोचनं नाटयति इति नटमधिकृत्योक्तिः । चित्रलेखा तु मोचयत्येव । **प्रियमिति**—हे लते अस्या गमने क्षणविघ्नं क्षणमात्रं विघ्नं प्रतिबन्धमाचरन्त्या कुर्वत्या त्वया मम प्रियमिष्टमेवाचरितमनुष्ठितम् । यद्यत इयमपाङ्गनेत्रा प्रशस्तापाङ्गेक्षणवती । यद्वाऽपगतमङ्गं यस्यासावपाङ्गो मदनस्तज्जनके नेत्रे यस्यास्तादृशी । परिवृत्तार्धमुखी परिवृत्तमर्धं मुखं यस्यास्तथा सती मयाऽद्य दृष्टा । यद्वा परिवृत्तार्धमुख्यपाङ्गनेत्राऽपाङ्गयोः प्रेरिते नेत्रे यया सा वीक्षितलोचनाभ्यां पश्यन्ती दृष्टा । औपच्छन्दसिकं वृत्तम् । अत्र राज्ञो दृढानुरागो ध्वन्यते । तेनात्र 'बहुलीभूतबीजस्य निश्चयाप्तिरूपतया परितो हृदये न्यसनात् 'परिन्यासः' नाम सन्ध्यङ्गमुक्तम् । अत्रैव गम्यमानसुखोदयस्य स्फुरणात् 'प्राप्तिः' नाम सन्ध्यङ्गमप्युपक्षिप्तम् । **अद इति**—अद इदं वायुर्देवतास्येति वायव्यं ते अस्त्रं सुरेन्द्रस्य कृतापराधान् दैत्यान् केशिनं तदनुयायिनश्च लवणाम्बुराशौ

१ अस्मात्परं—उर्वशी—अलं परिहासेण । मोहावेहीणं । चि०—होदु इ० ।

राजा—तेन ह्युपश्लेषय रथं यावदारोहामि ।

(सूतस्तथेति रथमुपश्लेषयति । राजा नाट्येन रथमारोहति । उर्वशी सनिश्वासं राजानमवलोकयन्ती सह सखीभिर्निष्क्रान्ता चित्ररथश्च ।)

राजा—(उर्वशीमार्गोन्मुखः ।) अहो नु खलु दुर्लभाभिनिवेशी मदनः ।

एषा मनो मे प्रसभं शरीरात्पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गना कर्षति खण्डिताग्रात्सूत्रं मृणालादिव राजहंसी ॥२८॥

(इति निष्क्रान्ताः सर्वे ।)

इति विक्रमोर्वशीये प्रथमोऽङ्कः ।

प्रक्षिप्य शरा धीयन्तेऽस्मिन्निति शरधिर्निषङ्गस्तं प्रविष्टम् । महोरगो महाभुजङ्ग आत्मनः स्वभ्रं बिलमिव । उपजातिश्छन्दः । **राजा**—उपश्लेषय—समीपमानय । दुर्लभाभिनिवेशी दुर्लभ उर्वशीरूपवस्तुनि अभिनिवेशोऽत्याग्रहोऽस्यास्तीति । अप्राप्यवस्तुप्रार्थनैकशील इत्यर्थः । **एषेति**—एषा सुराङ्गनोर्वशी पितुर्नारायणाख्यस्य विष्णोर्मध्यमं पदमाकाशम् ! ' वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ' इत्यमरः । उत्पतन्त्युद्गच्छन्ती सती मे शरीरात्प्रसभं हठात् । ' प्रसभं तु बलात्कारो हठः ' इत्यमरः । कर्षत्युद्धृत्यापहरति । अत्रार्थे उपमामाह—राजहंसी हंसानां राजा राजहंसः । राजदन्तादित्वात्पूर्वनिपातः । तद्वधूः खण्डिताग्राल्लूनाग्रान्मृणालाद्बिसात्सूत्रं तन्तुमिव । अत्र खण्डिताग्रादित्यनेन राज्ञो मनसो मदनशरविद्धत्वं सूचितं तेन च ' चित्तासङ्गः ' नाम द्वितीयावस्थापि सूचितेत्यनुसंधेयम् । ' मनः कर्षति ' इत्यनेन राजोत्कण्ठा देव्यास्तत्परिज्ञानं चेत्याद्यग्रिमाङ्कवस्तुबीजमूचनाद् ' अङ्कावतारः ' नामार्थोपक्षेपकोऽयम् । तल्लक्षणम्—' अङ्कावसाने यत्रैव भाविनोऽङ्कस्य सूच्यते । वस्तुबीजमुपोद्घातैः सोऽङ्कावतार इष्यते' इति । अत्र केषांचित्संध्यङ्गानामनुक्तत्वेऽपि न कापि क्षतिः । तदुक्तम् 'न्यूनमप्यत्र यैः कैश्चिदङ्गैर्नाट्यं न दुष्यति । यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ॥' इति अयं पुरूरवा धीरोदात्तो नायकः । तल्लक्षणमाह दशरूपककृद्—'महासत्वोऽतिगंभीरः क्षमावानविकत्थनः । स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः ॥' इति । तस्य साधारणनायिकायामुर्वश्यामभिलाषो न दोषायोर्वश्या दिव्यत्वात् । यथोक्तं वसन्तराजीये—' या काचिन्नायिका राज्ञः सा दिव्या स्यान्न भौमिका' ॥ इति । साधारणनायिकालक्षणं दशरूपके—'साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक्' । इति । इममेव विषयमधिकृत्योक्तं भरतसूत्रे—'दिव्यवेश्याङ्गनायाश्च राज्ञा भवति संगमः । वाच्यापि वेश्या साप्यत्र यथैव कुलजा

---

१ दुर्लभाभिलाषी । इ. पा.

द्वितीयोऽङ्कः ।



(ततः प्रविशति विदूषकः ।)

विदू०—हो हो भोः निमन्त्रणिकः परमान्नेनेव राजरहस्येन

तथा । यदा मानुषसंयोगो दिव्यानां योषितां भवेत् । तदा सर्वत्र कर्तव्या ये भावा मानुषाश्रयाः ॥ शापभ्रंशात्तु दिव्यानामङ्गनानां यदा भवेत् । मानुषैः सह संयोगस्तदैवमुपसर्पणम् ॥ पुष्पैर्भूषणजैः शब्दैरदृश्या सा विलोभयेत् । पुनः संदर्शनं दत्वा क्षणादन्तर्हिता भवेत् ॥ दिव्याभरणमाल्याद्यैर्लेखसंप्रेषणैरपि । ईदृशैरभ्युपगमैः समुन्माद्यस्तु नायकः ॥ उन्मादनात्समुत्पन्नः कामो रतिकरो भवेत् । स्वभावोपगतो लोके नात्यर्थं भावितस्तथा ॥ ये भावा मानुषाणां तु यद्गतं यच्च चेष्टितम् । तत्सर्वं मानुषान्प्राप्य कर्तव्यं देवतैरपि ॥ ' इति एतत्सर्वं परस्ताद्यथायथमूहनीयम्। **इति निष्क्रान्ताः सर्वे**–बीजार्थं युक्तियुक्तं कृत्वा निष्कामो भवति । यदाह– 'बीजार्थं युक्तियुक्तं च कृत्वा कार्यं यथारसम् । निष्क्रामं तत्र कुर्वीत सर्वेषां रङ्गवर्तिनाम् ॥ ' इति । प्रथमोऽङ्कः–अङ्कलक्षणमादिभरते–' अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् । नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्कः । यत्रार्थस्य समाप्तिर्यत्र च बीजस्य भवति संहारः । किंचिदवलग्नबिन्दुः सोऽङ्क इति सदावगन्तव्यः ॥ ये नायका निगदितास्तेषां प्रत्यक्षचरितसंयुक्तः । नानावस्थान्तरितः कार्यस्त्वङ्को यथार्थरसः ॥ ' इति । साहित्यदर्पणे च–' प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः । भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः । विच्छिन्नावान्तरैकार्थः किंचित्संलग्नबिन्दुकः । युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान्न च ॥ नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । आनन्त्यकानां कार्याणामविरोधाद्विनिर्मितः ॥ नानेकदिननिर्वर्त्यकथया संप्रयोजितः । आसन्ननायकः पात्रैर्युक्तस्त्रिचतुरैस्तथा ॥ दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ॥ विवाहो भोजनं शापोत्सर्गो मृत्यू रतं तथा ॥ दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत् । शयनाधरपानादि नगराद्युपरोधनम् ॥ स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः । देवीपरिजनादीनाममात्यवणिजामपि ॥ प्रत्यक्षचित्रचरितैर्युक्तो भावरसोत्तरैः । अन्ते निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः ॥' इति श्रीमद्विक्रमोर्वशीयटीकायामर्थप्रकाशिकायां प्रथमोऽङ्कः ॥

कविरिदानीमङ्कान्तरमारभमाणो भाव्यर्थसूचनार्थमर्थोपक्षेपकं प्रवेशकं तावत्प्रस्तौति—**तत** इति । प्रवेशकलक्षणमग्रे । **विदूषकः**—विदूषकलक्षणं सुधा-

---

२ अविदाविद भोः इति । णिमन्तणेक्कपरवसो बम्हो । इति च पा.

स्फुटन्न शक्नोम्याकीर्णे आत्मनो जिह्वा रक्षितुम् । तद्यावत् तत्रभवान्वयस्यः कार्यासनादुत्तिष्ठति तावदेतस्मिन्विरलजनसंपाते विमानपरिच्छन्दपरिसरे स्थास्यामि । (हीं हीं भो णिमन्तणिओ परमण्णेण विअ राअरहस्सेण पुट्ठमाणो ण सक्कुणोमि आइण्णे अत्तणो जीहं रक्खिदुं । ता जाव तत्तभवं वअस्सो कज्जासणादो उट्ठेदि दाव इमस्मिं विरलजणसंवादे विमाणपडिच्छन्दपरिसरे चिट्ठिस्सम् ।)

(परिक्रम्य तत्र स्थितः ।)

(ततः प्रविशति चेटी ।)

चेटी—आज्ञप्तास्मि देव्या काशीराजपुत्र्या यथा—हञ्जे निपुणिके यतःप्रभृति भगवतः सूर्यस्योपस्थानं कृत्वा प्रतिनिवृत्त आर्यपुत्रस्तत आरभ्य शून्यहृदय इव लक्ष्यते । तत्तस्य प्रियवयस्यादार्य-

---

करे–'विकृताङ्गवचोवेषैर्हास्यकारी विदूषकः । ' इति । साहित्यदर्पणकारोप्याह—'कुसुमवसन्ताद्याभिधः कर्मवपुर्वेषभाषाद्यैः । हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः ॥ ' इति । 'वयस्यकश्चाटुपटुः स एव च विदूषकः । अन्तःपुरचरो राज्ञां नर्मामात्यः प्रकीर्तितः ॥' इति सागरोपि तल्लक्षणं जगाद । अस्य प्राकृतं पाठ्यम् । उक्तं च--'विदूषकविटादीनां पाठ्यं तु प्राकृतं भवेत् ' । इति । हीहीति विदूषकहर्षसूचको निपातः । ' हीहीं वैदूषकः ' इत्युक्तत्वात् । रङ्गनाथस्तु ' अविदाविद भोः' इति पठित्वा ' अदृष्टाश्रुतसप्राप्तवविदाविदभोः पदम् ' । इति सागरमुदाहरति । निमन्त्रणिको भोजनायामन्त्रितो ब्राह्मणादिः परमान्नेन मिष्टान्नेन पायसादिनेव । स यथा कण्ठक्षीरभोजनेन स्फुटदुदर इव लक्ष्यते तथेति हास्योत्पादनार्थमुक्तिः । आकीर्णे जनसंमर्दे । णिमन्तणैक्कपरवसो वह्मणो विअ [निमन्त्रणैकपरवशो ब्राह्मण इव] इति पाठो न साधुः । तस्य हास्यानुत्पादकत्वात् । अस्यायमर्थः--परस्य वशः परवशो निमन्त्रणमेवैकं मुख्यं तेन परवशः निमन्त्रणैकपरवशः । यथा कश्चिद्ब्राह्मण एकत्र भोजनामन्त्रणं गृहीत्वान्यत्र स्वादुतरमिष्टान्नसंभवं दृष्ट्वा तदाकृष्टोपि गृहीतामन्त्रणपारतन्त्र्यादन्यत्र गन्तुं न शक्नोति तथाहमपि राजरहस्यगोपनैकपरवशः सन्नाकीर्णे जिह्वां रक्षितुमपारयन्नपि तद्रहस्यं वक्तुं न शक्नोमि इति । अन्यथाव्याख्याने ' परवश ' शब्दस्यास्वारस्यापत्तेः । कार्यासनात् व्यवहारासनात्' विमानपरिच्छन्द इति प्रासादनाम । परिसरः ' पर्यन्तभूः परिसरः ' इत्यमरः । **चेटी**...देव्या देवी कृताभिषेकाग्रमहिषी । ' देवी कृताभिषेकायाम् ' इत्यमरहेमचन्द्रौ । हञ्जे इत्यनेन प्रेष्या वाच्या । 'समा हलेति प्रेष्या च हञ्जे वेश्याज्जुका

माणवकाज्जानीहि तावदस्योत्कण्ठाकारणमिति । तत्कथं खलु मया स ब्रह्मबन्धुरतिसंधेयः । अथवा विरलतृणाग्रलग्नमिवाश्यायसलिलं चिरं न तस्मिन् राजरहस्यं तिष्ठति । यावदेनमन्विष्यामि । (परिक्रम्य अवलोक्य च ।) एष खलु आलिखितो वानर इव किमपि तूष्णींभूत आर्यमाणवकस्तिष्ठति । यावदेनमुपसर्पामि । (उपसृत्य ।) आर्य वन्दे । (आणत्तह्मि देवीए कासिराअपुत्तीए जधा हञ्जे णि उणिए जदोपेहुँदि भअवदो सुज्जस्स उवत्थाणं करिअ पडिणीवुत्तो अज्जउत्तो तदो आरहिअ सुण्णहिअओ विअ लक्खीअदि । ता तस्स पिअवअस्सादो अज्जमाणवआदो जाणाहि दाव से उक्कण्ठाकालणं त्ति । कहं खु मए सो बह्मबन्धू अहिसंधेओ । अहवा विरलतणग्गलग्गां विअ अवस्साअसालिलं चिर ण तस्सिं [1]राअरहस्सं चिट्ठदि । जाव णं अण्णेसामि । एसो क्खु [2]आलिहिदो वाणरो विअ विं.पि तुण्हिभूदो अज्जमाणवओ चिट्ठदि । जाव णं उवसप्पामि । अज्ज वन्दामि ।)

तथा । इति दशरूपकम् । 'हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ।' इत्यमरश्च। आर्यपुत्र आर्यस्य श्वशुरस्य पुत्र इति भर्तामिधीयते । शून्यहृदयः शून्यं कस्यापि विषयस्य चिंतापरतया स्वविषयपरिच्छेदासमर्थं हृदयं चित्तं यस्य । माणवकं इति विदूषकनाम । उत्कण्ठाकारणम्--उत्कठा उत्कलिका कामादिजन्या स्मृतिरिति यावत् । 'चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्नभिध्या तूभयोरपि ॥' इति शब्दार्णवः । अत्रोत्कण्ठास्वरूपं । तदनुभावाश्च भावप्रकाशिकायाम्--' सर्वेन्द्रियसुखास्वादो यत्रास्ते हि मनः स्त्रियाम् । तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः ॥ अन्तःसंभोगसंकल्पस्तत्तदाशावलोकनम् । अङ्गम्लानिर्मनोरक्तिर्मनोरथविचिन्तनम् ॥ अधिजानुभुजालम्बिकपोलतलमासनम् । प्रसन्नमुखरागश्च स्वेदोष्मा गद्गदा च वाक् ॥ उत्कण्ठानुभवा भावाः कथ्यन्ते भावकोविदैः ॥' इति । ब्रह्मबन्धुरिति साधिक्षेपं वचः । ' ब्रह्मबन्धुरधिक्षेपे निर्देशे च द्विजन्मनाम् ।' इति विश्वः । ब्रह्म ब्राह्मणजातिर्बन्धुरस्य केवलं जात्यैव ब्राह्मण इत्यर्थः । अतिसंधेयो वञ्चनीयः । अवश्यायसलिलमिव नीहारवारीव । ' अवश्यायो हिमे दर्पे सततार्जनकर्मणि । इति विश्वलोचनः । हिमजलबिन्दुर्यथा क्षणं तृणाग्रे स्थित्वा तस्मात्प्रच्युतो

१ रहस्सं. २ आलेल्लवाणरो.

विदूषकः—स्वस्ति भवत्यै (आत्मगतम् ।) इमां दुष्टचेटिकां दृष्ट्वा तद्राजरहस्यं हृदयं भित्त्वा निष्क्रामतीव । (प्रकाशकम् ।) निपुणिके संगीतव्यापारमुज्झित्वा क्व प्रस्थितासि । (सत्थि भोदीए । इमं दुट्ठचेडिअं पेक्खिअ तं राअरहस्सं हिअअं भिन्दिअ णिक्कमदि विअ । णिउणिए संगीदवावारं उज्झिअ कहिं पत्थिदा सि)

निपुणिका—देव्या वचनेनाचार्यमेव द्रष्टुम् । (देवीए वअणेण अज्जं एव्व पेक्खिदुं ।)

विदूषकः—किं तत्रभवत्याज्ञापयति । (किं तत्तहोदी आणवेदि ।)

निपुणिका—देवी भणति सदाप्यार्यो मयि पक्षपाती न मामनुचितवेदनादुःखितामुपेक्षते इति । ([1]देवी भणादि सदावि अज्जो मइ पक्खवादी ण मं अणुइदवेअणादुक्खिदं उवेक्खदित्ति ।)

विदूषकः—(सवितर्कम् ।) किं वा प्रियवयस्येन तत्रभवत्याः प्रतिकूलमाचरितम् । (किं वा पिअवस्सेण तत्तभोदीए पडिऊलं आचरिदं ।)

निपुणिका—आर्य यन्निमित्तं भर्तोत्कण्ठितस्तस्याः स्त्रिया नामधेयेन भर्त्रा देव्यालपिता । (अज्ज जंणिमित्तं भट्टा उक्कण्ठिदो ताए इत्थिआए णामधेएण भट्टिणा देवी आलविदा ।)

विदूषकः—(स्वगतम् ।) कथं स्वयमेव तत्रभवता रहस्यभेदः

भवति तथा इत्यर्थः । आलिखितश्चित्रे निवेशितः । किमपि केनापि कारणेन । **विदूषकः**—स्वस्ति भवत्यै 'नमःस्वस्ति'—इत्यादिना चतुर्थी । संगीतव्यापारं संगीते व्यवसायम् । **निपुणिका**—मयि पक्षपाती ममानुकूलकारी इत्यर्थः । अनुचिता या वेदना तया दुःखिताम् । यद्वाऽनुचितस्य श्रोतुमयुक्तस्य या वेदना ज्ञानं तेन दुःखिताम् । इयं साभिप्राया चाटूक्तिर्विदूषकप्रतारणायैवेति बोध्यम् । 'अनुभूतवेदनां सुदुःखिताम् ।' इति काटयवेमः पठति । रङ्गनाथस्तु 'आर्यस्य ममोपरि अदाक्षिण्यं' इति पाठं गृहीत्वा 'अदाक्षिण्यमननुकूलता' इति व्याख्याति । **निपुणिका**—यन्निमित्तं यस्याः कारणात् । उत्कण्ठा अस्य संजाता स उत्कण्ठितः । नामधेयेन—नाम्ना । 'रूपनामभागेभ्यो धेयः' इति धेयप्रत्ययः । आलपिता सम्बोधिता । **विदूषकः**—जिह्वायन्त्रणेन यन्त्रणं निग्रहः । वाक्संयमेन

---

१ अज्ज देवी; देवी भणादि जधा—अज्जस्स मम उअरि अदक्खिण्णं । ण मं अणुइदवेअणादुक्खिदं अवलोअदित्ति । इ. रंगनाथः पठति ।

कृतः किमिदानीमहं जिह्वायन्त्रणेन दुःखमनुभवामि । (प्रकाशम् ।) किम् आमन्त्रिता । तत्रभवती उर्वशीति । तस्या अप्सरसो दर्शनेन उन्मादितस्तत्रभवान् न केवलं तत्रभवतीं मामपि विनोदविमुखो दृढं पीडयति । (कहं सअं एव्व तत्तभवदा रहस्सभेदो किदो । किं दाणिं अहं जीहाजन्तणेण दुक्खं अणुहवामि । किं आमन्तिदा तत्तहोदी उव्वसित्ति । ताए अच्छराए दंसणेण उम्मादिदो तत्तभवं ण केवलं तत्तभोदिं मपि विणोदविमुहो दिढं पिडेदि ।)

निपुणिका—(आत्मगतम् ।) कृतं मया भेदनं भर्तू रहस्यदुर्गस्य । (प्रकाशकम् ।) आर्य किं तावद्देव्यै निवेदयामि । (किदं मए भेअणं भट्टिणो रहस्सदुग्गस्स । अज्ज किं दाव देवीए णिवेदेमि ।)

विदूषकः—निपुणिके विज्ञापय तत्रभवतीम् । यते तावन्मृगतृष्णिकाया निवर्तयितुं वयस्यम् । ततो देव्या मुखं द्रक्ष्यामीति । (णिउणिए विण्णवेहि तत्तभोदिं । जदामि दाव मिअतिण्हिआदो णिवत्तेदुं वअस्सं । तदो देवीए मुहं पेक्खिस्सं ति ।)

निपुणिका—यदार्य आज्ञापयति । (जं अज्जो आणवेदि ।)

(इति निष्क्रान्ता ।)

इत्यर्थः । कथनौत्सुक्येपि रहस्यरक्षाया आवश्यकत्वाद्दुःखम् । उन्मादितो मत्तः । यद्वा कामादिमूढचित्तः । तदुक्तं साहित्यदर्पणे–' चित्तसंमोह उन्मादः कामशोकभयादिभिः ।' इति । विनोदविमुखः विनोदस्य विहारस्य विमुख पराङ्मुखः कुत्रापि रतिमकुर्वन्नित्यर्थः । ' विनोदपराङ्मुखः ' इत्यत्र ' अशितव्यविमुखं ' इति रङ्गनाथः पठति । तत्र अशितव्यस्य खाद्यस्य विमुखो यथा तथेत्यव्ययीभावः । ' अशितव्याविमुखः ' इत्यपि रङ्गनाथोद्धृतः पाठः । **निपुणिका**—रहस्यदुर्गं तस्य । दुरवगमं भर्तू रहस्यं ज्ञातमिति यावत् । **विदूषकः**—तावत् प्रथमम् । यद्वा सकलेन सामर्थ्येन । ' यावत्तावच्च साकल्ये ' इत्यमरः । मृगतृष्णिकाया दुःसम्पाद्यादर्थात् । ' परिसन्तह्मि ' इत्यादिपाठस्त्वसाधुः । मम पक्षपाती भवान्मदर्थं

---

१ निपुणिके विज्ञापय मम वचनेन काशिराजदुहितरम् । परिश्रान्तोस्म्येतस्या मृगतृष्णिकाया वयस्यं निवर्तयितुम् । यदि भवत्या मुखकमलं प्रेक्षिष्यते ततो निवर्तिष्यते इति । (णिउणिएँ विण्णवेहि मम वअणेन कासिराअदुहिदरम् । परिस्सन्तह्मि इमाए मिअतिण्हिआए वअस्सं णिअत्तावेदुम् । जइ भोदीए मुहकमलं पेक्खिवसादि तदो णिअत्तिस्सदित्ति ।) इ. पा.

(नेपथ्ये वैतालिकः ।)

जयतु जयतु देवः ।

आलोकान्तात्प्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव दिनकृतश्चाधिकारो मतो नः ।
तिष्ठत्येष क्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे भागे त्वमपि दिवसस्यात्मनश्छन्दवर्ती ॥ १ ॥

तेरतेत्याशंसे इति चेटीमुखेन ब्रुवत्यै राज्ञ्यै नाहं किमपि कर्तुं शक्त इत्यार्यार्थकस्य विदूषकप्रतिसंदेशस्यासमञ्जसत्वात् । **नेपथ्ये**—वैतालिकः विविधेन तालेन चरतीति । ' चरति ' इति ठक् । विविधस्तालः प्रयोजनमस्य इति वा ठक् । बोधकरः । जयतु विजयेन वर्धताम् । **आलोकान्तादिति**—लोकस्य भुवनस्यान्तो लोकान्तस्तस्मादा तमभिव्याप्य । राज्ञो दिनकृतश्च दिगन्तव्यापिप्रतापवत्वात् । आसां प्रजानां जनानां प्राणिनां च प्रतिहता निरस्ता तमसस्तमोगुणस्य ध्वान्तस्य च वृत्तिर्व्यापारो येन स तथोक्तः । राज्ञः पक्षे विनयादिशिक्षया दिनकृत्पक्षे तेजोव्यापारेण च । यद्वा आलोकान्तादर्शनमात्रात् । ' अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः ' । इति हेमचन्द्रः । राज्ञोतिधर्मशीलत्वाद्दिनकरस्य देवतात्मकत्वादुभयोरपि पावकत्वम् । स्मर्यते च ' अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्सदा बुधः ॥ ' इति । तथा च रघुवंशे सप्तदशसर्गे–' दुरितं दर्शनेन ध्वंस्तत्त्वार्थेन नुदंस्तमः । प्रजाः स तन्त्रयांचक्रे शश्वत्सूर्य इवोदितः ॥ ' इति । तव दिनकृतश्चाधिकारो नियोगस्तुल्यः समान उद्योगो व्यापारो यस्य तादृशः नो मनः । तथाहि । एष ज्योतिषामधिपतिः सूर्यः क्षणं व्योममध्य आकाशमध्यदेशे तिष्ठति विश्राम्यति । मध्याह्नसमय इत्यर्थात् । त्वमपि दिवसस्याष्टधा विभक्तस्य षष्ठे भाग आत्मनश्छन्दवर्ती स्वेच्छानुसारतस्तिष्ठसि । तत्कालव्ययस्य शास्त्रनियमातन्त्रत्वात् । अत्रेयं व्यवस्था–राज्ञा दिवसमष्टधा विभज्य तत्र प्रथमे भागेऽग्निहोत्रब्राह्मणतर्पणादि कर्तव्यम् । अनन्तरं व्यवहारसभा प्रवेष्टव्या । तदुक्तं मनुना–' उत्थाय चरमे यामे कृतशौचः समाहितः । हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥ ' तदन्तरं भागत्रयं व्यवहारकालः । तदुक्तम् ' दिवसस्याष्टमं भागं मुक्त्वा भागत्रयं तु यत् । स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥ ' इति । व्यवहारदर्शनानन्तरं स्नानभोजनादि कर्तव्यम् । यदाह याज्ञवल्क्यः–' व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः । ' इति । अनन्तरकालकर्तव्यमाह मनुः–' भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह । विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत् ॥ ' इति । षष्ठे स्वैरविहारो मन्त्रो वा

---

१ च सवितुः. २ षष्ठे काले त्वमपि लभसे देव विश्रान्तिमह्नः । इ० पा०.

विदूषकः—(कर्णौ दत्त्वा) एष कार्यासनादुत्थित इत एवागच्छति वयस्यः । यावदस्य पार्श्ववर्ती भवामि । (एसो कज्जासणादो उट्ठिदो इदो एव्व आअच्छदि ता अहं से पासवत्ती होमि । (इति निष्क्रान्तः ।)

(प्रवेशकः ।)

(ततः प्रविशति उत्कण्ठितो राजा विदूषकश्च ।)

राजा—

आ दर्शनात्प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम् ।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन ॥ २ ॥

सेव्यः । सोऽस्यैतावान्स्वैरविहारकालो यस्य तिस्रस्त्रिपादोत्तरा नाडिकाः । इति नीतिविदश्च । मन्दाक्रान्ता छन्द. । तल्लक्षणम्—' मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तादुरू चेत् ।' इति । **प्रवेशकः**—वक्तव्यस्य बाहुल्याद्रसभङ्गप्रसङ्गेनाधमपात्रोक्त्या प्रवेशकः क्रियते । यदाह ' यस्तु प्रयोगबाहुल्यादङ्कैर्न समाप्यते । बहुवृत्तान्तोल्पकथैः स विधेयः प्रवेशकैः । अङ्कानामन्तरालेषु संक्षिप्तार्थप्रयोजनैः । भृत्यवर्गेण कथाबद्धो विज्ञेयोऽयं प्रवेशकः ॥ ' इति । प्रवेशके बाहुल्यात्सौरसेनी प्रयोक्तव्येति—' हीनाभ्यमेव पात्राभ्यामङ्कादौ यः प्रवर्तते । प्रवेशकः स विज्ञेयः शौरसेन्यादिभाषया ॥ ' इति वेणीसंहारटीकायां जगद्धरोद्धृताद्भरतश्लोकाद्गम्यते । प्रवेशकलक्षणं सुधाकरे—' यन्नीचैः केवलं पात्रैर्भाविभूतार्थसूचनम् । अङ्कयोरुभयोर्मध्ये स विज्ञेयः प्रवेशकः ॥' इति । अत्र रङ्गनाथव्याख्या यथा—" उक्तं च धनिकेन—' तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः । अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥ ' इति । तद्वदेवेति विष्कम्भकलक्षणोक्तं भूतभविष्यदर्थज्ञापकत्वं संक्षिप्तार्थत्वं चात्रातिदिश्यते । अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य निषेधः । यद्यपि चात्राङ्कद्वयस्यान्तरित्यविशेषेण प्रथमान्त्याङ्कयोः प्रवेशकनिषेधोऽवगम्यते तथापि शेषाङ्के सर्वत्र तद्दर्शनात्प्रथमाङ्क एव केवलमस्य निषेध एतल्लक्षणकृतामभिप्रेतः । तथा च देवपाणिविरचितदशरूपकटीकायां साहसाङ्कीयटीकासंमतिरपि—' नासूचितस्य पात्रस्य प्रवेशः क्वचिदिष्यते । प्रवेशं सूचयेत्तस्मादमुख्याङ्के प्रवेशकात् ॥ मुख्याङ्कः प्रथमाङ्कः । एतेन मुख्याङ्केतराङ्के प्रवेशको बोद्धव्य इति । वस्तुतस्तु प्रवेशकोत्तरभाविनो ग्रन्थस्याङ्कशब्दवाच्यत्वादन्त्याङ्केप्यस्याङ्कद्वयान्तर्वर्तित्वं घटत एवेति युक्तः प्रथमाङ्कमात्रेऽस्य निषेध इत्यलं पल्लवलीलया ॥ ' इति । उत्कण्ठितः—विरहवेदनाविधुर इत्यर्थः । उत्कण्ठालक्षणमुक्तं प्राक् । **आदर्शनादिति**—सा सुरलोकसु-

---

१ धम्मासनसमुत्थिदो । इ. पा.

विदूषकः—(आत्मगतम् ।) संपीडिता खलु तावत्तपस्विनी काशीराजपुत्री । (संपीडिदा खु दाव तवस्सिणी कासिराअउत्ती ।)

राजा—अपि रक्ष्यते रहस्यनिक्षेपः ।

विदूषकः—(सविषादमात्मगतम् ।) हा धिक् हा धिक् अभिसंहितोऽस्मि दुष्टदास्या । अन्यथा न खलु वयस्य एवं पृच्छेत् । (हध्धी हध्धी अहिसंधिदोह्मि दुट्ठदासीए । अण्णधा ण खु वअस्सो एवं पुच्छांद ।)

राजा—(साशङ्कम् ।) किं भवांस्तूष्णीमास्ते ।

विदूषकः—एवं मया नियन्त्रिता जिह्वा यद्भवतोपि सहसा प्रतिवचनं न ददामि । (एव्वं मए णिअन्तिदा जीहा जं भवदोवि सहसा पडिवअणं ण देमि ।)

राजा—युक्तम् । अथ केदानीमात्मानं विनोदयेयम् ।

विदूषकः—महानसं गच्छावः । (महाणसं गच्छह्म ।)

राजा—किं तत्र ।

न्दरी अप्रतिमलावण्यवती दिव्याङ्गनाऽवन्ध्यपातेनावन्ध्यः सफलो लक्ष्यभेदक इति यावत् । पातः पतनं यस्य तेन । मकरः केतौ केतुर्वा यस्य तस्य मकरकेतोः कामस्य बाणेन कृतमार्गं विद्धं मे हृदयमा दर्शनात्प्रविष्टास्ति । तत्र चिरवासं करोतीति यावत् । अत्र शृङ्गारालम्बनस्य राज्ञः स्मृत्यायवस्थास्तत्र तत्र यथा यथमूह्याः । इत आरभ्य बिन्दुप्रयत्नयोः समन्वयरूपः प्रतिमुखसन्धिः । तल्लक्षणं साहित्यदर्पणे—' फलप्रधानोपायस्य मुखसन्धिनिवेशिनः । लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ॥ ' स चात्रोवशपुरूरवसः समागमहेतोरनुरागबीजस्य पूर्वाङ्कोपक्षिप्तस्य चित्रलेखाविदूषकाभ्यां ज्ञायमानतया किंचिल्लक्ष्यस्य देव्या च चेटीद्वारा किंचिदुन्नीयमानस्योद्भेदरूपः । बिन्दुप्रयत्नयोर्लक्षणे यथादिभरते—' प्रयोजनानां विच्छेदे यदविच्छेदकारणम् । यावत्समाप्तिं बन्धस्य स बिन्दुरिति संज्ञितः ॥ ' इति । यथात्रोर्वश्यादिगमनेन विच्छेदे सति ' आदर्शनात्प्रविष्टा ' इत्यादिना । ' अपश्यतः फलप्राप्तिं यो व्यापारः फलं प्रति । परं चौत्सुक्यगमनं प्रयत्नः स प्रकीर्तितः ॥ ' इति । यथात्र ' राजा—तदुपायश्चिन्त्यतां येन सफलप्रार्थनो भवेयम् । " इति । **विदूषकः**—तपस्विनी वराकीत्यनुकम्पावचनम् । **राजा**—रहस्यनिक्षेपो रहस्यमेव निक्षेपः । **विदूषकः**—अ-

---

१ भो महा०.

विदूषकः—तत्र पञ्चविधस्याभ्यवहारस्योपनतसंभारस्य योजनां प्रेक्षमाणाभ्यां शक्यमुत्कण्ठा विनोदयितुम् । (तहिं पञ्चविहस्स अब्भवहारस्स उवणदसंभारस्स जोअणं पेक्खमाणेहिं सक्कं उक्कण्ठा विणोदेदुं ।)

राजा—(सस्मितम् ।) तत्रेप्सितसंनिधानाद्भवान्रंस्यते । मया खलु दुर्लभप्रार्थनः कथमात्मा विनोदयितव्यः ।

विदूषकः—ननु भवांस्तत्रभवत्या उर्वश्या दर्शनपथं गतः । (णं भवं तत्तहोदीए उव्वसीए दंसणपहं गदो ।)

राजा—ततः किम् ।

विदूषकः—न खलु सा दुर्लभेति समर्थये । (ण क्खू सा दुल्लहेत्ति समत्थेमि ।)

राजा—पक्षपातोऽयमवधार्यताम् ।[1]

विदूषकः—एतावन्मन्त्रयमाणेन भवता वर्धितं मम कौतूहलम् । किं तत्रभवत्युर्वश्यहमिव विरूपतयाद्वितीया रूपेण । (एत्तिअं मन्त-

भिसंहितः प्रतारितः । महानसं पाकस्थानम् । **विदूषकः**—पञ्चविधस्य पञ्च विधाः प्रकारा भक्ष्यभोज्यलेह्यचोष्यपेयभेदाद्यस्य । अभ्यवहारस्यान्नस्य । उपनताः संभाराः सामग्री यस्य । योजनां संविधानमुपकरणद्रव्यैः संयोगमिति वा । 'शक्यं च श्वमांसादिभिरपि क्षुन्प्रतिहन्तुम्' इति महाभाष्यकारप्रयोगादुत्कण्ठा विनोदयितुं शक्यमित्यत्र शक्यमित्यनेनोत्कण्ठाया भिन्नलिङ्गस्य सामानाधिकरण्यं साधु । तथा च वामनसूत्रम् 'शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात् ।' इति 'शक्या' इति च पाठः 'बलवतीमुत्कण्ठाम्' इत्यपि पाठः । **राजा**—ईप्सितस्य इष्टस्य मिष्टान्नस्य । **दुर्लभप्रार्थनो** दुर्लभं प्रार्थनं यस्य । **विदूषकः**—ननु भवानित्यादि । त्वादृशोनुपमसौन्दर्यवान्पुरुषस्तस्या दर्शनपथं गतश्चेद् ध्रुवं तयापि त्वयि बद्धभावया भवितव्यमिति विदूषकस्य भावः । ननुरत्र प्रश्नार्थकोऽवधारणार्थको वा । **राजा**—पक्षपातोऽयं तवास्माकं यस्त्वामेवं वादयत्यन्यथोर्वश्येवानुपमलावण्यवती नाहं तस्याः षोडशीमपि कलां स्पृशाम्यतः सा मयि बद्धभावा भवेदिति दूरापेतमिति राज्ञो भावः । अत्र समानार्थं वचनं शाकुन्तले 'सर्वः कान्तमात्मीयं पश्यति' इति । **विदूषकः**

१ बलवंदी इ. त्य. २ भो पक्ष०; पक्षपातादृते तन्नावदव०.

अन्तेण भवदा विड्ढदं मे कोदूहलं । किं तत्तभोदी उव्वसी अहं विअ विरुवदाए अदुदीआ रुवेण ।)

राजा—माणवक प्रत्यवयवमशक्यवर्णनां तामवेहि । समासतः श्रूयताम् ।

विदूषकः—अवहितोस्मि । (अवहिदो ह्मि ।)

राजा—

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥ ३ ॥

विदूषकः—अतः खलु भवता दिव्यरसाभिलाषिणा चातकव्रतं गृहीतम् । (अदो खु भवदा दिव्यरसाहिलासिणाचादअव्वदं गहिदं ।)

राजा—विविक्तादृते नान्यदुत्सुकस्य शरणमस्ति । तद्भवान्प्रमदवनमार्गमादेशयतु ।

विदूषकः—(आत्मगतम्) का गतिः । (प्रकाशम् ।) इत

अहमिव विरूपतया विदूषकस्य कुरूपत्वं प्रसिद्धम् हास्यजननार्थमिदं वचः । तदुक्तं-'हास्यकृच्च विदूषकः' इति । **राजा**-'माणवक' इति विदूषकनाम । प्रत्यवयवमवयवशः । अशक्यवर्णनां तस्या रूपं वर्णयितुं न शक्यम् । अतः समासतः संक्षेपतः । **आभरणस्येति**-सखे तस्या उर्वश्या वपुराभरणस्य मुक्ताहारादेराभरणं मण्डनम् । तस्या वपुःप्रकर्षोऽलंकारणामपि शोभां पुष्यतीति भावः । प्रसाधनं प्रतिकर्म कुङ्कुमतिलकचन्दनचर्चादिना शरीरशोभासम्पादनं तस्य विधिः करणं तस्य प्रसाधनविशेष उत्कृष्टं प्रसाधनम् । प्रसाधनं तस्या वपुषः शोभां न सम्पादयति किंतु स्वयमेव तच्छरीरसम्पर्कान्निरतिशयां श्रियं लभत इति भावः । उपमानस्य चन्द्रादेरपि प्रत्युपमानम् । वपुःशब्देनात्र मुखाद्यवयव लक्ष्यन्ते । उपमानं ह्युपमेयापेक्षयाधिकगुणं भवति । तस्या मुखाद्यपेक्षया हीनगुणाश्चन्द्रादय उपमानभावं जहत उपमेयतां प्रपद्यन्त इति भावः । प्रतीपमलंकारः । **विदूषकः**-दिव्यरसाभिलाषिणा दिव्याङ्गनानुरागप्रणयिना । चातकपक्षे दिव्यरसो वृष्टिजलम् । चातको यथा मेघवारि विहाय नान्यज्जलं पिबति तथा भवानपि तामेवानुदिवसं ध्यायन्न कुत्रापि निर्वृतिं लभत इति भावः । 'रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधातुम्बुपारदे' ॥ इति विश्वः । 'दार्वीघाटोऽथ शारङ्गः स्तोककश्चातकः समाः ।' इत्यमरः । अतःपरं

१ 'ता दवा तुमंकहिं पत्थिदो' 'कहिं दाणिं पत्थिदो (प्रस्थितः)' इत्यधिकम्।

इतो भवान् । (परिक्रम्य ।) एतेन प्रमदवननोदितेनेव प्रत्युद्गतो भवानागन्तुको दक्षिणमारुतेन । (का गदी इदो भवं । एदेण पमदवणनोदिदेण विअ पच्चुग्गदो भवं आअन्तुओ दक्खिणमारुदेण ।)

राजा—(विलोक्य ।) उपपन्नमिदं विशेषणमस्य वायोः । अयं हि

निषिञ्चन् माधवीमेतां लतां कौन्दीं च नर्तयन् ।
स्नेहदाक्षिण्ययोर्योगात्कामीव प्रतिभाति मे ॥ ४ ॥

' तत्तावत्त्वं कुत्र प्रस्थितः ' इत्यधिकं केचित्पठन्ति । **राजा**—विविक्ताद्विजनात् । ' विविक्तौ पूतविजनौ ' इत्यमरः । ' विविधशिशिरोपचारात् ' इत्यपि पाठः । ' शिशिरोपचारः शीतलवस्तुपरिशीलनम् ' । इति रङ्गनाथः । उत्सुकस्य विरहोत्कण्ठितस्य विरहवेदनापीडितस्य वा । ' कालाक्षमत्वमौत्सुक्यं मनस्तापज्वरादिकृत् ' । इत्यलंकारे । वक्ष्यति च ' पर्युत्सुकां कथयसि प्रियदर्शनां तामार्तं न पश्यसि पुरूरवसं तदर्थं । ' इति । शरणमाश्रयः रक्षितृ । ' शरणं गृहरक्षित्रोर्वधरक्षणयोरपि ' इति मेदिनी । प्रमदवनं यत्र प्रमदाभी राजा क्रीडति तद्वनम् । ' स्यादेतदेव प्रमदवनमन्तःपुरोचितम् । ' इत्यमरः । प्रमदवनलक्षणं वृक्षारोपे--' उद्यानोपवनारामा वनं प्रमदपूर्वकम् । पञ्चधा निष्कुटं चेति वृक्षवाटी प्रशस्यते ।...अथ वनं प्रमदपूर्वकम् । अन्तःपुरैकभोग्यं स्यात् ' इति । **विदूषकः**—का गतिः क उपायः । मार्गादेशनमवश्यं कर्तव्यमिति भावः । वयस्यं मृगतृष्णिकाया निवर्तयितुं यतिष्य इति राज्ञे दत्तवचसो राजाज्ञाकरणावश्यकतया निर्विण्णस्येयमुक्तिः । नोदितेन प्रेरितेन । प्रत्युद्गतोभिमुखागमनेन संभावितः । दक्षिणमारुतेन दक्षिणाशागतेन वायुना स्त्रीणामनुवृत्तिपरेण च । **राजा**—उपपन्नं युक्तम् । विशेषणं ' दक्षिणः ' इति । राज्ञा तावत्स्त्रीणामनुवृत्त्युत्सुक इत्येवार्थो गृहीतः । **निषिञ्चन्निति**—एतां पुरस्ताद् दृश्यमानां माधवीं वासन्तीं लतां निषिञ्चन् निषेकेण मधुनो रेतसश्च मधुसम्पन्नां प्रसवाधानवतीं च कुर्वन् कौन्दीं लतां नर्तयन् लास्यं कारयन् । ' वासन्ती माधवी लता ' इत्यमरः । ' माध्यः कुन्दः कुरण्टकः ' इति रत्नकोषः । स्नेहदाक्षिण्ययोर्माधव्यां स्नेहः कौन्द्यां च दाक्षिण्यं तयोर्योगादेकत्रसम्बन्धादयं वायुर्मे कामी कामुक इव प्रतिभाति । स्नेहशब्दः श्लिष्टः । मदप्रसेकः प्रेमाविर्भावश्चेति तस्यार्थः । दाक्षिण्यं कामिनीचित्तानुवर्तनम् । तदुक्तं साहित्यदर्पणे—' दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्तनम् । ' इति । ' माधव्या हि वासंतिक्या नववयोविशेषशालिन्या भामिन्या इव निषेको माध्याश्च * कौन्द्या भ्रमरविसरापीतायाः प्रग-

---

१ लक्ष्मीं, वल्लीं, वृद्धिं, ऋद्धिं, इ. पा. २ लासयन्, कुन्दशेषं च नर्तयन् । इ. पा.

विदूषकः—ईदृश एव तवाभिनिवेशो भवतु । (परिक्रामितकेन ।) एतत्प्रमदवनद्वारम् । प्रविशतु भवान् । (ईरिसो एव्व दे अहिणिवेसो होदु । एदं पमदवणदुवारं । पविसदु भवं ।)

राजा—प्रविशाग्रतः ।

(उभौ प्रविशतः ।)

राजा—(अग्रतो विलोक्य ।) वयस्य न मया साधु समर्थितमापत्प्रतीकारः किल प्रमदवनोद्यानप्रवेश इति ।

विविक्षुर्यदहं तूर्णमुद्यानं तापशान्तये ।
स्रोतसेवोह्यमानस्य प्रतीपतरणं हि तत् ॥

विदूषकः—कथमिव । (कहं विअ ।)

राजा—

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥ ६ ॥

ल्भाया नर्तनमात्रमित्यहो कामिन इवास्य युक्तकारितेति भावः । एवं च माधवीमाध्योर्ज्येष्ठाकनिष्ठाख्यनायिकाविशेषत्वं प्राकाशि ।' इत्यत्र रङ्गनाथटीका । ज्येष्ठाकनिष्ठेत्यत्र व्यत्यासेन योजना । **विषदूकः**—ईदृशो वायोरिव । अभिनिवेश आग्रहश्चित्तासङ्गो वा । उर्वशीसंक्रान्तरागेणापि भवता राज्ञ्यां दाक्षिण्यमाचरितव्यमिति भावः । **राजा**—समर्थितं चिन्तितम् । आपत्प्रतीकारो मनस्तापदूरीकरणोपायः । उद्यानमुपवनम् । **विविक्षुरिति**—अहं तापशान्तये आतङ्कनिवृत्त्यर्थं यदुद्यानं तूर्णं झटिति विविक्षुः प्रवेष्टुमिच्छुरस्मि तत् । स्रोतसा नदीरयेणोह्यमानस्य प्रतीपतरणं प्रतिकूलप्लवनमिव जातमिति शेषः । स्रोतोजवस्य प्रतीपं तरतो यथाधस्तादेव गतिर्जायते तथा सन्तापनिवृत्त्यर्थमुद्यानं प्रविविक्षोर्मम संतापवृद्धिरेव जायत इति भावः । **इदमिति**—न सुलभं सुखेन लब्धुं शक्यमसुलभं यदुर्वशीरूपं वस्तु तस्मिन्या प्रार्थना तस्या दुर्निवारं निवारयितुमशक्यं मे मनः प्रथममपि प्रथमं तावत्पञ्चबाणः कामः क्षिणोति कृशीकरोति । अनवरतशरनिकरवर्षणेन पीडयतीति शेषः । मलयवातेन मलयपर्वतादागतेन । दक्षिणमारुतेनेत्यर्थः । वायुनोन्मूलितानि निःशेषमपहृतानि पाण्डुपत्राणि येषां

---

१ सदृश एवास्याभिनिवेशः [सरिसो एव्व से अहिणिएसो] इति पाठः । २ तन्न शान्तये इति, विविक्षोर्यदिदं नूनमुद्यानं नाघशान्तये । इ. च. पा. ३ स्रोतोजवोह्यमानस्य इ. पा. ४ महत् । इ. पा.

विदूषकः—अलं परिदेवितेन । अचिरेण तवेष्टसंपादयिताऽनङ्ग-एव सुखदो भविष्यति । (अलं परिदेविदेण । अइरेण दे इच्छिअ-सम्पादइत्तओ अणङ्गो एव्व सुहदो भविस्सदि)

राजा—प्रतिगृहीतं ब्राह्मणवचनम् ।

(परिक्रामतः ।)

राजा—पश्यतु भवान् वसन्तावतारसूचकमभिरामत्वं प्रमदवनस्य । (पेक्खदु भवं वसन्तोदारसूअअं अहिरामत्तणं पमदवणस्स ।

विदूषकः—ननु प्रतिपदमेवावलोकयामि । अत्र हि

अग्रे स्त्रीनखपाटलं कुरबकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ।
ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता ॥ ७॥

तैः । उपवनसहकारैरुद्यानाम्रैरतिसौरभाख्यैः । ' आम्रश्चूतो रसालोऽसौ सह-कारोऽतिसौरभः ।' इत्यमरः । अङ्कुरेषु किसलयेषु । कामोद्दीपकेष्विति यावत् । दर्शितेषु सत्सु मदनो मां क्षीणतरं कुर्यादिति किमु वक्तव्यम् । मालिनीवृत्तम् । ' ननमयययुतेयं मालिनी भोगिलोकैः । ' इति तल्लक्षणम् । **विदूषकः**—परि-देवितेन विलपनेन । इष्टसम्पादयिता इष्टस्योर्वशीसमागमस्य सम्पादयिता घटयिता । सुखदोयोऽधुना संतापदः सः । ' सुखदः ' इत्यत्र ' सहायः ' इत्यपि पाठः । **राजा**—प्रतिगृहीतं स्वीकृतम् । ब्राह्मणवचनं तस्यामोघतयेति भावः । यद्विधिवद्दीयते तस्य स्वीकारः प्रतिग्रहः । प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । योग्येभ्यो विधिवद्देये तद्ग्रहे च ग्रहान्तरे ॥ इति मेदिनी । ब्राह्मणाशी-र्गृहीता तेन मे मनोरथसिद्धिः स्यादिति राज्ञोऽभिप्रायः । ' अमोघाः प्रतिगृह्ण-न्तावर्घ्यानुपदमाशिषः । ' इति रघुवंशे । **विदूषकः**—वसन्तस्यतोरवतारस्या-गमनस्य सूचकं पिशुनम् । अभिरामत्वं रमणीयत्वम् । **राजा**—प्रतिपदं पदे पदे सर्वत्रेत्यर्थः । **अग्र इति** । अग्रेऽग्रभागे स्त्रीनखवत्पाटलं श्वेतरक्तं द्वयोर्भागयो-रुभयप्रान्तयोः श्यामं कुरबकपुष्पम् । अस्य सदृशवर्णनं मालविकाग्निमित्रे—' प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् । ' इति । दृश्यते इति शेषः । यद्वा भेदोन्मुखं तिष्ठतीत्यनेनास्यान्वयः । भेदोन्मुखा मुकुला एव क्वचित्क्वचिद्दृ-श्यन्ते न तु सर्वत उपचितमधून्युत्फुल्लानि पुष्पाणि अत एव मधुपानशौण्डानां

१ इच्छिदसम्पादणे न... तेसहाओ (सहायः)...इ. पा. २ विस्मयेन, विस्मयात् प्रतिपादपम् इ. पा.

विदूषकः——एष मणिशिलापट्टकसनाथोऽतिमुक्तलतामण्डपो भ्रमरसंघट्टपतितैः कुसुमैः स्वयमिव कृतोपचारो भवन्तं प्रतीच्छति । तदनुगृह्यतां तावदेषः । (एसो[1] मणिसिलापट्टअसणाहो अदिमुत्तलदामण्डवो भमरसंघट्टपडिदेहिं कुसुमेहिं सअं विअ किदोवआरो भवन्तं पडिच्छदि । ता अणुगेण्हीअदु दाव एसो ।)

राजा——यथा भवते रोचते ।

(परिक्रम्य उपविष्टौ ।)

विदूषकः——इह सुखासीनो भवान् ललितलताविलोभ्यमाननयनउर्वशीगतामुत्कण्ठां विनोदयतु । (इह सुहासीणो भवं ललिदलदाविलोहीअमाणणअणो उव्वसीगदं उक्कण्ठं विणोदेदु ।)

राजा——(निःश्वस्य ।)

मधुपानां रवोपि न श्रूयत इति भावः । तदुक्तं रघुवंशे–'विराचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः । मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः ॥' इति । तथाच–उपोढ उपचितो यो रागो रक्तिमा तेन सुभगं रम्यं बालाशोकं नवमशोकमुकुलं भेदोन्मुखं विकासोत्मुकं तिष्ठति । विशेषणद्वयेन मधुश्रियो मुग्धदशाप्रान्त उक्तः । ईषद्बद्धाः किंचित्संवृद्धा ये रजसः कणास्तैरग्रे कपिशा कृष्णपीता मञ्जरी चूत आम्रवृक्षे तिष्ठति । अनेन यौवनारम्भ उक्तः । इत्थं सखे मधुश्रीर्वसन्तलक्ष्मीर्मुग्धत्वस्य बालस्य यौवनस्य च मध्येऽन्तरे स्थिता । वसन्तावतारस्य क्रम उक्तः कविनैवान्यत्र—कुसुमजन्म ततो नवपल्लवास्तदनु षट्पदकोकिलकूजितामित्यादिना । शार्दूलविक्रीडितं छन्दः । लक्षणमुक्तम् । **विदूषकः**—मणिशिला स्फटिकशिला तस्याः पट्टकं आसनार्थं पट्टिका तेन सनाथो युक्तः । अतिमुक्तलता माधवीलता । 'अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।' इति त्रिकाण्डी । भ्रमरसंघट्टपतितैः षट्पदसंपर्कविगलितैः । कृतोपचारः समाहृतपूजासामग्रिः । प्रतीच्छति संभावयति । एवं शाकुन्तलेऽपि—एष मणिशिलापट्टकसनाथो माधवीमण्डपः..... स्वागतेनेव नौ प्रतीच्छति । इति । **विदूषकः**—ललिता रमणीया लतास्ताभिर्विलोभ्यमाने आकृष्यमाणे नयने यस्य । उर्वशीगतामुर्वशीसम्बन्धिनीम् । विनोदयत्वपनयतु । मनोहरनेपथ्या ललना इव पुष्पगुच्छादिशोभिता लोचनलोभनीया एता लताः पश्यतस्तवोत्कण्ठाविनोदनं भवेदिति विदूषकस्य भावः । **राजा**—सखे कुसुमितासु कुसुमान्यासां संजातानि ताः कुसुमितास्तासु । अनेन तासामा-

---

१ एसो खु. २ दाणिं (इदानीं) इह.

मम कुसुमितास्वपि सखे नोपवनलतासु नम्रविटपासु ।
चक्षुर्बध्नाति धृतिं तद्रूपालोकदुर्ललितम् ॥ ८ ॥

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम् ।

विदूषकः—(विहस्य) भो अहल्याकामुकस्य महेन्द्रस्य वैद्य उर्वशीपर्युत्सुकस्य भवतोऽहमपि द्वावत्रोन्मत्तौ । (भो अहल्लाकामुअस्स महिन्दस्स वज्जो उव्वसीपज्जुच्छुअस्स भवदो अहंवि दुवे एत्थ उम्मत्तआ ।)

राजा—मां मैवम् । अतिस्नेहः खलु कार्यदर्शी ।

भरणवत्वं तेन च नयनाभिरामत्वं सूचितम् । नम्रा अवनता विटपाः क्षुद्रशाखाः यासां तासु । अनेन स्त्रीसाधारणं विनयशालित्वं ध्वनितम् । एतादृशीस्वप्युपवनलतासु मम चक्षुर्धृतिं प्रीतिं न बध्नाति तास्वासक्तं न भवतीत्यर्थः । तत्र हेतुगर्भं विशेषणमाह यतस्तद्रूपालोकदुर्ललितं । तस्या रूपं तद्रूपं तस्यालोको दर्शनं तेन तत्र वा दुर्ललितं दुराग्रहि । तद्रूपैकदर्शनाभिनिवेशीति यावत् । सत्यपि लतानां सामान्यस्त्रीसादृश्ये न्यक्कृताशेषरूपसम्पत्तेरुर्वश्याः सौभाग्यसादृश्याभावात्प्रीत्यभाव इत्यभिप्रायः । अत्र 'मम' इत्यस्य स्थाने 'बहु' इति, 'तद्रूपालोक' इत्यत्र 'तदङ्गनालोक' इति रङ्गनाथः पठति । तद्व्याख्या यथा—"बहुकुसुमितास्वित्यादिभिर्विशेषणैरत्यन्तार्तववतीषु । 'अतिपरिचयादवज्ञा' इत्युक्तरीत्योपवनस्थित्या सर्वदासन्नवर्तित्वेनानादरविषयीभूतासु । नम्राः सौन्दर्यातिशयाद्विलोकनावनता विटपाः खिङ्गा यासु । नम्रान्विटान्पातीति वा । परमपुरुषलोचनादिगोचरास्वित्यर्थः प्रासूचि । तदङ्गनेत्यनेन च सा प्रसिद्धा सौन्दर्यादिगुणगणशालिनी देवीभावाच्च निखिलमर्त्यदोषाभाववती याङ्गना तस्यां मनोऽभिरतम् । बहुदोषदूषितासु च लतासु चक्षुर्न सक्तमिति सांप्रतमेवैतदिति रहस्यम् । 'विटपः पल्लवे खिङ्गे' इति विश्वः ॥" सफलप्रार्थनः सफला प्रार्थना यस्य सिद्धमनोरथः । तदुपायश्चिन्त्यतामित्यादिना 'प्रयत्नः' नाम कार्यस्य द्वितीयावस्था सूचिता । तदुक्तं प्राक् । **विदूषकः**–कामयतेऽसौ कामुकः । अहल्यायाः गौतमपत्न्याः कामुको महेन्द्रस्तस्य । वैद्यः साहाय्यकर्ता चन्द्रः । पुरा किल चन्द्रोऽहल्याकामनावशात्पारदार्यप्रवृत्तस्य महेन्द्रस्य सहाय्यमङ्गीकृत्य कुक्कुटरूपं धृत्वा गौतमाश्रमसविधे निशीथ एव रावं चकार । तेन प्रबुद्धो गौतमः स्नानार्थं नदीतीरं जगाम । अत्रान्तरे लब्धावसर इन्द्रोपि गौतमरूपधारी तच्छयनं भेजे । इत्यादि पौराणिकी कथात्रानुसंधेया । स चन्द्रो यथा गौतमस्य कोपपात्रं बभूव तथाहमपि देव्या भवेयम् । अतो द्वावप्यावामत्रास्मिन्मदनव्यतिकरे व्यवस्यन्तौ भ्रान्तावेवेति विदूषकस्याशयः । **राजा**—कार्यदर्शी कार्यं कर्तव्यमिष्टसिद्ध्युपाय-

---

१ न खलु चिन्तयति भवान् । इ. पा.

विदूषकः—एव चिन्तयामि । मा पुनस्त्वं परिदेवितेन मम समाधिं भिन्द्धि । (एसो चिन्तेमि । मा उण तुमं परिदेमिदेण मम समाधिं भिन्धि ।) (इति चिन्तां नाटयति ।)

राजा—(निमित्तं सूचयित्वा । आत्मगतम् ।)

न सुलभा सकलेन्दुमुखी च सा किमपि चेदनङ्गविचेष्टितम् ।
अभिमुखीष्विव काङ्क्षितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः ॥९॥

(जाताशस्तिष्ठति ।)

(ततः प्रणिशत्याकाशयानेन उर्वशी चित्रलेखा च ।)

चित्रलेखा—हला क्वानिर्दिष्टकारणं गम्यते । (हला कहिं अणिद्दिट्ठकालणं गच्छी अदि ।)

उर्वशी—सखि तदा हेमकूटशिखरे लताविटपेन क्षणविघ्निताकाशगमनां मामुपहस्य किमिदानीं पृच्छसि । (सहि तदा हेमऊडसिहरे लदाविडवेण खणविग्घिदाआसगमणं मं ओहासिह किं दाणिं पुच्छसि ।)

मिति यावत्पश्यतीति । **विदूषकः**—परिदेवितेन विलपनेन । ' विलापः परिदेवनम् ' इत्यमरः । समाधिं चित्तैकाग्रेण ध्यानं । भिन्द्धि छिन्द्धि । ध्यानविच्छेदं मा कुरु ॥ **राजा**—निमित्तं शुभसूचकं चिह्नं दक्षिणबाहुस्पन्दनादि । ' निमित्तं हेतुलक्ष्मणोः ' इत्यमरः । **न सुलभेति**—कलाभिः सहितः सकलः पूर्णो य इन्दुस्तद्वन्मुखं यस्याः सोर्वशी सुलभा सुखलभ्या न च । किमपि च कुतोप्यनिर्वचनीयात्कारणादिदमनङ्गविचेष्टितमनङ्गचेष्टा दक्षिणाक्षिस्फुरणादि । चकारद्वयमुभयोर्विरोधं दर्शयति । तथाहि मनः काङ्क्षितसिद्धिषु मनोरथपूरणेष्वभिमुखीष्वुदयोन्मुखीषु सतीष्विवैकपदे सपदि निर्वृतिं व्रजति सुखमनुभवति : ' तत्क्षणैकपदे तुल्ये सद्यः सपदि च स्मृतम् ' इति हलायुधः । किमपि झटिति ममान्तःसन्तापशान्तिर्जातेत्युर्वश्यागमनमचिरादेवोत्प्रेक्ष इति राज्ञोभिप्रायः द्रुतविलम्बितं वृत्तम् । ' द्रुतविलम्बितमाह नभौ भरौ । ' इति तल्लक्षणात् । जाताशस्तिष्ठतीत्यनेन नायिकासम्भोगविषयिणी स्पृहा प्रदर्शिता । तेन ' विलासो ' नाम सन्ध्यङ्गमुक्तं भवति । आकाशयानेन—यानं गमनं मार्गो वा । ' करणाधिकरणयोश्च ' इति करणे ल्युट् । **चित्रलेखा**—अनिर्दिष्टं कारणं यस्मिन्कर्मणि तद्यथा तथा । **उर्वशी**—क्षणविघ्नितेति । क्षणं क्षणपर्यन्तं विघ्नितमाका-

१ मदनोत्सुकास्तिष्ठति । **इ.** पा. २ (मदनवेदनामभिनीय सलज्जम् ।) सहि, हेमउडसिहरे लदाविडवान्तरे लग्गा वेज्जअन्तिआ मोआवेहि त्ति मए भणिदा उवहसिअ मं

चित्रलेखा—किं तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि (किं तस्स राएसिणो पुरूरवस्स सआसं पत्थिदा सि.)

उर्वशी—अयं ममापहस्तितलज्जो व्यवसायः । (अअं मे अवहत्थिदलज्जो ववसाओ ।)

चित्रलेखा—कः पुनः सख्या पुरतः प्रेषितः । (को उण सहीए पुढमं पेसिदो ।)

उर्वशी—हृदयम् (हिअअं ।)

चित्रलेखा—स्वयमेव साधु संप्रधार्यतां तावत् । (सअं एव्व साहु संदधारीअदु दाव ।)

उर्वशी—मदनः खलु मां नियोजयति । किमत्र संप्रधार्यते । (मअणो खु मं णिओएदि । किं एत्थ संपधारीअदि ।)

चित्रलेखा—अतः परं नास्ति ममोत्तरम् । (अदो वरं णत्थि मे उत्तरं ।)

उर्वशी—तेन हि आदेशय मार्गं येन गच्छन्त्या अन्तरायो न भवेत् । (तेण हि आदेसेहि मग्गं जेण अच्छन्तीए अन्तराओ ण भवे ।)

शगमनं यस्यास्तादृशीं माम् । मम मनोगतं जानातीत्यर्थः । अपहस्तितलज्जोपहस्तिताऽगणिता लज्जा त्रपा यस्मिन् । साहसमात्रमित्यर्थः । अत्र सङ्कल्पत्रपानाशाद्यवस्थाः सूचिताः । अष्टविधा नायिका । तदुक्तं दशरूपके–' तासामष्टाववस्थाः स्युः स्वाधीनपतिकादिकाः । ' इति । तत्रेयं विरहोत्कण्ठिताभिसारिका च । तदुक्तं तत्रैव–' कामार्ताऽभिसरेत्कान्तं सारयेद्वाभिसारिका । ' इति । उक्तं च वसन्तराजीये मदेन मदनेनापि प्रेरिता शिथिलपत्रा । योत्सुकाभिसरेत्कान्तं सा भवेदभिसारिका ॥ इति । 'येषां मतेन्योन्यसंकेतात्पूर्वं नाभिसरणं युक्तं तेषां मते पूर्वैव । **चित्रलेखा**–पुरतः प्रेषितो दौत्येनेति शेषः । साधु सम्यक् सम्प्रधार्यतां कर्तव्याकर्तव्यं विचार्य निश्चीयताम् । साहसकारिणी मा भूरिति भावः । **उर्वशी**–नियोजयति अस्मिन्कर्मणि प्रेरयतीत्यर्थः । अत्र ' धैर्यं ' नाम सत्वजो भावः स्त्रीणामलङ्कार उक्तः । **उर्वशी**-अन्तरायःविघ्नः।'विघ्नोन्तरायःप्रत्यूहः'इत्यमरः।यथा पुरा काशिकृत इति भावः

मणासि दिढं क्खु लग्गा ण सक्का मोआविदुम् । दाणीं पुच्छासि काहिं अणिद्दिट्ठकालण गच्छीअदि त्ति । (सखि हेमकूटशिखरे लताविटपान्तरे लग्नां वैजयन्तिकां मोचयेति मया भणिता उपहस्य मां भणसि दृढं खलु लग्ना न शक्या मोचयितुम् । इदानीं पृच्छासि कुत्रानिर्दिष्टकारणं गम्यत इति ।) इ. पा.

१ सहि तथावि संपधारीअदु दाव । को उण । इ. पा. २ गच्छन्तीणं.

चित्रलेखा—सखि विश्रब्धा भव । ननु भगवता देवगुरुणा अपराजितां नाम शिखाबन्धनविद्यामुपदिशता त्रिदशप्रतिपक्षस्यालङ्घनीये कृते स्वः । (सहि विस्सद्धा होहि । णं भअवदा देवगुरुणा अवराइदं णाम सिहाबन्धणविज्जं उवदिसन्तेण तिदसपडिवक्खस्स अलङ्घणिज्जा कदह्म ।)

उर्वशी—अहो विस्मृतं मम हृदयम् । (अहो विसुमरिदं मे हिअअं ।)

(सिद्धमार्गमवगाह्य ।)

चित्रलेखा—सखि एतद्भगवत्या भागीरथ्या यमुनासंगमविशेषपावनेषु सलिलेष्ववलोकयत इव आत्मानं प्रतिष्ठानस्य शिखाभरणभूतं राजर्षेर्भवनमुपगते स्वः । (एदं भअवदीए भाईरहिए जमुणा-

---

चित्रलेखा—विश्रब्धा त्यक्तशङ्का । **ननु**—न जानासि किम् । ननु आमन्त्रणे । 'आमन्त्रणे चापि ननु' इति विश्वः । देवगुरुणा बृहस्पतिना । अपराजितां पराजिता न भवतीति तामप्रतिहतशक्तिम् । एतद्विद्याया नाम । मन्त्रप्रयोगेण शिखाया बन्धनं तस्य विद्या ताम् । उपदिशता तन्त्रमन्त्रपूर्वकं शिक्षयता । त्रिदशानां प्रतिपक्षो दैत्यसमूहस्तस्य अलङ्घनीयेऽनतिक्रमणीये । तद्विद्याप्रभावादावां न कस्यापि गोचरतां यास्याव इति भावः । **उर्वशी**—अहो इत्याश्चर्ये । विस्मृतं मम हृदयं मया विस्मृतं तत् । सिद्धमार्गम्—सिद्धा देवयोनिविशेषास्तेषां मार्गं संचारपदवीम् । अयं भूमितलान्नातिविप्रकृष्ट इति गम्यते । अतिविप्रकृष्टत्वे राजभवनादर्शनापत्तेः । 'उद्वेजिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपनन्ति सिद्धाः ।' इति कुमारसंभववर्णनाच्च । **चित्रलेखा**—भगीरथस्येयं भागीरथी तस्याः । यमुना कालिन्दी तस्याः संगमेन विशेष-

---

१ सव्वं सुमरदि मे हिअअं । इ. पा. २ अतः परं—उ०—ताए पओअं सव्वं सुमरसि (तस्याः प्रयोगं सर्वं स्मरसि.) चि—सहि हिअअं एदं सव्वं जानाहि इत्यधिकं क्वचित् । ३ अथापराजिता शिखाबन्धिनी नाम विद्या । श्रीशंकर उवाच । राज्यं देयं शिरो देयं भार्या देया महेश्वरि । शिखाबन्धिनी विद्यैषा न देयेत्यागमा जगुः ॥ मन्दवारेऽमुराशायां गतां मुञ्जां समुद्धरेत् । वामहस्तेन दिग्वासा मनुमेनं समुच्चरन् ॥ नमःसिद्धेश्वरि मानस्तनः पितृवनं गतः । सूक्ष्मं मुञ्जगुणं कृत्वा चितावह्नौ च धूपयेत् ॥ उद्बन्धनमृतानारीनेत्रकेशैस्तथैव च । असितोतारपरया लब्धया त्वतियुक्तितः । कृष्णाशोकोत्तराशाखाद्विकनीडोद्भवांकुरैः । एतैश्च धूपितां रज्जुं प्लावयेद् रजसि स्त्रियाः । चाण्डालिन्यास्ततो रज्जुं मन्त्रेणानेन मन्त्रयेत् ॥ ॐ सर्वजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा ॥ तया निजशिखां बद्ध्वा चैनमेव मनुं पठन् । क्षणाददृश्यतां याति देवानामपि साधक । पुनः कौशिकधूमेन दृश्यो भवति मानवः । योगोयमन्यथा न स्यात् त्रिसत्यं शंकरोदितम् ॥ इति बृहद्वामकेश्वरतन्त्रोक्ता अपराजिता शिखाबन्धिनी विद्या समाप्ता ॥ शं. पा. पं. । ४ अस्मत्प्राक्तन—सखि पेक्ख पेक्ख । पदं; हला णं इ. पा. ।

संगमविसेसपावणेसु सलिलेसु ओलोअन्तस्स विअ अत्ताणअं पइट्ठाणस्स सिहाभरणभूदं राएसिणो भवणं उवगदह्म ।)

उर्वशी—(विलोक्य ।) ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति । (विचार्य) हला क्व नु खलु स आपन्नानुकम्पी भवेत् । (णं वत्तव्वं ठाणन्तरगदो सग्गोत्ति । हला कहिं णु खु सो आवण्णाणुकम्पी भवे ।)

चित्रलेखा—एतस्मिन्नन्दनवनैकदेश इव प्रमदवने अवतीर्य ज्ञास्यावः । (एदस्सिं णन्दणवणेक्कदेसे विअ पमदवणे ओदरिअ जाणिस्समो ।)

(उभे अवतरतः ।)

चित्रलेखा—(राजानं दृष्ट्वा सहर्षम् ।) सखि एष खलु प्रथमोदित इव भगवाश्चन्द्रः कौमुदीमिव त्वां प्रतीच्छति । (हला एसो खु पढमोदिदो विअ भअवं चन्दो कौमुदिं विअ तुमं पडिच्छदि ।)

उर्वशी—(विलोक्य ।) सखि इदानीं प्रथमदर्शनात् सविशेषं प्रियदर्शनो महाराजः प्रतिभाति । (हला दाणिं पुढमदंसणादो सविसेसं पिअदंसणो महाराओ पडिहादि ।)

पावनेषु । गङ्गायमुनयोः संगमपावनत्वं च श्रुतिस्मृतिप्रसिद्धम् । तथा च श्रुतिः—सितासिते यत्र सरितौ संगते तत्राप्लुतासो वियदुत्पतंति' इति । ये वै तन्वां विसृजन्ति धीरास्ते वै जना अमृतं भजन्ते । इति श्रुत्यन्तरं च । स्मृतिरपि—'या गतिर्योगयुक्तस्य तत्त्वज्ञस्य मनीषिणः । सा गतिस्त्यजतः प्राणान्गङ्गायमुनसंगमे ॥' इति । 'यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः । इति महाभारतेपि । कालिदासोप्येतदेवान्यत्र जगौ 'समुद्रपत्न्योर्जलसंनिपाते' इत्यादिना । अवलोकयत इव तस्य प्रतिबिम्बितत्वात् । प्रतिष्ठानस्य 'प्रयागपूर्वतीरस्थित 'झंशी' (झांशी ?) संज्ञकनगरस्य' इति रङ्गनाथः । शिखाभरणभूतं शिखामणिरिव स्थितम् । **उर्वशी**—अन्यत्स्थानं स्थानान्तरं तत्र गतः । आपन्नानुकम्पी—आपन्नाननुकम्पत इत्येवंशीलः । अत्र 'परिसर्पः' नाम संध्यङ्गमुक्तम् । 'इष्टानिष्टानुसरणं परिसर्पश्च कथ्यते' इति तल्लक्षणम् । इष्टस्याभिलषितस्य पुरूरवसो नष्टस्यादर्शनं गतस्यानुसरणमन्वेषणम् । **चित्रलेखा**—नन्दनवनं महेन्द्रोद्यानं तस्यैकदेशः प्रान्तः । प्रथममुदितः प्रथमोदितः । कौमुदीं ज्योत्स्नाम् । कुमुदानामियं कौमुदी ताम् । 'कौ [पृथिव्यां] मोदन्ते जना यस्यां तेनासौ कौमुदी मता' इति वा । प्रतीच्छति प्रतीक्षते । एतदुर्वश्या उत्साहवर्धनार्थम् । **उर्वशी**—सविशेषं समधिकं प्रियं कमनीयं दर्शनं यस्य स

चित्रलेखा—युज्यते । तदेह्युपसर्पावः (जुज्जदि । ता एहि उवसप्पम्ह ।

उर्वशी—तिरस्करिणीप्रतिच्छन्ना पार्श्वगतास्य भूत्वा श्रोष्यामि तावत् । पार्श्वपरिवर्तिना वयस्येन सह विजने किमपि मन्त्रयमाणस्तिष्ठति ([1]तिरक्खरिणीपडिच्छण्णा पासगदा से भविअ सुणिस्सं दाव । पासपडिवत्तिणा वअस्सेण सह विअणे किंपि मन्तअन्तो चिट्ठदि ।)

चित्रलेखा—यथा ते रोचते । (जह दे रोअदि ।)(यथोक्तमनुतिष्ठतः ।)

विदूषकः—भोः चिन्तितो मया दुर्लभप्रणयिनीसमागमोपायः । (भो चिन्तिदो मए दुल्लहप्पणइणीसमाअमोवाओ ।)

राजा—(तूष्णीमास्ते ।)

उर्वशी—का नु खल्वेषा स्त्री अनेन प्रार्थ्यमानात्मानं विकत्थते । (का णु क्खु एसा इत्थिआ इमिणा पत्थिअमाणा अत्ताणअं विकत्थेदि ।)

चित्रलेखा—किं पुनर्मानुष्यं बिडम्ब्यते । (किं उण माणुस्सअं विडम्बीअदि ।

तथोक्तः । स्निग्धया दृष्ट्या वीक्ष्यमाणत्वात् । **उर्वशी**—तिरस्करिण्या प्रतिच्छन्नान्तर्हिता । तिरस्कारिण्यन्तर्धानविद्या यस्याः प्रयोगादृष्टेरगोचरता संहाराच्च गोचरता सम्पद्यते दिव्यानाम् । एवं शाकुन्तले सानुमतिवचोपि ' तिरक्खरिणीपडिच्छण्णा ' इत्यादि । तावदुपसर्पणात्प्राक् । विजने विविक्ते मन्त्रयमाणः संलपन् । यथोक्तमिति—तिरस्करिणीप्रयोगाददृश्ये भूत्वोपसर्पत इत्यर्थः । **विदूषकः**-प्रणयोऽस्या अस्तीति प्रणयिनी दुर्लभा या प्रणयिनी तस्या समागमस्योपायः । **उर्वशी**—प्रार्थ्यमाना प्रणयं याच्यमाना काम्यमाना वा । आत्मानं विकत्थते दृष्ट्वा सत्यात्मानं बहुमन्यमानास्य प्रणयं नाभिनन्दतीति भावः । रङ्गनाथस्तु ' का पुनर्धन्या स्त्री यानेन परिमृग्यमाणात्मानं विनोदयति ' इति पाठं गृहीत्वैवं व्याख्याति—" धन्यात्युत्कटपुण्याद्यतिशयशालिनी प्रलोभिका वा । ' रामा त्रिवर्गहेतुः स्त्री धन्या योषित्प्रलोभिका ' इति त्रिकाण्डीशेषः " । **चित्रलेखा**—मानुष्यं विडम्ब्यते । दिव्या त्वं प्रभावात्तज्ज्ञातुं सम-

---

१ ण दाव उपसप्पिसम् । तिरक्ख० इला तिरक्ख०. इ. पा. २ ज्ञाणस्स किं, विलम्बीअदि [ध्यानाय किं विलम्ब्यते] इ. पा.

उर्वशी--बिभेमि सहसा प्रभावाद्विज्ञातुम् । (भयामि सहसा पदवादो विण्णादुं ।)

विदूषकः--ननु भणामि चिन्तित उपाय इति । (णं भणामि चिन्तिदो उवाओ त्ति ।)

राजा--तेन हि कथ्यताम् ।

विदूषकः--स्वप्नसमागमकारिणीं निद्रा सेवतां भवान् । अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिमालिख्यावलोकयंस्तिष्ठ । (सिविणी-असमाअमआरिणिं णिद्दं सेवदु भवं । अहवा तत्तभोदीए उव्वसीए पडिकिदिं आलिहिअ ओलोअन्तो चिट्ठ ।)

उर्वशी--(सहर्षम्) हीनसत्व हृदय समाश्वसिहि समाश्वसीहि । (हिणसत्त हिअअ समस्सस समस्सस ।)

राजा--उभयमप्यनुपपन्नम् ।

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् ।
न च सुवदनामालेख्येपि प्रियामसमाप्य तां
मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति ॥ १० ॥

चित्रलेखा--सखि श्रुतं त्वया । (सहि सुदं तुए ।)

र्थापि किमिति मानुषीज्ञानेन पर्याकुला भवसीत्यभिप्रायः । **उर्वशी**--बिभेमि । राजप्रार्थिता स्त्री कदाचिदन्या भवेदिति शंकात्र भयकारणम् । सहसाऽविचारितामित्यर्थः । **विदूषकः**--स्वप्ने समागमः स्वप्नसमागमस्तं करोतीति ताम् । अथवा पक्षान्तरे । प्रथमोपन्यस्त उपायोऽनुपपन्नश्चेदित्यर्थः । प्रतिकृतिं चित्रम् । **उर्वशी**-हीनमधमं सत्वं स्वभावो यस्य । तस्य शंकितत्त्वादनुदारतेति बोध्यम् । यद्वा सत्त्वं धैर्यम् । **राजा**--उभयमप्यनुपपन्नं न घटते इत्य० ! अनुपपत्तिमेवाह-**हृदयमिति**-इदं हृदयं मनः कामस्य मदनस्येषुभिर्बाणैः सदान्तः सशल्यं शल्यसहितं सवेदनमिति यावत् । एवं सति **स्वप्ने समागम**कारिणीं संगमयित्रीं निद्रां कथमुपलभे प्राप्नोमि । न कथंचिदप्युपलभ इत्यर्थः । न चालेख्ये चित्रेपि सुवदनां शोभनास्यां तां प्रियामुर्वशीमसमाप्यैव हे सखे मम नयनयोरुद्बाष्पत्वमुदश्रुत्वं न भविष्यतीति न । किंतु भविष्यत्येव । न हि सव्यथान्तःकरणस्य निद्रासेवनमश्रुपूर्णाकुलेक्षणस्य चित्रलेखनं वा क्वचित्सं-

उर्वशी—श्रुतम् । न पुनः पर्याप्तं हृदयस्य । (सुदं । ण उण पज्जत्तं हिअअस्स ।)

विदूषकः—एतावान् मम मतिविभवः । (एत्तिओ मे मदिविहवो)

राजा—(सनिश्वासम् ।)

नितान्तकठिनां रुजं मम न वेद सा मानसीं
प्रभावविदितानुरागमवमन्यते वापि माम् ।
अलब्धफलनीरसान्मम विधाय तस्मिञ्जने
समागममनोरथान्भवतु पञ्चबाणः कृती ॥ ११ ॥

चित्रलेखा—श्रुतं त्वया । (सुदं तुए ।)

उर्वशी—हा धिक् हा धिक् । मामेवमवगच्छति । असमर्थास्म्यग्रतो भूत्वाऽस्य प्रतिवचनस्य । प्रभावनिर्मितेन भूर्जपत्रेण संपादितोत्तरा भवितुमिच्छामि । (हद्धी हद्धी । मं एव्वं अवगच्छदि । असमत्थाह्मि अग्गदो भविअ से पडिवअणस्स । पहावणिम्मिदेण भुज्जवत्तेण संपादिदुत्तरा होदुमिच्छामि ।)

भवतीति भावः । **उर्वशी**—पर्याप्तं हृदयस्य प्रत्ययमुत्पादयितुं नालमित्यर्थः । **विदूषकः**—एतत्परिमाणमस्यैतावान् मतिविभवो बुद्धिप्रकर्षः । **राजा—नितान्तेति**—सोर्वशी मम नितान्तकठिनामत्यन्तदुःसहां मानसीं मनःसम्बन्धिनीं रुजं पीडां न वेद न जानाति । अन्यथानङ्गविधुरं मां कथमुपेक्षेतेति भावः । वाऽथवा प्रभावेण निजया दैव्या शक्त्या विदितो ज्ञातोऽनुरागो यस्य तादृशमपि मामवमन्यतेऽवधीरयति । दिव्यया मया कथं मानुषे रतिः कर्तव्येत्याशयेनेति भावः । एवं गते का गतिरित्यत्राह—पञ्च बाणाः शराः यस्य स पञ्चबाणः कामः । मदनस्य पञ्च बाणा यथा—अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥ इति । यद्वा संमोहनोन्मादनौ च शोषणस्तापनस्तथा । स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्तिताः । इति पञ्च बाणाः । तस्मिञ्जन उर्वश्यां मम समागममनोरथान् संगमाभिलाषान् अलब्धं फलं यैस्ते अलब्धफला अत एव नीरसा विरसास्तांस्तथोक्तान्विधाय कृत्वा कृती कृतार्थो भवतु । मनोरथवैरस्ये मरणमेव शरणमिति भावः । अत्रोपायान्तरादर्शनात् ' तापनं ' नाम सन्ध्यङ्गमुक्तमिति बोध्यम् । तदुक्तं विश्वनाथेन—' उपायादर्शनं यत्तु तापनं नाम तद्भवेत् ' । इति । **उर्वशी**—एवं नितान्तकठिनां रुजं न वेदेत्येतादृशीमथवा प्रभावेणानुरागं विदित्वाप्यवमन्यमानाम् । अवगच्छति जानाति । अस्य

चित्रलेखा—अनुमतं मम । (अणुमदं मे ।)

उर्वशी—(ससंभ्रमं गृहीत्वा यथोक्तं करोति ।)

विदूषकः—(दृष्ट्वा) अविहा अविहा । भोः किं नु खल्वेतद्भुजङ्गनिर्मोक इव संमुखेऽस्माकं निपातितम् । (अविहा अविहा । भो किं णु खु एदं भुअंङ्गाणिम्मोअं विअ संमुहे णो णिवडिदं ।)

राजा—(विभाव्य) भूर्जपत्रगतोयमक्षरविन्यासः ।

विदू०—न खल्वदृष्टया तत्र भवत्योर्वश्या भवतः परिदेवितं श्रुत्वा समानानुरागसूचकान्यक्षराणि विसृष्टानि स्युः (ण खु अदिट्ठाए तत्तहोदीए उव्वसीए भवदो परिदेविदं सुणिअ समाणाणुराणअसूअआइं अक्खराइं विसज्जिआइं होन्ति ।)

राजा—नास्त्यगतिर्मनोरथानाम् । (गृहीत्वानुवाच्य सहर्षम् ।) सखे प्रसन्नस्ते तर्कः

विदूषकः—भवान् इदानीं प्रसीदतु । अत्र लिखितं श्रोतुमिच्छामि । (भवं दाणिं पसीददु । एत्थ लिहिदं सुणिदुं इच्छामि ।)

उर्वशी—साधु आर्य नागरिकोसि । (साहु अज्जणा अरिओ ।)

प्रतिवचनस्यास्मै प्रतिवचनं दातुम् । प्रभावनिर्मितेनान्यस्यासन्निहिततयेदमुक्तम् । भूर्जपत्रेण मृदुत्वक्पत्रेण तन्मुखेनेत्यर्थः । सम्पादितमुत्तरं यया । **विदूषकः**—अविहा अविहेत्याक्रोशे भयसूचने वा । भुजङ्गनिर्मोकः सर्पकञ्चुकः ' निर्मोको मोचने व्योम्नि संनाहे सर्पकञ्चुके । ' इति कोषः । **राजा**—भूर्जपत्रगतो भूर्जपत्रसंक्रमितोऽक्षरविन्यासोक्षराणां पंक्तिरचना लेख इत्यर्थः । **विदूषकः**—न खलु इति वितर्के । यद्वा ' खलु ' जिज्ञासायाम् । ' खलु स्याद्वाक्यभूषायां जिज्ञासायां च सान्त्वने ' इति मेदिनी । परिदेवितं विलापम् । समानोनुरागस्तस्य सूचनानि पिशुनानि । अक्षराणि लेख इति यावत् । विसृष्टानि प्रहितानि । **राजा**—नास्त्यगतिर्मनोरथानां कामानामविषयो नास्त्येव । सर्वत्रानियन्त्रिता उज्जृम्भन्ते । कामी हि यद्यद्भवति तत्तदात्मानुकूलमिति पश्यतीति भावः । एवं कुमारसंभवेपि ' मनोरथानामगतिर्न विद्यते । ' इति । अनुवाच्य तूष्णीं वाचयित्वा । प्रसन्नः शुद्धोऽवितथ इत्यर्थः । **उर्वशी** नागरिको नगरे भवः विदग्धो दक्षिणो वा । न हि ग्राम्यो मदनलेखजिज्ञासां प्रदर्शयति

---

१ भुजङ्गनिर्मोअं किं म खादिदुं णिवडिदम् २ विहस्य; वयस्य नायं भुजङ्गनिर्मोकः भुर्ज० ३ अस्मात्प्राक्—ही ही भो किं ब्रह्मणवअणाणि अण्णधा होन्ति । इ. त्य.

राजा—श्रूयताम् । (वाचयति ।)

स्वामिन् संभाविता यथाहं त्वया अज्ञाता ।
तथानुरक्तस्य यदि नाम तवोपरि ॥ १२ ॥
ननु मम लुलितपारिजातशयनीये भवन्ति ।
नन्दनवनवाता अप्यत्युष्णकाः शरीरके ॥ १३ ॥

सामिअ संभाविआ जह अहं तुए अणुमिआ ।
तह अणुरत्तस्स जइ णाम तुह उवरिं[1] ॥ १२ ॥
ण मे लुलिअपारिजाअसअणिज्जम्मि होन्ति ।
णन्दणवणवादा वि अच्चुण्हआ सरीरए ॥ १३ ॥

उर्वशी—किं नु खलु सांप्रतं भणिष्यति । (किं णु खु संपदं भणिस्सदि ।)

चित्रलेखा—ननु भणितमेव कमलनालायमानैरङ्गैः । (णं भणिदं एव्व कमलणालाअमाणेहिं अङ्गेहिं ।)

विदुषकः—दिष्ट्या मयेव बुभुक्षितेन स्वस्तिवाचनकमुपलब्धं

स्वामिन्निति–हे स्वामिन् अज्ञाता अज्ञातयथार्थहृदयावस्थेति यावत् । अहं यदि नामानुरक्तस्य मयि बद्धभावस्य तवोपरि यथा त्वया संभाविता तर्किता नितान्तकठिनामित्यादिना तथा तादृशी स्याम् । तर्हि ननु कथं लुलितपारिजातशयनीये लुलितानि संतप्तशरीरलुण्ठनादितस्ततो विक्षिप्तानि पारिजातानि पारिजातकुसुमानि यस्मिंस्तल्लुलितपारिजातं शयनीयं तस्मिन् । यद्वा लुलितं पारिजातशयनीयं यस्य तस्मिन्निति बहुव्रीहिः । मम शरीरके नन्दनवनवाता अपि । अपिस्तेषामतिशिशिरत्वं द्योतयति । अत्युष्णा भवन्ति दाहशान्तिहेतुका अपि संतापकारिणो भवन्ति । अत्र ' लेखः ' नाम सन्ध्यङ्गमुपक्षिप्तम् । तदुक्तम्– ' विवक्षितार्थकलिता पत्रिका लेख उच्यते । ' इति तत्रैव स्वानुरागप्रकाशकत्वस्योपपत्तिमत्त्वाद् ' उपन्यासः ' इति सन्ध्यङ्गमप्युक्तं भवति । **उर्वशी**–किन्विति–ममानुरागं ज्ञात्वा तमभिनन्दति न वेति । **चित्रलेखा**–कमलनालायमानैः कमलनालवदाचरद्भिः । त्वदर्थमुत्ताम्यतो गाढविरहोत्कण्ठया परिम्लानैस्तनीयोभिश्च । ' म्लानकमलनालोपमैरङ्गैः ' इति रङ्गनाथसम्मतः पाठः । " कमलनालायमानैः कण्टकितैरित्यर्थः । अनेन रोमाञ्चेन राज्ञो हृष्टत्वमुक्तं भवति " इति काटयवेमः । **विदूषकः**–दिष्ट्येत्यानन्दे । ' दिष्ट्या समुपजोषं चेत्यानन्दे '

---

१ होम्यहम् [भवाम्यहम्] इ. त्य. २ मिलाणक०

भवता समाश्वासनम् । (दिट्ठिआ मए विअ बुभुक्खिदेण सोत्थिवा-अणअं उवलद्धं भवदा समासासणं ।)

राजा—समाश्वासनमिति किमुच्यते ।

तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं प्रियायाः ।
उत्पक्ष्मणा मम सखे मदिरेक्षणाया-
स्तस्याः समागतमिवाननमाननेन ॥ १४ ॥

उर्वशी—अत्रावयोः समविभागा प्रीतिः । (एत्थ णो सम-विभाआ पीदी ।

राजा—वयस्य अङ्गुलीस्वेदेन दूष्येरन्नक्षराणि । धार्यतामयं प्रियायाः स्वहस्तः ।

विदूषकः—(गृहीत्वा ।) किमिदानीं तत्रभवत्युर्वशी भवतो

इत्यमरः । स्वस्तिवाचनकं स्वस्ति वाच्यतेऽनेन स्वस्तिवाचनकमुपायनम् । समाश्वासनं सान्त्वनं प्रोत्साहनं वा । **तुल्येति**—तुल्यः समानो योनुरागः प्रेम तस्य पिशुनं सूचकम् । ' पिशुनौ खलसूचकौ ' इत्यमरः । ललितो मधुरोऽर्थोऽभिधेयविषयो बध्यतेऽस्मिन्निति ललितार्थबन्धम् । ललितोर्थस्य बन्धो यत्रेति वा । पत्रे निवेशितं विन्यस्तं प्रियाया उदाहियत इत्युदाहरणं हृदयानुरागव्यञ्जकं वचनं गीतं वा हे सखे उत्पक्ष्मणा उत्पक्ष्मनयनेनेति यावत् । ममाननेन समागतं मिलितं तस्या मदिरेक्षणाया आननमिव भवति । माद्यत्याभ्यामिति मदिरे ईक्षणे यस्याः सा मदिरेक्षणा । यद्वा मदिरा तत्संज्ञका दृष्टिस्तस्या ईक्षणमिवेक्षणं यस्याः । मदिरादृष्टिलक्षणमादिभरते—' आधूर्णमानमध्या या क्षामा चाञ्चिततारका । दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे ॥ ' इति । यद्वा मदिराभिधं ईक्षणं यस्याः । तदुक्तं संगीतकलिकायाम् " स्निग्धार्धमुकुला कान्ता लम्बिता मदिरा तथा । पञ्चैवात्र प्रतिज्ञाताः शौर्यादित्येन दृष्टयः ॥ सौष्ठवेनापरित्यक्ता स्मेरापाङ्गमनोहरा । वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिता ॥ ' उत्प्रेक्षालंकारः । वसन्ततिलकं वृत्तम् । अत्र विशेषवचनात् ' पुष्पम् ' नाम सन्ध्यङ्गमुक्तं भवति । तदुक्तं साहित्यदर्पणे ' पुष्पं विशेषवचनं मतम् । ' इति । **उर्वशी**—अत्राधुना । समविभागा समः विभागो यस्याः सा समं विभक्ता । तुल्यप्रमाणेति यावत् । **राजा**—अङ्गुलीनां स्वेदेन घर्मजलेन । दूष्येरन् विक्रियेरन् स्वहस्तः लक्षणया स्वहस्तलिखितो लेखः इत्यर्थः । ' स्वहस्तलेखः ' इत्यपि पाठः । ' स्वहस्ते निक्षेपः प्रियायाः । ' इति च पाठः । **विदूषकः**—मनोरथानां कुसुमं मदनलेखविसर्जनरूपम् । विसंवदति किं विप्रलभते किम् । नैव विसंवदेदि-

मनोरथानां कुसुमं दर्शयित्वा फले विसंवदति । (किं दाणिं तत्त-भोदी उव्वसी भवदो मणोरहाणं कुसुमं दंसिअ फले विसंवददि ।)

उर्वशी—हला यावदुपगमनकातरं हृदयं पर्यवस्थापयामि तावत्त्वमस्यात्मानं दर्शयित्वा यन्मम क्षमं तद्भण । (हला जाव उवगमणकादरं हिअअं पज्जवत्थावेमि दाव तुम से अत्ताणं दंसिअ जं मे खमं तं भणाहि ।)

चित्रलेखा—(तथेति तिरस्करिणिमपनीय राजानमुपेत्य ।) जयतु जयतु महाराजः । (जेदु जेदु महाराओ ।)

राजा—(सहर्षम्) स्वागतं भवत्यै । भद्रे

न तथा नन्दयसि मां सख्या विरहिता तया ।
संगमे पूर्वदृष्टेव यमुना गङ्गया विना ॥ १५ ॥

चित्रलेखा—ननु प्रथमं मेघराजिर्दृश्यते पश्चाद्विद्युल्लता । (णं पढमं मेहराई दीसदि पच्छा विज्जुल्लदा ।)

विदूषकः—(अपवार्य ।) कथं नैषा उर्वशी । तस्यास्तत्रभवत्या अभिमता सहचरी । (कहं ण एसा उव्वसी । ताए तत्तहोदीए अहिमदा सहअरी ।)

चित्रलेखा—उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति—

त्यर्थः 'विप्रलम्भो विसंवादः' इत्यमरः । मदनलेखविसर्जनेनेत्थमाश्वास्य समागमाकांक्षिणं त्वामन्ते नैवं विरसीकरिष्यतीति भावः । **उर्वशी**—उपगमनकातरमभिगमनपर्याकुलम् । पर्यवस्थापयामि स्थिरीकरिष्यामि । यन्मम क्षमं यन्मया वक्तुमुचितम् । **चित्रलेखा**—तिरस्करिणीमपनीयान्तर्धानविद्याप्रयोगं संहृत्य । अत्र तिरस्करिण्यपनयनं तिरोधानमन्त्रोपसंहारः । **राजा-न तथेति**—तया सख्योर्वश्या विरहिता वियुक्ता मां तथा न नन्दयस्यानन्दयीस । यथा तया सहैव नन्दयसीति शेषः । संगमे पूर्वदृष्टा । प्रथमं गङ्गासंयुक्ता दृष्टेत्यर्थः । यमुना कालिन्दी पश्चाद्गङ्गया विना दृष्टा सती यथा न नन्दयति दृष्टिविलोभिका न भवति तथा । उपमा । विनोक्तिश्च । 'विनोक्तिर्यद्विनान्येन न साध्वन्यदसाधु वा । इति तल्लक्षणात् । 'विनार्थसम्बन्ध एव विनोक्तिः ।' इति च रसगङ्गाधरे । **चित्रलेखा**—मेघराजिर्मेघपंक्तिः । **विदूषकः**—अभिमता अभीप्सिता

(उव्वसी महाराअं सिरसा पणमिअ विण्णवेदि)

राजा—किमाज्ञापयति ।

चित्रलेखा—मम सुरारिसंभवे दुर्जाते महाराज एव शरणमासीत् । साहं तव दर्शनसमुत्थेन मदनेन बलवद्बाध्यमाना भूयोपि महाराजेनानुकम्पनीयेति । (मह सुरारिसंभवे दुज्जादे महाराओ एव्व सरणं आसि । सा अहं तुह दंसणसमुत्थेण मअणेण बलिअं बाहीअमाणा भूओवि महाराएण अणुकम्पणीअत्ति ।)

राजा—भद्रमुखि

पर्युत्सुकां कथयसि प्रियदर्शनां ता-
मार्तं न पश्यसि पुरूरवसं तदर्थे ।
साधारणोयमुभयोः प्रणयः स्मरस्य
तप्तेन तप्तमयसा घटनाय योग्यम् ॥ १६ ॥

चित्रलेखा—(उर्वशीमुपेत्य) सखि एहि । त्वत्तोपि निर्दयतरं

मान्या । सहचरी सखी । **चित्रलेखा**–सुराणामरिः तस्मात्संभव उत्पत्तिर्यस्य तस्मिन् । दुर्जाते व्यसने शरणं रक्षिता । साहं यैकदा महाराजेनानुकम्पिता । दर्शनसमुत्थेन दर्शनोत्पन्नेन । मदनेन कामविकारेण । अनुकम्पनीया मम मदनार्तिः परिहरणीयेति भावः । **राजा—पर्युत्सुकामिति**—तां प्रियदर्शनां रम्यदर्शनां पर्युत्सुकामुत्कण्ठितां कथयसि । किंतु तदर्थे तस्याः कृत आर्तं कामज्वरसंतप्तं मां न पश्यसि न जानासि । सा केवलं पर्युत्सुकाऽहं तु कामवेदनाभिभूत इति भावः । अयं स्मरस्य स्मरकृतः । कर्तरि षष्ठी । प्रणयोभिलाषः प्रीतिर्वा । उभयोः साधारण उभयत्र समानः । यथोर्वशी मदर्थे पर्याकुला तथाहमपि तदर्थमतो नान्यतरपक्षे युक्त उपालम्भ इति भावः । अत उभयोः समागमयत्नोप्यविलम्बितं विधेय इत्याह सामान्योक्त्या । तप्तेनायसा तप्तमयो घटनाय योग्यम् । प्रबलमदनविकारयोरावयोर्झटिति संयोजनमेव युक्तमिति भावः । यद्वा ' तप्तेन तप्तमयसा घटनाय योग्यम् ' इत्ययमावयोः स्मरस्य स्मरं प्रति साधारणः समानः प्रणयो याच्ञा । इति योज्यम् । प्रणयः प्रेम्णि विस्रम्भे याच्ञाप्रत्ययोरपि ' । इति । विश्वः । एवं शाकुन्तले तृतीयाङ्केपि–राजा भद्रे साधारणोयं प्रणयः ।' इति । रङ्गनाथस्तु 'स्मरस्य' इत्यत्र 'यतस्व' इति पठित्वा 'तां कौमुदीमिव समागमयेन्दुबिम्बे ।' इति चतुर्थचरणपाठमाह । तद्व्याख्या यथा—"अतो यतस्व यत्नं कुरुष्व । कौमुदीं ज्योत्स्नामिन्दुबिम्ब इव ताम् । मयीत्यर्थात् । समागमय ।" इति । अयं पाठो न मनोरमः कारकदोषदुष्टश्च । **चित्रलेखा**–निर्दयतरं मदनं दृष्ट्वा निर्दयतरं मदनेन पीड्यमानं तव प्रियतमं

मदनं दृष्ट्वा प्रियतमस्य ते दूत्यस्मि संवृत्ता । (हला एहि । तुवत्तोवि णिद्दअदरं मअणं देक्खिअ पिअअमस्स दे दूदिम्हि संवुत्ता ।)

उर्वशी—(तिरस्करिणीमपनीय) । अहो लघु त्वयोज्झितास्मि । (अम्महे लहुअं तुए उज्झिदम्हि) ।

चित्रलेखा—इतो मुहूर्तंज्जिज्ञास्यामि का कामुज्झिष्यतीति । आचारं तावत्प्रतिपद्यस्व । (इदो मुहुत्तादो जाणिस्सं का कं उज्झिस्सदित्ति । आआरं दाव पडिवज्ज ।)

उर्वशी—(राजानमुपेत्य सव्रीडम्) जयतु जयतु महाराजः ।

राजा—सुन्दरि

मया नाम जितं यस्य त्वयायं समुदीर्यते ।
जयशब्दः सहस्राक्षादगतः पुरुषान्तरम् ॥ १७ ॥

(हस्ते गृहीत्वैनामुपवेशयति ।)

विदूषकः—भवति राज्ञः प्रियवयस्यो ब्राह्मणः किं न वन्द्यते । (भोदि रण्णो पिअवअस्सो बम्हणो किं ण वन्दीअदि ।)

उर्वशी—(सस्मितं प्रणमति ।)

द्रष्टव्यर्थः । **उर्वशी**—लघु शीघ्रमकस्मादित्यर्थः । उज्झितास्मि त्यक्तास्मि । मम सखी भूत्वापि मां त्यक्त्वा राजदौत्यमङ्गीकृतवत्यसीति साभिप्रायमुपालम्भगर्भं वचो नायकशृङ्गारवर्धनार्थम् । अत एवास्मात्प्राक् तिरस्करिण्यपनयनमपि युक्तम् । **चित्रलेखा**—इतो मुहूर्तादिति—त्वमेवाचिराद्राज्ञा संगता मां त्यक्षसीति त्वमेव ममोपालम्भार्हा नाहं तवेति भावः । आचारं समुचितोपचारं जयेत्यादिशब्दै राज्ञो विजयवर्धनादिकम् । अत्र परिहासस्य गम्यमानत्वात् 'नर्म' नाम सध्यङ्गमुपक्षिप्तम् । तदुक्तं 'परिहासवचो नर्म' इति । 'अग्राम्य इष्टजनावर्जनरूपः परिसाहो नर्म' इति दशरूपकटीकाकृत् । **उर्वशी**—जयतु जयतु विजयेन वर्धताम् । **राजा**—हे सुन्दरि मया नाम जितं सर्वोत्कर्षशालिना भूतं खलु । यतः सहस्राक्षान्महेन्द्रात्पुरुषान्तरमन्यं पुरुषमगतोऽप्राप्तोऽयं जयशब्दस्त्वयोदीर्यमाणो 'जयतु जयतु महाराजः' इति शब्दो यस्य मम त्वया समुदीर्यते सम्यगुच्चार्येत । अतो जितमिति सम्बन्धः । 'नाम' इत्यभ्युपगमे । 'नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽचि च ।' इति मेदिनी । अत्र 'प्रगमनं' नाम सध्यङ्गमुक्तं भवति । तदुक्तं साहित्यदर्पणे 'प्रगमनं वाक्यं स्यादुत्तरोत्तरम् ।' इति । **विदूषकः**—भवति राज्ञ इति अत्र हास्यप्रतीतिः

---

१ अयि अणवत्थिदे [अनवस्थिते] इति, तुए अनवेक्खिदं इति,इति च पा.

विदूषकः—स्वस्ति भवत्यै । (सत्थि भोदीए ।)

(नेपथ्ये ।)

देवदूतः—चित्रलेखे त्वरयोर्वशीम् ।

मुनिना भरतेन यः प्रयोगो
भवतीष्वष्टरसाश्रयो नियुक्तः ।
ललिताभिनयं तमद्य भर्ता
मरुतां द्रष्टुमनाः सलोकपालः ॥ १८ ॥

(सर्वे कर्णौ ददति । उर्वशी विषादं नाटयति ।)

चित्रलेखा—श्रुतं प्रियसख्या देवदूतस्य वचनम् । अनुमान्यतां महाराजः । (सुदं पिअसहीए देवदूदस्स वअणं । अणुमाणीअदु महाराओ ।)

उर्वशी—नास्ति मे वाक् । (णत्थि मे वाआ ।)

स्फुटैव । हासलक्षणं यथा—'भाषणाकृतिवेषाणां क्रियायाश्च विकारतः । लौल्यादेश्च परस्थानामेषामनुकृतेरिति । विकासश्चेतसो हासः ।' इति ।

मुनिनेति—भरतेन मुनिना । भरताख्यो मुनिर्नाट्यशास्त्रप्रणेता तेन । अष्टरसाश्रयः—अष्टानां नाट्यशास्त्रोक्तानां रसानामाश्रयः स्थानम् । तदुक्तं काव्यप्रकाशे " शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः' ॥ रस्यन्ते आस्वाद्यन्ते इति रसाः । रसलक्षणं दशरूपके–'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः ॥' इति । यः प्रयुज्यते इति प्रयोगो रूपकविशेषो भवतीषु युष्मासु । अप्सरःस्वित्यर्थः । नियुक्तोऽभिनयशिक्षया प्रतिष्ठापितः । तं प्रयोगं ललिताभिनयं ललितो मनोहरोऽभिनयो मनोगतभावादिव्यञ्जनं यस्मिंस्तादृशं लोकपालैः सहितः सलोकपालो मरुतां भर्ता देवेन्द्रोद्य द्रष्टुमना द्रष्टुं प्रेक्षितुं मनो यस्य स तथोक्तः । 'तुं काममनसोरपि' इति मकारलोपः । 'इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् । कुबेर ईशः । ' इत्यष्टौ लोकपालाः । ललिताभिनयमित्यनेन शृङ्गाररसप्रधानत्वं सूचितम् । तदुक्तं दशरूपके–'ऐको रसोऽङ्गी कर्तव्यो वीरः शृङ्गार एव वा । अङ्गमन्ये रसाः सर्वे कुर्यान्निर्वहणेऽद्भुतम् ॥' इति । **उर्वशी**–विषादं नाटयति–धुतेन शिरसा विषण्णया दृष्ट्या चेति ज्ञेयम् । तल्लक्षणे तु-पर्यायेण शनैस्तिर्यग्गतमुक्तं धुतं शिरः । विषादेऽनीप्सिते ज्ञेयम् ।' इति । या दृष्टिः पतितापाङ्गा विस्तारितपुटद्वया । निमेषिण्यस्तताराच विषण्णा सा विषादिनी ॥' इति च । **चित्रलेखाः**—अनुमान्यतां गमनायानुज्ञां दाप्यतामित्यर्थः । **उर्वशी**–वाक्

चित्रलेखा—महाराज परवशोऽयं जनः । तन्महाराजेनाभ्यनुज्ञातेच्छति देवेष्वनपराद्धमात्मानं कर्तुम् । (महाराअ परवसो अअं जणो । ता महाराएण अब्भणुण्णादा इच्छदि देवेसु अणवरद्धं अत्ताणअं कादुं ।)

राजा—(कथंचिद्वाचं व्यवस्थाप्य ।) नास्मि भवत्योरीश्वरनियोगप्रत्यर्थी । स्मर्तव्यस्त्वयं जनः ।

उर्वशी—(वियोगदुःखं रूपयन्ती सह सख्या निष्क्रान्ता ।)

राजा—(सनिःश्वासम् ।) सखे वैयर्थ्यमिव चक्षुषः संप्रति ।

विदूषकः—(पत्रं दर्शयितुकामः ।) नन्वेतत्—(इत्यर्धोक्ते आत्मगतम्।) हा धिक् हा धिक् उर्वशीदर्शनविस्मितेन मया तद्भूर्जपत्रं प्रभ्रष्टमपि हस्तात्प्रमादेन न विज्ञातम् । (णं एदं । हद्धी हद्धी उव्वसीदंसणविम्हिदेण मए तं भुज्जवत्तअं पब्भट्ठंवि हत्तादो पमादेण ण विण्णादं।)

राजा—भद्र किमसि वक्तुकाम इव ।

विदूषकः—मा भवानङ्गानि मुञ्चतु । दृढं खलं त्वयि बद्धभावोर्वशी ! न सेतोगतमनुरागं शिथिलयति । (मा भवं अङ्गाइं मुञ्चदु । दिढं खु तुइ बद्धभावा उव्वसी । ण सा इदोगदं अणुराअं सिढिलेदी।)

उच्चरणसामर्थ्यम् । **चित्रलेखा**—परस्य वशः परवशः पराधीनः । अयं जनः उर्वशीलक्षणः । अनपराद्धं कर्तुं तेषां शासनं सम्यगनुष्ठायेत्यर्थः । अतस्तामनुज्ञातुमर्हेति भवानिति निष्कर्षः । **राजा**—व्यवस्थाप्य समाहितां कृत्वा । ईश्वरनियोगप्रत्यर्थी ईश्वरस्य प्रभोर्महेन्द्रस्य नियोगस्याज्ञायाः प्रत्यर्थी विरोधी । प्रतिकूलमर्थयितुं शीलमस्यासौ प्रत्यर्थी । **उर्वशी**—अयमुर्वश्या निष्क्रमो रतेः शृङ्गारस्थायिनः पोषार्थमिति ज्ञेयम् । विप्रलम्भः शृङ्गारः । तदुक्तम्—' यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोसौ । ' इति । ' न विना विप्रलम्भेन शृङ्गारः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागो विवर्धते ॥ ' इति च । **राजा**—वैयर्थ्यं विगतोऽर्थो यस्य तद्भावः तस्य भावः विफलता । संप्रत्यसन्निहितायामुर्वश्यामित्यर्थः । **विदूषकः**—विस्मितेन विस्मयाकुलेन विस्मृतात्मभावेनेत्यर्थः । प्रमादेनानवधानतया । **विदूषकः**—अङ्गानि मुञ्चतु निराशो भवत्वित्यर्थः ।

---

१ उव्वसी विण्णवेदि (उर्वशी विज्ञापयति) । इ. त्य. ए. पु.. । २ सविषादमात्म० ३ वअस्स एदाह्मि वत्तुकामो (वयस्य एतदस्मि वक्तुकामः ।) इ. त्य. ए. पु. ।

राजा—ममाप्येतदाशंसि मनः । तया खलु प्रस्थाने

अनीशया शरीरस्य हृदयं स्ववशं मयि ।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निश्वसितैरिव ॥ १९ ॥

विदूषकः—(आत्मगतम् ।) वेपते मे हृदयमिमां वेलां तत्रभवता तस्य भूर्जपत्रस्य नाम ग्रहीतव्यं भविष्यतीति । (वेवदि मे हिअअं इमं वेलं तत्तभवदा तस्स भुज्जवत्तस्स णाम गेण्हिदव्वं भविस्सदित्ति ।)

राजा—केनेदानीं दृष्टिं विलोभयामि । (स्मृत्वा ।) आ उपनयतु भवान् भूर्जपत्रम् ।

विदूषकः—(विषादं नाटयति ।) हन्त न दृश्यते । गतमुर्वश्या मार्गेण । (हन्त ण दिस्सदि । गदं उव्वसीए मग्गेण ।)

राजा—सर्वत्र प्रमादी वैधेयः । ननु विचिनोतु भवान् ।

विदूषकः—(उत्थाय ।) नन्वितो भवेत् इतो भवेत् । (णं इदो भवे इदो भवे ।) (इति विचेतव्यं नाटयति ।)

(ततः प्रविशति सपरिवारा देवी काशीराजपुत्री ।)

देवी—हञ्जे निपुणिके सत्यं त्वया भणितमिदं लतागेहं प्रविशन्नार्यमाणवकसहाय आर्यपुत्रो दृष्ट इति । (हञ्जे णिउणिए सच्चं तुए भणिदं इमं लदागेहं पविसन्तो अज्जमाणवअसहाओ अज्जउत्तो दिट्ठोत्ति ।)

खलु ध्रुवम् । वद्धो भावोऽनुरागो यया । इतोगतं त्वयि प्रतिष्ठितमित्यर्थः । शिथिलयति शिथिलीकरोति । **राजा**—एतदाशंस्येतदाशावत् । **अनीशयेति**—शरीरस्थानीशयाऽनीश्वरया । तस्येन्द्रायत्तत्वात् । तयोर्वश्या स्ववशं स्वायत्तं हृदयं । स्तनयोः कम्पक्रिया तया वक्षःस्थलोद्धूननेनेत्यर्थः । लक्ष्यैरनुमेयैर्निश्वासैर्मयि न्यस्तं निक्षिप्तमिव । विवशमिति पाठे स्वतन्त्रं कस्याप्यनायत्तमित्यर्थः । यद्वा विवशं विशेषेण वशं स्वाधीनम् । **विदूषकः**—इमां वेलामनया वेलया । **राजा**—विलोभयामि विनोदयामीत्यर्थः । प्रमादी प्रमत्तः । वैधेयो मूर्खः । ' मूर्खेवैधेयबालिशाः ' इत्यमरः । विचेतव्यं विचितिम् । **देवी**—लतागेहं प्रमदवनान्तर्गतमेतद्विज्ञेयम् । **निपुणिका**—भट्टिनी राज-

---

१ विवशम् । इ. पा. २ केत्तिए वेलाए [कस्यां वेलायां] इ. पा. ३ भो दिव्वं खु तं भुज्जवत्तं गदं । इ. पा. ४ अहो, आः; सर्वत्र. ५ सच्चं किं लताघरं विसन्तो अज्जमाणवअसहाओ दिट्ठो तुए महाराओ इ. पा.

निपुणिका—किमन्यथा भट्टिनी मया विज्ञापितपूर्वा । (किं अण्णहा भट्टिणी मए विण्णविदपुव्वा ।)

देवी—तेन हि लतान्तरिता श्रोष्यामि तावदस्य विश्रब्धामन्त्रितानि । यत् त्वया कथितं तत्सत्यं न वेति । (तेण हि लदन्तरिदा सुणिस्सं दाव से विस्सद्धामन्तिदाणि । जं तुए कहिदं तं सच्चं ण वत्ति ।)

निपुणिका—यद् भट्टिन्यै रोचते । (जं भट्टिणीए रूचदि ।)

देवी—(परिक्रम्य ।) हञ्जे निपुणिके किमेतज्जीर्णचीवरमिवेतोमुखं दक्षिणमारुतेनानीयते । (हञ्जे णिउणिए किं एदं जिण्णचीवरं विअ इदोमुहं दक्खिणमारुदेण आणीअदि ।)

निपुणिका—(विभाव्य ।) भट्टिनि परिवर्तनविभावितास्फरं भूर्जपत्रं खल्वेतत् । हन्त भट्टिन्या एव नुपूरकोट्या लग्नम् । (गृहीत्वा ।) कथं वाच्यताम् । (भट्टिणि पडिवत्तणविभाविदाक्खरं भुज्जवत्तं खु एदं । हन्त भट्टिणीए एव्व णेउरकोडिए लग्गं । कहं वाईअदु ।)

देवी—अनुवाचय तावदेत् । यद्यविरुद्धं ततः श्रोष्यामि । (अणुवाएहि दाव णं । जदि अविरुद्धं तदो सुणिस्सं ।)

निपुणिका—(तथा कृत्वा ।) भट्टिनि तदेव कौलीनमिव प्रतिभाति । भर्तारमुद्दिश्योर्वश्याः काव्यबन्ध इति तर्कयामि । आर्यमाणवकप्रमादेनावयोर्हस्तं गत इति । (भट्टिणि तं एव्व कोलीणं

महिषी । यत्तु 'देवी कृताभिषेकायामितरासु तु भट्टिनी ।' इत्यमरसिंहेनोक्तं तत्प्रायिकं मन्तव्यम् । अन्यथा विज्ञापितपूर्वा असत्यं देव्यै कदाचित्कथितमित्यर्थः । **देवी**—लतान्तरिता लतान्तर्हिता । विश्रब्धमन्त्रितानि विश्रम्भालापान् । **देवी**—जीर्णचीवरं जीर्णं चीवरं वस्त्रखण्डम् । इतोमुखं इतः मुखं यस्यास्मत्सम्मुखमित्यर्थः । **निपुणिका**—विभाव्य निरूप्य निपुणमालोच्य । परिवर्तनविभावितास्फरं परिवर्तनेन व्यावर्तनेन विभावितानि प्रकटीकृतानि दृष्टानि वास्फराणि यस्मिन् । नूपुरकोट्या मञ्जीराग्रेण 'मञ्जीरोनूपुरोऽस्त्रियाम् । इत्यमरः । कथमिति प्रश्ने । **देवी**—अनुवाचय तूष्णीं वाचय । अविरुद्धं श्रवणार्हमकौलीनपरमित्यर्थः । अन्यथात्वे तस्य मनोव्यथाजनकत्वादिति भावः । **निपुणिका**—कौलीनं कौ पृथिव्यां लीनं । अलुक्समासः । अपवादः । कौलीनं

---

१ जं भट्टिणी आणवेदी । इ. पा. २ 'पत्तोण्णं' इति, 'वत्तं नवच्चीवरं' इति च पा.

विअ पहिडादि । भट्टारअं उद्दिसिअ उव्वसीए कव्वबन्धोत्ति तक्के-मि । अज्जमाणवअप्पमादेण अह्माणं इत्थं गदोत्ति ।)

देवी—तेन ह्यस्य गृहीतार्था भवामि । (तेण हि से गहि-दत्था होमि ।)

निपुणिका—(राज्ञा पूर्ववाचितं वाचयति ।)

देवी—अत्रानेनैवोपायनेनाप्सरःकामुकं प्रेक्षे । (एत्थ इमिणा एव्व उवाअणेण अच्छराकामुअं पेक्खामि ।) (इति परिजनसहिता लतागृहं परिक्रामति ।)

विदूषकः—भो वयस्य किमेत्पवनवशगामि प्रमदवनसमीपग-तक्रीडापर्वतपर्यन्ते दृश्यते । (भो वअस्स किं एदं पवणवसगामि पमदवणसमीवगदक्कीलापव्वदपज्जन्ते दीसदि ।)

राजा—(उत्थाय ।) भगवन् वसन्तप्रिय[1] दक्षिणवायो ।

वासार्थं हर संभृतं सुरभिणा पौष्पं रजो वीरुधां
किं मिथ्या भवतो हृतेन दयितास्नेहस्वहस्तेन मे ।
जानीते हि मनोविनोदनफलैरेवंविधैर्धारितं
कामार्तं जनमन्यनां प्रति भवानालक्षितप्रार्थनः ॥ २० ॥

पशुभिर्युद्धे कुलीनत्वापवादयोः ' । इति धरणिः । अत्र राज्ञ आभिजात्य-विरुद्धमाचरणमुर्वश्यनुरागरूपम् । भर्तारं स्वामिनम् । तदुक्तं दशरूपके—' देवः स्वामीति नृपतिभृत्यैर्भर्तेति चाधमैः । ' इति । यद्वा भट्टारकमिति संस्कृतं । ' राजा भट्टारको देवः ' इत्यमरः । काव्यबन्धः पद्यरचना । मदनलेख इति यावत् । **देवी**—गृहीतार्था—गृहीतोर्थो यया । ज्ञातविषयेत्यर्थः । **देवी**—अत्राधुना । उपायनेनोपहारेण । एतदेवोपहारस्थाने कृत्वेत्यर्थः । ' उपा-यनमनुपग्राह्यमुपहारस्तथोपदा । ' इत्यमरः । **विदूषकः**—पवनवशगामि पवन-वशं गच्छतीति वायुवशसंचारि । क्रीडापर्वतः क्रीडाशैलः । उपवनादिषु क्री-डार्थं निर्मितः पर्वतसदृशो भूम्युच्छ्रयः । तस्य पर्यन्ते प्रान्ते । **राजा**—विदू-षकवचः श्रुत्वा पवनेनोत्क्षिप्य नीयमानं भूर्जपत्रमेव स्यादिति मन्वान आह । वसन्तप्रिय वसन्तस्य प्रियो वसन्तप्रियः । वसन्तः प्रियः यस्येति वा । तस्य सम्बुद्धिः हे वसन्तसख । **वासार्थमिति**—सुरभिणा वसन्तेन । ' वसन्ते पुष्पसमयः सुरभिः ' इत्यमरः । सुष्ठु रभन्ते हर्षयुक्ता भवन्त्यत्रेति सुरभिः । संभृतं संपादितमुपचितं वा । वीरुधां लतानां । वीरुल्लताविटपयोः

---

१ वसन्तसख मलयानिल । इ. पा.

निपु०—भट्टिनि एतस्यैवान्वेषणा वर्तते । (भट्टिणि एदस्स एव्व अण्णेसणा वट्टदि ।)

देवी—पश्यामि । (पेक्खामि ।)

विदूषकः—भो म्लायमानकेशरच्छविना मयूरपिच्छेन विप्रलब्धोस्मि । (भो मिलाअमाणकेशरच्छाविणा मोरपिच्छेण विप्पलद्धो ह्मी)

स्त्रियाम् ।' इति कोषः । 'लता प्रतानिनी वीरुध्' इत्यमरे विशेषः । पौष्पं पुष्पसम्बन्धि रजः परागं । 'रजः क्लीबं गुणान्तरे । आर्तवे च परागे च' इति मेदिनी । वासार्थं सौगन्ध्यलाभार्थं हर नय । मिथ्या व्यर्थं हृतेनापनीतेन मे मम दयितास्नेहस्वहस्तेन दयितायाः प्रियायाः स्नेहस्वहस्तः स्नेहदर्शकः स्वहस्तो लक्षणया स्वहस्तलेखस्तेन भवतः किं कोर्थः । पुष्परेणुहरणे भवतः सौरभ्यलाभः स्यात् । मत्प्रियालेखहरणे तु न कोपि दृष्टादृष्टस्तव लाभ इत्यर्थः । प्रत्युत ज्ञातास्वादस्य तवादाक्षिण्यमपि प्रसज्येतेत्याह—भवान् कामार्तं कामपीडितं जनं । मनोविनोदनफलैर्मनस उत्कण्ठितस्येत्यर्थः । विनोदनं सान्त्वनं । उत्कण्ठापनयनमिति यावत् । फलं प्रयोजनं येषां तानि तैः । एवंविधः प्रकारो येषां तैरीदृशैर्मदनलेखादिभिर्धारितमवलम्बितजीवितं जानीते हि वेत्ति खलु । यतो भवान् अज्ञनां प्रत्यालक्षितप्रार्थनो दृष्टाभिलाषः । कामुक इत्यर्थः । अञ्जना नाम कुञ्जराख्यस्य वानरस्य पुत्री हनूमन्माता च । एकदा पर्वताशिखर आसीनायास्तस्या उत्तरीयाञ्चलं विस्खलितं दृष्ट्वा भगवान्वायुस्तां चकमे । पश्चायथा मे कुमारीभावो न नश्येत्तथा मयि चरतु भगवानिति तया विज्ञप्तः कृतार्थतां भेजेऽजनयच्च तस्यां सुतं मारुतिम् । इति पौराणिकी कथात्रानुसन्धेया । रङ्गनाथस्तु 'विनोदनफलैः' इत्यत्र 'विनोदनशतैरिति' चतुर्थपादं च 'कामार्तं जनमञ्जसाभिभवितुं नालम्बितप्रार्थनम्' इति पठति । तद्व्याख्यानं यथा—"हि यतः भवानेवंविधैर्विनोदनशतैर्हस्तलेखचित्रफलकादिभिर्धारितं विहितजीवनम् । आलम्बिता अङ्गीकृता प्रार्थना येन तं कामार्तं जनमञ्जसा तत्त्वतोऽभिभवितुं पराभवितुं न जानीते । अभिभवितुं न जानीते इदमञ्जसा सत्यमिति वा । अतश्चावश्यं लेखो न नेय इति भावः । निजदाक्षिण्यरक्षणायापि नैतादृग्विधेयमिति रहस्यम् । 'अञ्जसा तत्त्वतूर्णयोः' इति विश्वः । इति । **निपुणिका**—अन्वेषणा अन्वीक्षणम् । **विदूषकः**—म्लायमानकेसरच्छविना म्लायमानं यत्केसरं केसरपुष्पं तद्वच्छ-

१ भट्टिणि एदस्स एव भुज्जवत्तस्स अण्णेसणा सुणिअदि । इ. पा. २ णं पेक्खामि दाव । तुणिं चिट्ठ (तूष्णीं तिष्ठ) इ. पा. ३ (सविषादम्) हद्धी हद्धी.

राजा—सर्वथा हतोस्मि[1] ।

देवी—(उपेत्य ।) आर्यपुत्र अलमावेगेन । एतत्तद्भूर्जपत्रम् । (अज्जउत्त अलं आवेएण । एदं तं भुज्जवत्तं ।)

राजा—(ससंभ्रमम् ।) अये देवी । स्वागतं देव्यै ।

विदूषकः—(अपवार्य ।) दुरागतमिदानीं संवृत्तम् । (दुरागमं दाणिं संवत्तं ।)

राजा—(जनान्तिकम् ।) सखे किमत्र प्रतिविधेयम् ।

विदूषकः—लोत्रेण गृहीतस्य कुम्भीरकस्यास्ति वा प्रतिवचनम् । (लोत्तेण गहिदस्स कुम्भिलअस्स अत्थि वा पडिवअणं ।)

राजा—(अपवार्य) मूढ नायं परिहासकालः । (प्रकाशम् ।) देवी नेदं मया मृग्यते । स खलु[2] परसमन्वेषणार्थमारम्भोयम् ।

देवी—युज्यत आत्मनः सौभाग्यं प्रच्छादयितुम् । (जुज्जदि अत्तणो सोहग्गं पच्छादेदुं ।

विदूषकः—भवति त्वरयास्य भोजनं यत् पित्तोपशमनसमर्थं

विः कान्तिर्यस्य तेन । **राजा**—सर्वथा हतोस्मि मनोविनोदनोपायाभावादित्यर्थः । **देवी**—' आर्यपुत्र' इति भर्तारं प्रति पत्न्याः सम्बुद्धिः । अत्र सागरः । ' ऊढायां । देवि दयिते पुमानाह प्रियां प्रति । आर्यपुत्र च जीवेश नाथ साप्याह वल्लभम् ॥ ' इति । **विदूषकः**—अपवार्य–एतल्लक्षणं साहित्यदर्पणे 'तद्भवेदपवारितं। रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते । ' इति । दुरागतमनभीष्टमागमनम् । राज्ञा स्वागतमित्युक्ते विदूषकस्येयमुक्तिः । **राजा**—जनान्तिकम्–लक्षणमुक्तं प्राक् । किमत्र प्रतिविधेयं कथमस्य प्रतीकारः कर्तव्यः । **विदूषकः**—लोत्रेण चोरितधनेन । 'लोत्रमश्रुणि चोरिते' इति विश्वः । ...स्तेयं लोत्रं च तद्धनम् ' इत्यमरश्च । सह गृहीतस्य कुम्भीरकस्य चौरस्य । कुम्भीरको गण्डपदस्तस्करश्च मलिम्लुचः । इति कोषः । एतदपि भाषणं जनान्तिकमेवेत्यवगन्तव्यम् । **राजा**–सोयमारम्भो व्यवसायः परस्यान्यस्य समन्वेषणार्थं गवेषणार्थं खलु । 'अत्र राज्ञो दोषप्रच्छादनात् ' नर्मद्युतिः ' नाम सन्ध्यङ्गमुक्तं भवति ' इति काटयवेमः । **देवी**–युज्यत इ०–स्थाने खल्वयं सौभाग्यगोपने प्रयत्न इत्यर्थः । सौभाग्यमत्र दिव्याङ्गनाप्रार्थना । **विदूषकः**–पित्तोपशमनसमर्थं पित्तस्योपशम-

१ मन्दभाग्यः । इ. त्य. ए. पु. । २ (जनान्तिकम् ।) इत्य. ए. पु. । ३ तत्खलु मन्त्रपत्रं यदन्वेषणाय ममायमारम्भः । इ. पा.

भवति । (भोदी तुवरेहि से भोअणं जं पित्तोवसमणसमत्थं होदि ।)

देवी—निपुणिके शोभनं खलु ब्राह्मणेनाश्वासितो वयस्यः । (णि उणिए सोहणं खु बम्हणेन आसासिदो व वअस्सो)

विदू०—भवति ननु पश्य आश्वासितः पिशाचोपि भोजनेन । (भोदि णं पेक्ख आसासिदो पिसाचोवि भोअणेण ।)

राजा—मूर्ख बलादपराधिनं मां प्रतिपादयसि ।

देवी—नास्ति भवतोपराधः । अहमेवात्रापराद्धा या प्रतिकूलदर्शना भूत्वाऽग्रतस्ते तिष्ठामि । इतोहं गमिष्यामि । (णत्थि भवदो अवराहो । अहं एव्व एत्थ अवरद्धा जा पडिऊलदंसणा भविअ अग्गदो दे चिट्ठामि । इदो अहं गमिस्सं । (इति कोपं नाटयित्वा प्रस्थिता ।)

राजा—

अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात् ।
सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ॥ २१ ॥

(इति पादयोः पतति ।)

शान्तिः । तत्र समर्थम् । अनेन राज्ञश्चेष्टितं पित्तजनितभ्रममूलमिति विदूषकस्याशयः । मधुराहारेण कुपितं पित्तं शाम्यतीति वैद्यके प्रसिद्धम् । तदुक्तम् । कफं दुर्जनवत्तीक्ष्णैर्वातं स्नेहेन मित्रवत् । पित्तं जामातरमिव मधुरैर्भोजनैर्जयेत् ॥ इति । **देवी**—निपुणिके शोभनमित्यादि सोल्लुण्ठनं वचः । **विदूषकः**—क्रूरः पिशाचोपि भोजनदानेनाराधितो भवति किमु वक्तव्यं मिष्टान्नभोजनेन शमितपित्तकोपो मम वयस्यः प्रकृतिमापद्येतेति । इति विदूषकस्य भावः । **राजा**—बलात् हठात् । अपराधिनं प्रतिपादयस्युपपादयसि । उन्मत्तवदचेष्टमानमपि मां तथा प्रतिपादयन्निति शेषः । उभयोर्वचनविसंवादात्स्फुटमेव देव्या अपराधशंका जायेतेति राज्ञो भावः । **देवी**—अहमेवापराद्धा मयैवापराधः कृतः । प्रतिकूलदर्शना प्रतिकूलं विरुद्धं अनिष्टमित्यर्थः । दर्शनं यस्याः सा । नाटयित्वाऽभिनीय । **राजा**—अहमपराधी नाम कृतव्यलीकः खलु । हे रम्भोरु रम्भे इव ऊरू यस्याः सा रम्भोरूस्तत्सम्बुद्धिः । नदीत्वाद्ङस्वः । 'ऊरूत्तरपदादौपम्ये' इत्यूङ्प्रत्ययः । प्रसीद प्रसन्ना भव । संरम्भात्कोपाद्विरम । कोपं जहीत्यर्थः । ' संरम्भः संभ्रमे कोपे ' इति विश्वः । आत्मनोपराधित्वमेवोपन्यस्यति । सेव्यः सेवार्हो जनः कुपितश्चेद्दासः सेवकजनो निरपराधोऽपराधरहितः कथं नु स्यात् ।

---

१ ण क्खु अत्थि । २ अतः परं-णिउणिए एहि गच्छम्ह इति क्वचित्

देवी—(आत्मगतम् ।) मा खलु लघुहृदयाहमनुनयं बहुमन्ये । किं त्वेदाक्षिण्यकृतात्पश्चात्तापाद्बिभेमि । (मा खु लहुहिअआ अहं अणुणअं बहुमण्णे । किं दु अदक्खिण्णकिदस्स पच्छादावस्स भाएमि ।)

(राजानमपहाय सपरिवारा निष्क्रान्ता ।)

विद०—प्रावृण्नदीवाप्रसन्ना गता देवी । तदुत्तिष्ठ । (पाउसणदी विअ अप्पसण्णा गदा देवी । ता उट्ठेहि ।)

राजा— (उत्थाय) वयस्य नेदमनुपपन्नम् । पश्य

प्रियवचनशतोपि योषितां दयितजनानुनयो रसादृते ।
प्रविशति हृदयं न तद्विदां मणिरिव कृत्रिमरागयोजितः ॥२२॥

' कथं नु इत्याक्षेपे । प्रभुकोपस्यान्यथानुपपत्यैव दासापराधो निश्चीयत इति भावः । अत्रेर्ष्याकषायितानां स्त्रीणां मानापनयनार्थं सूचितेषु षट्सूपायेषु साम प्रयुक्तमित्यनुसन्धेयम् । तदुक्तं दशरूपके—' स्त्रीणामीर्ष्याकृतो मानः कोपोन्यासङ्गिनि प्रिये ।.....यथोत्तरं गुरुः षड्भिरुपायैस्तमुपाचरेत् । साम्ना भेदेन दानेन नत्युपेक्षारसान्तरैः ॥ ऽत्र प्रियवचनंत साम । ' इति । अत्र राज्ञा अनुनयनात् ' पयुपासनं ' नाम सन्ध्यङ्गमुक्तं भवति । ' इति पादयोः पतति ' इत्यत्र पूर्वप्रयुक्ते सामनि व्यर्थे सति ' नतिः ' नामोपायः प्रयुक्त इत्यनुसंधेयम् । तदुक्तं ' पादयोः पतनं नतिः ' इति । **देवी**—अहं लघुहृदया भूत्वाऽनुनयं मा खलु बहु मन्ये । मयात्मनो मानग्रन्थि शिथिलीकृत्य नैवास्यालीकानुनयो बहुमन्तव्य इत्यर्थः । यद्वाहं मा खलु तथा लघुहृदया भवेयं यथास्यानुनयं इति योज्यम् । किं त्वेतदेव केवलं—अदाक्षिण्यकृतात् प्रणिपातलङ्घनरूपं यन्मेऽदाक्षिण्यं तज्जनितात्पश्चात्तापादनुशयाद्बिभेमि । दाक्षिण्यकृतादिति पाठे मम यद्दाक्षिण्यं स्वभावस्योदारता तेन कृतात्पश्चात्तापादित्यादि योजना । प्रकृतिं गताया मम ध्रुवं ' न मया भर्तुः प्रणिपातमवगणयन्त्या साधु कृतम् ' इति पश्चात्तापो भावी । तेन मयाऽस्वस्थचित्तया भाव्यमिति देव्याशयः । अत्र देव्या भयमुत्तराङ्कवस्तुबीजत्वाद्बिन्दुः । **विदूषकः**—प्रावृण्नदीवाप्रसन्ना रोषकलुषा । शीघ्रगामिनी च । पक्षे पंकिलजला वेगवती च । उत्तिष्ठ न कोप्यधुना तव प्रणिपातस्योपयोग इत्यर्थः । **राजा**—अत्रेदंशब्देन देव्या अप्रसादगमनं परामृश्यते । इदं ' प्रावृण्नदीवाप्रसन्ना गता ' इत्येतन्नानुपपन्नमुपपन्नं योग्यमेव । यतः । **प्रियेति**—दयितजनानुनयो दयितजनस्य प्रियजनस्यानुनयस्तत्कृतं प्रार्थनं प्रियवचनशतोपि प्रियवचनानां शतानि यस्मिंस्तादृशश्चाटूक्तिशतपूर्णोपि रसादृते प्रेम्णा विना । अकृत्रिमप्रेमरहित इत्यर्थः । तद्विदां तद्रसरहितोऽलीकोयमनुनय इति विदन्तीति तासां योषितां हृदयं न प्रविशति चेतस्यन्तरं न लभते । निष्फलो

विदू०—अनुकूलमेवात्रभवत एतत् । न खल्वक्षिदुःक्षितोभिमुखे दीपशिखां सहते । (अणुऊलं एव्व एत्थ भवदो एदं । ण ख़ु अक्खिदुक्खिदो अहिमुहे दीवसिहं सहेदि ।)

राजा— मा मैवम् । उर्वशीगतमनसोपि मे स एव देव्यां बहुमानः । किं तु प्रणिपातलङ्घनादहमस्यां धैर्यमवलम्बिष्ये ।

विदू०—तिष्ठतु तावद्भवतो धीरता । बुभुक्षितस्य ब्राह्मणस्य जीवितमवलम्बतां भवान् । समयः खलु स्नानभोजनं सेवितुम् । (चिट्ठदु दाव भवदो धीरदा । बुभुक्खिदस्स बम्हणस्स जीविदं अवलम्बदु भवं । समओ ख़ु ण्हाणभोअणं सेविदुं ।)

राजा—(ऊर्ध्वमवलोक्य) गतमर्धं दिवसस्य ।

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः ।

भवतीत्यर्थः । अत्रोपमामाह–कृत्रिमरागयोजितः कृत्रिमेण कृतकेन रागेण लोहितादिवर्णेन योजितो युक्तः कृतः । रक्षित इत्यर्थः । मणिः स्फटिकादिस्तद्विदां रत्नपरीक्षकाणां । वैकटिकानामित्यर्थः । रसादते रत्नाम्बुरहितो रत्नानां सहजौज्ज्वल्यरहितः सन् यथा हृदयं न प्रविशति हृदयंगमो न भवति तथा । **विदूषकः**–अनुकूलमिष्टं । अत्रास्मिन्काले । एतद्भवतोनुनयस्तस्या हृदयं न प्रविष्ट इत्येतत् । अक्षिदुःखितश्चक्षुःपीडावान् । अभिमुखे पुरतः । 'अक्षिदुःखितस्येत्यत्र प्राकृते पूर्वनिपातानियमाद् दुःखिताक्षस्येति विधेयम् । यथाक्षिदुःखितोग्रतो दीपशिखां न सहते तथोर्वशीसंक्रान्तहृदयस्त्वमपि देव्या अत्रावस्थानं सोढुमसमर्थः । अतस्तवानुनयमविगणय्य देवी गतेति शोभनमापतितमन्यथा तस्या इहावस्थानाद्भवतश्चित्तवैकल्यमेव स्यादिति विदूषकस्य भावः । **राजा**–बहुमानः परमादरः । प्रणिपातस्य लङ्घनाद्विगणनात् अस्यां देव्यां । अवलम्बिष्य आस्थास्ये । देव्या मम प्रणिपातो लङ्घितः । सा च दक्षिणा । अतो ध्रुवं तया पश्चादनुशयपर्याकुलया भाव्यं येन सा ममानुनयं बहुमंस्यत इति राज्ञो भावः । अत्र प्रणिपातोपाये व्यर्थीभूतेपि राज्ञा स्वयं किंचिदप्यकृत्वा केवलं धैर्यमवलम्ब्यावस्थानात् 'उपेक्षा' नामोपायः प्रयुक्त इत्यनुसंधेयम् । तदुक्तं 'उपेक्षा धैर्यधारणम्' इति । **विदूषकः**–धीरता 'धैर्यमवलम्बिष्ये' इत्येषा कथा । अवलम्बतां स्नानपानभोजनार्थमित उत्थायेति शेषः । स्नानं च भोजनं च स्नानभोजनम् । **उष्णालुरिति**–उष्णं न सहते उष्णालुरुष्णमसहमानः । 'शीतोष्णतृप्रभ्यस्तदसहने इत्यालुच् । उष्णार्त इति पाठे तपनोष्मणार्तः पीडितः । शिखा-

तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ॥ २१ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति द्वितीयोऽङ्कः ।

तृतीयोऽङ्कः ।

(ततः प्रविशतो भरतशिष्यौ ।)

प्रथमः—सखे पल्लव महेन्द्रसदनं गच्छतोपाध्यायेन त्वमासनं

स्यास्तीति शिखी मयूरः । व्रीह्यादिपाठादिनिः । तरोः शिशिरे शीतले मूलालवाले मूलकृतजलावापप्रदेशे । आ सन्तालवं जललवमालात्यागृह्णातीत्यालवालम् । 'स्यादालवालमावालमावापः' इत्यमरः । निषीदत्युपविशति । षट्पदो भ्रमरः । कर्णिकारमुकुलानि परिव्याधाख्यवृक्षकलिकाः । 'अथ द्रुमोत्पलः कर्णिकारः परिव्याधे' इत्यमरः । एतत्पुष्पवर्णनं कुमारसंभवे—'वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः । ' इति । तेनायं सौगन्ध्यहीन इति ज्ञायते । उपरि अग्रतो निर्भिद्य विदार्यालीयतेन्तर्लीनो भवति । कारण्डवो जलकुक्कुटस्तप्तं वारि विहाय त्यक्त्वा तीरनलिनीं स्थलकमलिनीं सेवत आश्रयते । क्रीडावेश्मनि लीलागारे वर्तमान एष पुरोवर्ती पञ्जरशुकः पञ्जरस्थकीरः क्लान्तः आतपक्लान्तः । पिपासाकुलित इत्यर्थः । सज्जलं याचते प्रार्थयते । **इति श्रीमद्विक्रमोर्वशीयटीकायामर्थप्रकाशिकायां द्वितीयोऽङ्कः ।**

अधुना राज्ञः फलभूतोर्वशीसमागमानुकूलमहेन्द्रानुग्रहावर्थसूचनार्थं भरतमुनिशिष्यसंवादमवतारयति । **ततः प्रविशतो भरतशिष्यावि**ति—त्वमासनं प्रतिग्राहितः । अत्र गौणे कर्मणि क्तः । 'गौणे कर्मणि दुह्यादेः प्रधाने निहक्ष्वहाम् । बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया' ॥ इत्युक्तत्वात् । न च दुह्याच्पच्दंड्रुधिप्रच्छिचिब्रुशासुजिमथ्मुषाम् । कर्मयुक् स्यादकथितं तथा स्यान्नीहृक्ष्वहाम् ॥ ' इत्यत्र पाठाभावाद्विकर्मतैव नास्तीति वक्तव्यं । अकथितं च इत्यनेन विहितायाः कर्मसंज्ञाया अर्थनिबन्धनत्वात् । न चार्थनिबन्धनत्वेपि दुह्यादिना केनापि धातुना समानार्थतैव ग्रहेर्नास्तीति वाच्यम् । दण्डिग्रह्योः समनार्थत्वात् । अर्थनिबन्धनत्वे किं प्रमाणमित्यपि न गदितव्यम् । अहमपीदमचोद्यं चोद्ये इति तद्राजसूत्रे भाष्ये प्रच्छिपर्यायस्य चुदेरपि द्विकर्मताया भाष्यकारचरणैरपि स्वीकृतत्वात् । अतएव भट्टिरपि 'स्थातुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम् ।' इति प्राङ् । एतेन-'अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक' इत्यादयः प्रयोगा अपि व्याख्याताः । तथा च 'जग्राह द्युतरुं शक्रं' इति प्रयोगस्यापप्रयोगत्वेन प्रति-

प्रतिग्राहितः । अग्निशरणसंरक्षणाय स्थापितोहम् । अतः खलु पृच्छामि । अपि गुरोः प्रयोगेण दिव्या परिषदाराधिता ।

द्वितीयः—गालव न जाने आराधिता न वेति । तस्मिन् पुनः सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयंवरे तेषु तेषु रसान्तरेषु तन्मय्यासीत् । किं तु । (गालव ण आणे आराहिदा ण वत्ति । तस्सिं उण सरस्सईकिदकव्वबन्धे लच्छीसअंवरे तेसु तेसु रसन्तरेसु तम्मआ आसि । किं तु)

प्रथमः—सदोषावकाश इव ते वाक्यशेषः ।

द्वितीयः—आम । तस्मिन्नुर्वश्या वचनं प्रमादस्खलितमासीत् । (आम । तहिं उव्वसीए वअणं पमादक्खलिदं आसि ।)

प्रथमः—कथमिव ।

द्वितीयः—लक्ष्मीभूमिकायां वर्तमानोर्वशी वारुणीभूमिकायां वर्तमानया मेनकया पृष्टा । सखि समागता एते त्रैलोक्यसुपुरुषाः सकेशवाश्च लोकपालाः । कतमस्मिंस्ते भावाभिनिवेश इति । (लच्छीभूमिआए वट्टमाणा उव्वसी वारुणीभूमिआए वट्टमाणए मेण-

पादनमाग्रहमूलमित्यवगन्तव्यम् । अधुना विषयान्तरमुज्झित्वा प्रकृतमनुसरामः । अग्निशरणसंरक्षणाय अग्निशरणमग्निशाला तस्य संरक्षणं सम्यगवेक्षा । 'शरणं गृहरक्षित्रोः' इत्यमरः । प्रयोगेण रूपकाभिनयेन । परिषद् सभा । आराधिता प्रीता । **द्वितीयः**—सरस्वतीकृतकाव्यबन्धे सरस्वत्या कृतः काव्यबन्धः । वस्तुरचनेति यावत् । यस्य तस्मिन् । लक्ष्मीस्वयंवरे तदाख्यरूपके । रसान्तरेषु । तत्तन्नटविशेषाभिनेयवशादनुकूलविभावानुभावव्यभिचारिसंयोगात्प्रादुर्भवत्सु शृङ्गारादिरसविशेषेषु । तन्मयी विगलितवेद्यान्तरा तदेकपरा । **प्रथमः**—सदोषावकाशः दोषस्यावकाशोवसरस्तेन सह वर्ततेऽसौ । **द्वितीयः**—आमेति स्मरणे । 'आमानुगुप्ये स्मरणे' इति त्रिकाण्डी । प्रमादस्खलितं प्रमादादनवधानात्स्खलितमन्यथोच्चारितम् । लक्ष्मीभूमिकायां भूमिकावेषपरिग्रहः । 'भूमिका रचनायां स्यान्मूर्त्यन्तरपरिग्रहे' इति विश्वः । अन्यरूपैर्यदन्यस्य प्रवेशः स तु भूमिका । ' इति भरतश्च । वारुणी वरुणपत्नी ।

१ सखे पेलव अग्निशरणान्महेद्रमन्दिरं गच्छतोपाध्यायेन त्वमासनं ग्राहितः । अहमग्निशरणरक्षणार्थमवस्थापितः। अतः पृच्छामि गुरोः प्रयोगेण देवपरिषदाराधिता न वेति। इ. पा. २ गालव ण आणे कहं आराहिता भोदि । तस्सिं उण सरस्सईकिदकव्वबन्धे लच्छीसअंवरे उव्वसी तेसु तेसु रसन्तरेसु उम्माइआ आसि । इ. पा.

आए पुच्छिदा । सहि समाअदा एदे तेलोक्कसुपुरिसा सकेसवा अलोअवाला । कम्मस्सि दे भावाहिणिवेसोत्ति)

प्रथमः—ततस्ततः ।

द्वितीयः—ततस्तया पुरूषोत्तम इति भणितव्ये पुरूरवसीति निर्गता वाणी । (तदो ताए पुरिसोत्तमेत्ति भणिदव्वे पुरूरवसित्ति णिग्गदा वाणी ।)

प्रथमः—भवितव्यतानुविधायीनीन्द्रियाणि[1] । न खलु तामभिक्रुद्धो गुरुः ।

द्वितीयः—सा खलु शप्तोपाध्यायेन । महेन्द्रेण पुनरनुगृहीता । (सा खु सत्ता उवज्झाएण । महिन्देण उण अणुगहिदा ।)

प्रथमः—कथमिव ।

द्वितीयः—येन ममोपदेशस्त्वया लङ्घितस्तेन न ते दिव्यं स्थानं भविष्यतीत्युपाध्यायस्य शापः । महेन्द्रेण पुनः प्रेक्षणावसाने लज्जावनतमुखी भणिता यस्मिन्बद्धभावासि तस्य मे रणसहायस्य राजर्षेः प्रियमत्र करणीयम् । सा त्वं यथाकामं पुरूरवसमुपतिष्ठस्व यावत्स त्वयि दृष्टसंतानो भवेदिति । (जेण मम उवदेसो तुए लङ्घिदो तेण ण दे दिव्वं ठाणं हविस्सदित्ति उवज्झाअस्स सावो । महिन्देण उण पेक्खणावसाणे लज्जावणदमुही भणिदा जस्सि बद्धभावा सि तस्स मे रणसहाअस्स राएसिणो पिअं एत्थ करणिज्जं । सा तुमं जहा-

---

सुपुरुषाः पुरुषश्रेष्ठाः । लोकपालाश्च । भावाभिनिवेशो दृढप्रेमबन्धः । **द्वितीयः**—पुरुषोत्तम इति भणितव्ये यत्र पुरुषोत्तमे इति भाषणमावश्यकमासीत् तत्र । **प्रथमः**—भवितव्यतानुविधायीनि भवितव्यतामनुविदधति इत्येवंशीलानि । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । 'आतोयुक्चि णिङ्कृतोः'। इति युक् च । भाव्यर्थानुसारीणि खलु । 'निषेधवाक्यालंकारजिज्ञासानुनये खलु'। इत्यमरः । तामभिक्रुद्धः । 'क्रुधद्रुहोरुपसृष्टयोः कर्म' इति द्वितीया। **द्वितीयः**—येन यस्मात् । उपदेशः शिक्षा । लङ्घितोऽनवधानात्तिरस्कृतः । न ते दिव्यं स्थानं भविष्यति स्वर्गाच्युता मर्त्यलोकं गमिष्यसीत्यर्थः । प्रेक्षणावसाने प्रयोगान्ते । लज्जावनतमुखी लज्जयावनंत मुखं यस्याः सा । रणेषु सहायः रणसहायस्तस्य । यथाकाममुपतिष्ठस्व । संग-

---

१ बुद्धीन्द्रियाणि । इ. पा.

कामं पुरूरवसं उवचिट्ठ जाव सो तुइ दिट्ठसंताणो भोदित्ति ।)

प्रथमः—सदृशं पुरुषान्तरविदो महेन्द्रस्य ।

द्वितीयः—(सूर्यमवलोक्य) कथाप्रसङ्गेनास्माभिरपराद्धाऽभिषेकवेला खलूपाध्यायस्य । तदेह्यस्य पार्श्वपरिवर्तिनौ भवावः । (कथाप्पसङ्गेण अह्मेहिं अवरद्धा अहिसेअवेला क्खु उवज्झाअस्स । ता एहि से पासपरिवत्तिणो होम ।) (इति निष्क्रान्तौ ।)

विष्कम्भकः ।

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—

सर्वः कल्ये वयसि यतते लब्धुमर्थान्कुटुम्बी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय ।
अस्माकं तु प्रतिदिनमियं सादयन्ती शरीरम्
सेवाकारा परिणतिरहो स्त्रीषु कष्टाऽधिकारः ॥ १ ॥

तिकरणे तद् । **प्रथमः**–सदृशमनुरूपं पुरुषान्तरविदः अन्यः पुरुषः पुरुषान्तरं तद्वेत्तीति पुरुषान्तरवित्तस्यान्यान्तःकरणसाक्षिणः । **द्वितीयः**–कथाप्रसङ्गेन संभाषणयोगेन । अपराद्धाभिषेकवेला स्नानसमयस्यातिपातः कृत इत्यर्थः । उपाध्यायस्य गुरोः । उपेत्याधीयतेऽस्मादित्युपाध्यायः । **विष्कम्भकः** । तल्लक्षणं सुधाकरे–' तत्र विष्कम्भको भूतभाविवस्त्वंशसूचकः । अमुख्यपात्ररचितः संक्षेपैकप्रयोजनः ॥ द्विधा स शुद्धो मिश्रश्च मिश्रः स्यान्नीचमध्यमैः । शुद्धः केवलमध्योयमेकानेककृतो द्विधा ॥ इति । अयं नीचमध्यमकृतत्वान्मिश्रः । **कञ्चुकीति**–कञ्चुकिलक्षणं यथा–' अन्तःपुरचरो राज्ञां वृद्धो विप्रो गुणान्वितः । सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥ इति । मातृगुप्ताचार्या अप्याहुः–' ये नित्यं सत्यसम्पन्नाः कामदोषविवर्जिताः । ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः ॥' इति । **सर्व इति** । सर्वः कुटुम्बं पुत्रदारादिपोष्यवर्गोऽस्यास्तीति कुटुम्बी । ' कुटुम्बं पोष्यवर्गे ' इत्यमरमाला । कल्ये निरामये वयसि पूर्ववयसीत्यर्थः । ' कल्यं प्रभाते मधुनि सज्जे दक्षे निरामये । ' इति हैमः । ' कल्पे ' इति पाठे समर्थे वयसि तारुण्य इति स एवार्थः । अर्थान् धनादिविषयान् लब्धुं प्राप्तुं यतते सप्रयत्नो भवति । ' अर्थः प्रयोजने वित्ते हेत्वभिप्रायवस्तुषु । शब्दाभिधेयविषये स्यान्निवृत्तिप्रकारयोः ' ॥ इति विश्वलोचनः । पश्चात्तारुण्योत्तरकाले पश्चिमे वयसीत्यर्थः । पुत्रैरपहृतो भरः कुटुम्बपोषणभारो यस्य तादृशः सन् विश्रमाय विश्रान्तये कल्पते प्रभवति । एवमन्येषां दैवशालिनां वयःपरिणतिः सुखावहा भवति । तु किंतु अस्माकं कञ्चुकिनां परिणतिः वार्धक्यं प्रतिदिनं दिने

१ कल्ये–कल्पे, लब्धुं–भोक्तुं. शरीरं–प्रतिष्ठां, साधयन्ती प्रतिष्ठाम्. अहो–अभूत् ।

(परिक्रम्य ।) आदिष्टोऽस्मि सनियमया काशीराजपुत्र्या—यथा व्रतसंपादनाय मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः । तदेव मद्वचनाद्विज्ञापयेति । यावदिदानीमवसितसंन्ध्याजाप्यं महाराजं पश्यामि । (परिक्रम्यावलोक्य च ।) रमणीय खलु दिवसावसानवृत्तान्तो राजवेश्मनि । इह हि

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो
धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः ।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धाजनः ॥२॥

दिने शरीरं सादयन्ती शरीरधातूनामपचयात्क्षीणतरं कुर्वत्यपि सेवाकारा सेवा एव कारा बन्धनगृहं यस्यास्तादृशी । सेवासान्तत्त्यात्तस्यां बद्धेव । यद्वा सेवा रूपा । अन्यत्र सेवायां स्थविरभावस्यानपेक्षितत्वादन्तःपुरसेवायां तस्यैवापेक्षितत्वात् । अधुना स्त्रीसेवावैषम्यविषण्ण आह । ' अहो ' इति विस्मये । स्त्रीष्वधिकारोन्तःपुररक्षाकर्म कष्टः पीडाकरः खलु । ' अस्माकं सेवा प्रतिदिनं शरीरं सादयन्ती कारा परिणतिर्यस्यास्तादृशी ' इति केचिद्योजयन्ति । तन्न सम्यग् । सेवायाः शरीरसादस्यासाधारणकारणत्वाभावात् । कारापरिणतिशब्दस्यार्थसौष्ठवादर्शनाच्च । मन्दाक्रान्ता वृत्तम् । लक्षणं गतपूर्वम् । सनियमया व्रतस्थया । संपादनमनुष्ठानम् । मानमभिमानमीर्ष्याकृतं कोपं । तदेव यन्निपुणिकामुखेन याचितस्तदेवेत्यर्थः । अवसितसन्ध्याजाप्यमवसितं समाप्तं सन्ध्या च जाप्यं जपादिकर्म च सन्ध्याजाप्यं तस्य । दिवसावसानवृत्तान्तो दिनात्ययप्रकारः । ' वृत्तान्तः स्यात्प्रकरणे प्रकारे कात्स्न्र्यवार्तयोः ' इत्यमरः । **उत्कीर्णा** इति—निशानिद्रालसा निशायां या निद्रा तयालसा दोषातननिद्राभिभूता बर्हिणो मयूराः । बर्हमस्त्यस्यासौ बर्ही । अस्त्यर्थे ' इनिः ' । ' मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् । ' इत्यमरः । वासयष्टिषु वासार्थं यष्टयस्तासु निवासदण्डेषु उत्कीर्णा टङ्कोल्लिखिताकृतय इव तेषां निश्चलत्वात् । जालविनिःसृतैर्जालेभ्यो गवाक्षेभ्यो विनिःसृतैर्निष्कामद्भिः धूपैरगुर्वादिसुरभिद्रव्योत्थैः वलभयो गोपानस्यः संदिग्धपारावताः संदिग्धाः संशयिताः पारावताः कपोता यासु तादृश्यः । दृश्यन्ते इति शेषः । ' सौधान्यत्यर्थतापात्वलभिपरिचयद्वेषिपारावतानि ' इति मालविकाग्निमित्रम् । ' जालं वृन्दगवाक्षयोः ' इति रभसः । ' गोपानसी तु वलभी छादने वक्रदारुणि । इति ।' पारावतः कलरवः कपोतः । इति चामरः । आचारप्रयत आचारेण प्रयतः पवित्रो यद्वा आचारे दिनकृत्ये प्रयतस्तत्परः । शुद्धान्तवृद्धाजनः शुद्धान्तेऽन्तःपुरे वृद्धाजनो स्त्रीसमूहः सपुष्पबलिषु पुष्पैः सहिताः सपुष्पा बलय उपहारा येषु तेषु स्थानेषु अर्चिष्मतीः प्रकृष्टप्रकाशवतीः । मङ्गलार्था दीपिका मङ्गलदीपिकाः सन्ध्यायां मङ्गलदीपिकाः सन्ध्यामङ्गलदीपिकाः । विभजते तत्त-

(नेपथ्याभिमुखं दृष्ट्वा) अये इत एव प्रस्थितो देवः ।

परिजनवनिताकरार्पिताभिः परिवृत एष विभाति दीपिकाभिः ।
गिरिरिव गतिमानपक्षलोपादनुतटपुष्पितकर्णिकारयष्टिः ॥ ३ ॥

यावदेनमवलोकनमार्गे स्थितः प्रतिपालयामि ।

(ततः प्रविशति यथानिर्दिष्टो राजा विदूषकश्च ।)

राजा—(आत्मगतम् ।)

कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण ।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ॥ ४ ॥

कञ्चुकी—(उपगम्य ।) जयतु जयतु देवः । देव देवी विज्ञापयति—मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः । तत्र संनिहितेन देवेन प्रतिपालयितुमिच्छामि यावद्रोहिणीसंयोग इति ।

राजा—आर्य लातव्य विज्ञाप्यतां देवी यस्ते छन्द इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

राजा—वयस्य किं परमार्थत एव देव्या व्रतनिमित्तोऽयमारम्भः स्यात् ।

विदूषकः—भो तर्कयामि जातपश्चात्तापा तत्रभवती व्रतापदेशेन

त्स्थानेषु निवेशयति । 'पवित्रः प्रयतः पूतः' इत्यमरः । शुद्धान्तोन्तःपुरे गुह्यकक्षाभेदे च भूपतेः ।' इत्यजयः । बलिर्दैत्योपहारयोः' इति हैमः । **परिजनेति**—परिजनवनिताकरार्पिताभिर्दासीजनहस्तधृताभिर्दीपिकाभिः परिवृतः परिगत एष देवः । अनुतटं पुष्पिताः सञ्जातकुसुमाः कर्णिकारयष्टयो द्रुमोत्पलाख्यवृक्षस्तंभा यस्य तादृशः । अपक्षलोपात्सपक्षतया गतिमान् गिरिरिव विभाति । अत्र गिरेरपक्षलोपकल्पनात्कल्पितोपमालंकारः । पुष्पिताग्रा वृत्तम् । 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।' इति तल्लक्षणम् । अवलोकनमार्गे दृष्टिपथे । **कार्येति**—कार्येण व्यवहारालोकनादिना अन्तरिता तिरोभूतोत्कण्ठा यस्मिंस्तादृशं दिनं मया अनतिकृच्छ्रेण नातिकष्टेन नीतमतिवाहितम् । 'स्यात्कृच्छ्रं कष्टमाभीलम्' इत्यमरः । अविनोदाद्दीर्घा यामाः प्रहरा यस्याः साऽविनोददीर्घयामा रात्रिः कथं नु गमयितव्या नेतव्या । **कञ्चुकी**—सुदर्शनः शोभनदर्शनः सुष्ठु सुखेन दृश्यत इति वा । संनिहितेनासन्नवर्तिना देवेन सह । यावद्रोहिणीसंयोगो भवतीति शेषः । तावत् । **राजा**—छन्दोऽभिप्रायः । इच्छेति यावत् । 'अभिप्रायश्छन्द आशयः' इत्यमरः । तवेच्छामनुवर्ते इत्य० । **विदूषकः**—व्रतापदेशेन व्रतमिषेण । प्रमार्ष्टुकामा अपनेतुमनाः ।

भवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति । (भो तक्केमि जादपच्चादावा त्तभोदी, वदावदेसेण भवदो पणिपादलङ्घणं पमज्जिदुकामात्ति ।)

राजा—उपपन्नं भवानाह । तथा हि ।

अवधूतप्रणिपाताः पश्चात्संतप्यमानमनसोऽपि ।
निभृतैर्व्यपत्रपन्ते दयितानुनयैर्मनस्विन्यः ॥५॥

तदादेशय मणिहर्म्यपृष्ठमार्गम् ।

विदू०—इत इतो भवान् । अनेन गङ्गातरङ्गसश्रीकेण स्फटिकमणिसोपानेनारोहतु भवान्प्रदोषावसररमणीयं मणिहर्म्यम् । (इदो इदो भवं । इमिणा गङ्गातरङ्गसस्सिरीएण[1] फलिअमणिसोवाणेण आरोहदु भवं पदोसावसर[3]रमणिज्जं मणिहम्मिअम् ।)

राजा—आरोहाग्रतः ।

(सर्वे सोपानारोहणं नाटयन्ति ।)

विदू०—(निरूप्य ।) भोः प्रत्यासन्नेन चन्द्रोदयेन भवितव्यम् । यथा तिमिररिच्यमानं पूर्वदिशामुखमालोकसुभगं दृश्यते । (भो पच्चासण्णेण चन्दोदएण होदव्वम् । जह तिमिरेरइअमागं पुव्वदिसामुहं आलो[4]असुहअं दीसदि ।)

राजा—सम्यगाह भवान्[5] ।

उदयगूढशशाङ्कमरीचिभिस्तमसि दूरमितः प्रतिसारिते ।
अलकसंयमनादिव लोचनं हरति मे हरिवाहनदिङ्मुखम् ॥६॥

राजा—उपपन्नं युक्तम् । **अवधूतेति**—अवधूतप्रणिपाता अवधूतस्तिरस्कृतः प्रणिपातः प्रणतिर्याभिस्तादृश्यो मनास्विन्यो मानिन्यः पश्चात्प्रणिपातलङ्घनादूर्ध्वं संतप्यमानमनसोपि पश्चात्तापेनाकुलीक्रियमाणा अपि दयितानुनयैः प्रियकृतप्रसादनोपायैर्निभृतैः प्रच्छन्नमेव व्यपत्रपन्ते लज्जिता भवन्ति । न त्वात्मनो लज्जां प्रकटयन्ति मानहानिप्रसङ्गादिति भावः । विविधैरनुतप्यन्ते दयितानुशयैरिति पाठे त्वर्थः स्पष्ट एव । किंत्वयं पाठस्तस्य बहुषु लिखितपुस्तकेष्वनुपलम्भादनुशयशब्देवैयर्थ्याच्चोपेक्षणीयः । **विदूषकः**—गङ्गातरङ्गसश्रीकेण गङ्गातरङ्गवच्छोभमानेन । सोपानमारोहणमार्गः । सह विद्यमान उप उपरि आनो गमनमनेनेति सोपानम् । प्रदोषावसररमणीयं निशामुखमनोहरम् । **विदूषकः**—आलोकसुभगमालोके सुभगं रम्यालोकम् । **उदयेति**—उदयेन उदयपर्वतेन गूढो यः

---

१ मनसो हि विविधैरनुतप्यन्ते इ. पा. २ सिसिरिएण [शिशिरेण]. ३ पदोसावसर-सव्व दा; मणिहम्मिअम्—मणिहम्मपिट्ठअलम् । (पृष्ठतलं) इ. पा. ४ आलोआसुहअं—आलोहिअप्पहम् । इ. पा. ५ सम्यग्भवान्मन्यते इ. पा.

विदूषकः—ही ही । भोः एष खण्डमोदकसश्रीक उदितो राजा द्विजातीनाम् । (ही ही भो एसो खण्डमोदअसस्सिरीओ उदिदो राआ दूआंदीणां ।)

राजा— (सस्मितम् ।) सर्वत्रौदरिकस्याभ्यवहार्यमेव विषयः । (प्राञ्जलिः प्रणम्य ।) भगवन् क्षपानाथ

रविमावसते सतां क्रियायै सुधया तर्पयते सुरान्पितॄंश्च ।
तमसां निशि मूर्च्छतां निहन्त्रे हरचूडानिहितात्मने नमस्ते॥७॥

(इत्युपतिष्ठते)

शशाङ्कस्तस्य मरीचिभिर्मयूखैरितोऽस्मात्प्रदेशात्तमसि दूरं प्रतिसारिते निरस्ते सति । हरिवाहनदिङ्मुखं पूर्वदिशामुखं । हरी अश्वविशेषौ वाहनं यस्य स हरिवाहन इन्द्रः । तदुक्तं शालिहोत्रे—' त्वक्केशबालरोमाणि सुवर्णाभानि यस्य तु । हरिः स वर्णतोश्वस्तु पीतकौशेयसप्रभः ॥' इति । तस्य दिक् प्राची तस्या मुखम् । इन्द्रो हि पूर्वाशायाः स्वामीति सुप्रसिद्धमेव । अलकसंयमनादिव केशकलापबन्धनादिव मे मनो हरति । अत्र तमोदूरप्रतिसारणस्य नयनानन्दहेतुकेनालकसंयमनत्वेन सम्भावनात् हेतूत्प्रेक्षा । **विदूषकः**—खण्डमोदकसश्रीकः खण्डशर्करापिण्डसदृशः । राजा द्विजातीनाम् । अत्र हरिवंशः—ततस्तस्मै (चन्द्राय) ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । बीजौषधानां विप्राणामपां च जनमेजय ॥ ' इति ॥ **राजा**—औदरिकस्य उदरे प्रसितः औदरिक आहारप्रियस्तस्य । ' आखूनः स्यादौदरिकः इत्यमरः । अभ्यवहार्यमन्नम् । **रविमिति**—सतां सज्जनानां क्रियायै दर्शेष्टिपितृयज्ञादिक्रियासिद्ध्यर्थं रविमावसते सूर्येण संगच्छमानाय । " चन्द्रमा वा अमावास्यायामादित्यमनुप्रविशति । सोन्तर्धीयते । तं न निर्जानन्ति । " इति ऐतरेयब्राह्मणम् । सुधयाऽमृतेन सुरान् पितॄंश्च तर्पयते प्रीणयते । चन्द्रस्य किल षोडश कलाः । तासां पञ्चदश कलाः कृष्णपक्षे देवैः पर्यायेण पीयन्ते । एवं निपीत एकया कलयावशिष्टश्चन्द्रोमावास्यायां सूर्यं प्रविशति । स च तं शुक्लपक्ष कलाभिर्वर्द्धयते । इति शास्त्रकारा मन्यन्ते तथा च देवीपुराणे—" कलाः षोडश सोमस्य शुक्ले वर्धयते रविः । अमृतेनामृते कृष्णे पीयते दैवतैः क्रमात् ॥ प्रथमां पिबते वह्निर्द्वितीयां पवनः कलाम् । विश्वेदेवास्तृतीयां तु चतुर्थीं तु प्रजापतिः । पञ्चमीं वरुणश्चापि षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या वसवोष्टौ तथाष्टमीम् । नवमीं कृष्णपक्षस्य पिबतीन्द्रः कलामपि । दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् । द्वादशीं तु कलां विष्णुर्धनदश्च त्रयोदशीम् । चतुर्दशीं पशुपतिः कलां पिबति नित्यशः ॥ ततः पञ्चदशीं चैव पिबन्ति पि-

---

१ ओसधीणम् । इ. पा. २ रुचिमावहते । इ. पा.

विदू०——भो ब्राह्मणसंक्रामिताक्षरेण ते पितामहेनाभ्यनुज्ञात आसनस्थितो भव । यावदहमपि सुखासीनो भवामि । (भो बह्मणसंकमिदक्खरेण दे पिदामहेण अब्भणुण्णादो आसणट्ठिदो होहि । जाव अहं वि सुहासिणो होमि ।)

राजा——(विदूषकवचनं परिगृह्योपविष्टः । परिजनं विलोक्य ।) अभिव्यक्तायां चन्द्रिकायां किं दीपिकापौनरुक्त्येन । तद्विश्राम्यन्तु भवत्यः ।

परिजनः——यद्देव आज्ञापयति । (जं देवो आणवेदि) (इति निष्क्रान्तः ।)

राजा——(चन्द्रमसमवलोक्य) वयस्य परं मुहूर्तादागमनं देव्याः । तद्विविक्ते कथयामि स्वामवस्थाम् ।

विदू०——ननु दृश्यत एव सा । किं तु तादृशमनुरागं प्रेक्ष्य शक्यं खल्वाशाबन्धेनात्मानं धारयितुम् । (णं दीसई एव्व सा । किं दु तारिसं अणुराअं पेक्खिअ सक्कं क्खु आसाबन्धेण अत्ताणअं धारिदुम् ।)

तरः कलाम् । कलावशिष्टो निष्पीतः प्रविष्टः सूर्यमण्डलम् । अयामां विशते रश्मावमावाशी ततः स्मृतः ॥ ' इति । निशि मूर्च्छतां रात्रौ प्रभवतां तमसां तमःसंघातस्य निहन्त्रे विनाशयित्रे । हरस्य शिवस्य चूडायां निहित आत्मा कलारूपो यस्य तस्मै । ते तुभ्यं नमः । **विदूषकः**—ब्राह्मणसंक्रामिताक्षरेण ब्राह्मणे । मयि इत्यर्थः । संक्रामितानि निवेशितानि अक्षराणि स्ववाच्यानि येन । मन्मुखेन वदता इति यावत् । पितामहेन चन्द्रेण । **राजा**—दीपिकापौनरुक्त्येन व्यर्थेन दीपिकाप्रकाशेन इत्यर्थः । **विदूषकः**——तादृशमनुरागं उर्वश्या ' नन्दनवनवाता अप्यत्युष्णाः शरीरके ' इत्यादिशब्दैर्व्यक्तीकृतमित्यर्थः ।

---

१ मतान्तरे यथा—प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः।विश्वेदेवास्तृतीयां तु चतुर्थीं सलिलाधिपः। पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः। सप्तमीमृषयो दिव्या अष्टमीमज एकपात्। नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम्।दशमीं पिबते वायुः पिबत्येकादशीमुमा। द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम्। चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः। निःपीतः कलावशेषश्चन्द्रमा न प्रकाशते। कला षोडशिका या तु अपः प्रविशते सदा। अमायां तु सदा सोम ओषधी प्रतिपद्यते। तमोषधीगतं गावः पिबन्त्यम्बुगतं च यत्। तत्क्षीरममृतं भूत्वा मन्त्रपूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्याय्यते शशी। दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्णता ॥ इति माधवीयकालनिर्णयः।

राजा—एवमेतत् । बलवान्पुनर्मम मनसोऽभितापः ।

नद्या इव प्रवाहो विषमशिलासंकटस्खलितवेगः ।
विघ्नितसमागमसुखो मनसिशयः शतगुणो भवति ॥ ८ ॥

विदूषकः—यथा परिहीयमाणैरङ्गैराधिकं शोभसे तथादूरे प्रियासमागमं ते प्रेक्षे । (जहा परिहीअमाणेहिं अङ्गेहिं अहिअं सोहसि तहा अदूरे पिआसमागमं ते पेक्खामि ।)

राजा—(निमित्तं सूचयित्वा) वयस्य

वचोभिराशाजननैर्भवानिव गुरुव्यथम् ।
अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः ॥ ९ ॥

विदूषकः—न खल्वन्यथा ब्राह्मणस्य वचनम् । (ण खु अण्णहा बम्हणस्स वअणं ।)

राजा—(सप्रत्याशस्तिष्ठति ।)

(ततः प्रविशत्याकाशयानेनाभिसारिकावेषा उर्वशी चित्रलेखा च)

आशाबन्धेन बध्यतेऽनेनेति बन्धो बन्धनमाशैव बन्ध आशाबन्धस्तेन । **राजा**—एवमेतत् । अत्र दृष्टोर्वशीदृढानुरागस्य विदूषकवचसोत्तेजितस्य उर्वशीप्राप्त्याशाऽवगम्यते । लक्ष्यालक्ष्यरूपतया किंचिदुद्भिन्नस्य बीजस्य मुहुरन्वेषणाद्गर्भसन्धिरपि । तस्य पताकाविरहेपि न कापि क्षतिरिति बोध्यम् । तदुक्तं दशरूपके–'गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः । द्वादशाङ्गः पताका स्यान्न वा स्यात्प्राप्तिसंभवः ॥' इति । अभिताप औत्सुक्यम् । **नद्या इति**—विषमशिलासंकटस्खलितवेगो विषमा निम्नोन्नताः शिलास्ताभिः संकटोत एव स्खलितवेगो नद्याः प्रवाह इव । स यथा शतगुणः शतधा विभक्तो भवति तथा । विघ्नितसमागमसुखो विघ्नितं समागमसुखं यस्य स तथोक्तो मनसिशयः कामः । शृङ्गाररूपेण मनसि शेतेऽसौ मनसिशयः । 'अधिकरणे शेतेः' इत्यच् । 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । शतगुणो भवति शतधा वर्धते । **विदूषकः**–परिहीयमाणैरपक्षीयमाणैः । **वचोभिरिति**–आशाजननैरुर्वशीसमागमाशोत्पादकैर्वचोभिर्भवानिवायं दक्षिणो वामेतरो बाहुर्गुरुव्यथं दुर्धरमनःसंतापं मां स्पन्दितैः स्फुरणैराश्वासयति समाधत्ते । 'दक्षिणश्चतुरो हि दुःखितमाश्वासयति' इति रङ्गनाथः । अत्र बाहुस्पन्दनलिङ्गेनोर्वशीप्राप्त्यनुमानात् 'अनुमानं' नाम सन्ध्यङ्गमुक्तम् । अभिसारिकावेषा अभिसारिकाया वेषो यस्याः सा । नायिकाया गणिकात्वेऽभिसरणवर्णनं कर्तव्यम् । यदुक्तम्– 'कुलजां गणिकां प्रेष्यां यथार्हैर्वेषचेष्टितैः । रागातिशयसम्पन्नां वर्णयेदभिसारिकाम् ॥' इति । अभिसारिकालक्षणमुक्तं प्राक् । रङ्गनाथोद्धृतमभिसारिकालक्षणं यथा–'हित्वा लज्जां समाकृष्य

उर्वशी—(आत्मानं विलोक्य ।) हला चित्रलेखे अपि रोचते तेऽयं मेऽल्पाभरणभूषितो नीलांशुकपरिग्रहोभिसारिकावेषः । (हला चित्तलेहे अवि रोअदि दे अअं मे अप्पाभरणभूसिदो णीलंसुअपरिग्गहो अहिसारिआवेसो ।)

चित्रलेखा—नास्ति मे वाग्विभवः प्रशंसितुम् । इदं तु चिन्तयामि । अपि नामाहं पुरूरवा भवेयमिति (णत्थि मे वाआविहवो पसंसिदुं । इदं तु चिन्तेमि । अवि णाम अहं पुरूरवा भवेअं ति ।)

उर्वशी—सखि मदनः खलु त्वामाज्ञापयति—शीघ्रं नय मां तस्य सुभगस्य वसतिम् । (सहि मदणो खु तुमं आणवेदि सिघ्घं णेहि मं तस्स सुहअस्स वसदिं ।)

चित्रलेखा—नन्वेतत्परिवर्तितामव कैलासशिखरं प्रियतमस्य ते भवनमुपगते स्वः । (णं एदं परिवत्तिदं विअ केलाससिहरं पिअदमस्स दे भवणं उवगदह्म ।)

उर्वशी—तेन हि प्रभावाज्जानीहि तावत् क्व स मम हृदयचोरः किं वानुतिष्ठतीति । (तेण हि पहावदो जाणीहि दाव कहिं सो मम हिअअचोरो किं वा अणुचिट्ठदित्ति ।

चित्रलेखा—(ध्यात्वा । आत्मगतम् ।) भवतु क्रीडिष्यामि तावत्

मदेन मदनेन वा । अभिसारयते कान्तं स्वयं वा साऽभिसारिका ॥' इति । **उर्वशी**—' अल्पाभरणभूषितः ' इत्यत्र 'मुक्ताभरणभूषितः ' इत्यपि पाठः । तत्र रङ्गनाथव्याख्या यथा—' मुक्ताभरणस्त्यक्तभूषणस्तथापि भूषितः । मुक्ताफलरूपाभरण इत्यर्थस्तु अन्धकाराभिसारिकाया विरुद्ध इति ध्येयम् । ' इति । नीलांशुकपरिग्रहः नीलस्यांशुकस्य परिग्रहो यस्मिन् । **चित्रलेखा**—वाग्विभवो वर्णनसामर्थ्यम् । **उर्वशी**—शीघ्रं नय मामित्यादिना औत्सुक्यं व्यज्यते । **चित्रलेखा**—परिवर्तितं रूपान्तरेण परिणामितम् । **उर्वशी**—प्रभावात् प्रभावशब्दो व्याख्यातचरः । **चित्रलेखा**—क्रीडिष्यामि—अत्र क्रीडाशब्दो नर्मवाची । क्रीडा खेला च नर्म च' इत्यमरः । मनोरथ०—मनोरथानुरूपं लब्धा या प्रिया

---

१ सहि असमत्था खु अहं । तुम आणेहि तं सिग्घं णेहि मं तस्स वा सुहअस्स वसदिम् । [सखि असमर्था खल्वहम् । त्वमानय तं शीघ्रं नय मां वा तस्य सुभगस्य वसतिम् ।] इ.पा. । अयं सर्वथोपेक्ष्य एव । २ णं पडिबिम्बिअं विअ जामिणीजमुनाए कैलाससिहरसस्सिरीअं [ननु प्रतिबिम्बितमिव यामिनीयमुनायां कैलासशिखरसश्रीकं] इ. पा..

देतया । (प्रकाशकम् ।) हला एष मनोरथलब्धप्रियासमागमसुखमनुभवन्नुपभोगक्षमेऽवकाशे तिष्ठति । (भोदु कीलिस्सं दाव एदाए । हला एसो मणोरहलद्धपिआसमाअमसुहं अणुहवन्तो उवहोअक्खमे ओआसे चिट्ठदि ।)

उर्वशी—[1](विषादं नाटयति ।)

चित्रलेखा—मुग्धे का पुनरन्या चिन्ता प्रियासमागमस्य । (मुग्धे का उण अण्णा चिन्ता पिआसमाअमस्स ।)

उर्वशी—(सोच्छ्वासम् ।) अदक्षिणं संदिग्धे मे हृदयम् । (अदक्खिणं संदेहदि मे हिअअं ।)

चित्रलेखा—(विलोक्य ।) एष मणिहर्म्यगतो वयस्यमात्रसहायो राजर्षिः । तदेह्युपसर्पाव एनम् । (एसो मणिहम्मिअंगदो वअस्समेत्तसहाओ राएसी । ता एहि उवसप्पाम णं ।)

(उभे अवतरतः ।)

राजा—वयस्य रजन्या सह विजृम्भते मदनबाधा ।

उर्वशी—अनिर्भिन्नार्थेनानेन वचनेनाकम्पितं मम हृदयम् । अन्तरिते एव शृणुवोस्य स्वैरालापं यावदावयोः संशयच्छेदो भवति ।

तस्याः समागमस्य सुखम् । पक्षे मनोरथेन सङ्कल्पमात्रेण लब्धो यः प्रियाया उर्वश्याः समागमस्तस्य सुखम् । उपभोगक्षमे संभोगयोग्ये । अत्र सव्याजवचनाश्रयणात् ' अभूताहरणम् ' नाम सन्ध्यङ्गमुक्तमित्यनुसन्धेयम् । तदुक्तम्- ' अत्र व्याजाश्रयं वाक्यमभूताहरणं मतम् ।' इति । **चित्रलेखा**—अन्या चिन्ता त्वामन्तरेण । त्वमेव सा प्रिया ममाभिप्रेता यस्याः समागमं सोनुभवतीत्यर्थः । अत्र यथार्थकथनात् 'मार्गः' नाम सन्ध्यङ्गमुक्तम् । **उर्वशी**—अदक्षिणमनुदारमविचक्षणं संदिग्धार्थं वचनमिदंतया परिच्छेत्तुमसमर्थमित्यर्थः । **राजा**—रजन्या सह यथा यथा रजनी वर्धते तथा तथा मदनबाधा वर्धते इत्यर्थः । **उर्वशी**—अनिर्भिन्नार्थेन अनिर्भिन्नः अस्पष्टोर्थः यस्य । आक-

---

१ अस्मात्परं-अण्णो सो जणो जो एवं भवे (अन्यः स जनो य एवं भवेत्) इत्य० । रङ्गनाथस्त्वेवं पठति-अवेहि हिअअं मे ण पत्तिआदि । हला चित्तलेहे हिअए काउण किंवि जप्पासि । प्पिअसमागमस्स अग्गदो जेव्व अणेन अवहिदं मे हिअअं [अपेहि हृदयं मे न प्रत्येति । सखि चित्रलेखे हृदये कृत्वा किमपि जल्पिसि । प्रियसमागमस्याग्रत एवानेनापहृतं मे हृदयम्] २ हम्मिअप्पासाद,०सादपिट्ठ इ. पा.

(अणिम्भिण्णत्थेण इमिणा वअणेण आकम्पिदं मे हिअअं । अन्तरिदा एव्व सुणाम से सेरालावं जाव णो संसअच्छेदो होदि ।)

चित्रलेखा—यत्ते रोचते । (जं दे रोअदि ।)

विदूषकः—नन्वेतेऽमृतगर्भाः सेव्यन्तां चन्द्रपादाः । (णं इमे अमिअगब्भा सेवीअन्दु चन्दवादा ।)

राजा—वयस्य एवमादिभिरनुपक्रम्योयमातङ्कः । पश्य

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः ।
मनसिजरुजं सा वा दिव्या ममालमपोहितुम्—

उर्वशी—का वापरा । (का वा अवरा ।)

राजा—

रहसि लभयेदारब्धा वा तदाश्रयिणी कथा ॥ १० ॥

उर्वशी—हृदय इदानीं मामुज्झित्वेतः संक्रान्तेन त्वया फलमुपलब्धम् । (हिअअ दाणिं मं[1] उज्झिअ इदो संकन्तेण तुए फलं उवलद्धं ।)

विदूषकः—आम अहमपि यदा शिखरिणीं रसालं च न लभे तदैतत्प्रार्थयमानः संकीर्तयन्नाश्वसिमि । (आम । हंवि जदा[2] सिह-

---

म्पितं ईषत्कम्पितं राजवचनस्यास्फुटार्थत्वात् । स्वैरालापं स्वच्छन्दभाषणं । विश्रम्भालापमिति यावत् । **राजा**–अनुपक्रम्यः अचिकित्स्यः । अशक्यप्रतिकार इत्यर्थः । ' उपक्रमः स्यादुपधाचिकित्सारम्भविक्रमे ।' इति विश्वः । आतङ्कः रोगः संतापो वा । ' आतङ्को रोगसंतापशङ्कासु मुरजध्वनौ । ' इति विश्वलोचनः । **कुसुमेति**–प्रत्यग्रं कुसुमशयनं प्रत्यग्रोद्भूतकुसुमशय्या मम मनसिजरुजं कामजनितसंतापमपोहितुं दूरीकर्तुं नालं न समर्थम् । चन्द्रमरीचयः शिशिरकरकिरणा अपि नालम् । सर्वाङ्गीणं सर्वाङ्गव्यापि मलयजं चन्दनं चन्दनचर्चेत्यर्थः । मणियष्टयो रत्नमाला मणियुक्ता हारा वा मम मदनबाधामपोहितुं नालम् । सा दिव्या मम प्रियतमोर्वशी मनसिजरुजमपोहितुमलं समर्था । वा अथवा रहसि एकान्ते आरब्धा तदाश्रयिणी तत्सम्बन्धिनी कथा मम मदनबाधां लघयेत् लघूकुर्यात् । मम मनःसंतापापोहनं लघूकरणं वा नान्यायत्तमिति भावः । **उर्वशी**–इतो अस्मिन्पुरूरवसि । **विदूषकः**—शिखरिणी–'एला–

---

१ ता (तद्) अन्त०. २ सग्गं । इ. पा. ३ जदा मिच्छहरिणीमांसभोअणं ण०; तदा तमेव चिन्तअन्तो आसादेमि सुहम् । इ. पा.

रिणीं रसालं अ ण लहे तदा णं पत्थयन्तो संकित्तअन्तो आसासेमि ।)

राजा—संपद्यत इदं भवतः ।

विदूषकः—भवानपि तामचिरेण प्राप्स्यति । (भवंवि तं अचिरेण पाविस्सदि ।)

राजा—सखे एवं मन्ये—

चित्रलेखा—शृणु असंतुष्टे शृणु । (सुणु असंतुट्ठे सुणु ।)

विदूषकः—कथमिव । (कहं विअ ।)

राजा—

अयं तस्याः[1] रथक्षोभादंसेनांसो निपीडितः ।
एकः कृती शरीरेस्मिन् शेषमङ्गं भुवो भरः ॥ ११ ॥

चित्रलेखा—सखि किमिदानीं विलम्ब्यते । (सहि किं दाणिं विलम्बीअदि ।)

उर्वशी—(सहसोपसृत्य ।) हला अग्गदोवि मम गदाए उदासीण इव महाराजः । (हला अग्गदोवि मम गदाए उदासीणो विअ महाराओ ।)

चित्रलेखा—(सस्मितम् ।) अतित्वरिते अनुत्क्षिप्ततिरस्करिणीकासि । (अदितुवरिदे अणुक्खित्ततिरक्करिणीआ सि ।)

लवङ्गकर्पूरादिसुरभिद्रव्यमिश्रितं दुग्धेन सह गालितं सितासंगतं दधि शिखरिणीत्युच्यते । दध्यतिरिक्तपूर्वोक्तद्रव्यमिश्रितः पक्वकदलीफलान्तःसारोपि तत्पदवाच्यः । रसालमाम्रविशेषफलम् । ' इति रङ्गनाथः । संकीर्तयन् नाम गृह्णन् । **राजा**—सम्पद्यत इदं भवतः । तव सुखसाध्योभिलाषो न तथा ममेति राज्ञोभिप्रायः । **चित्रलेखा**—शृणु असंतुष्टे—राज्ञः ' एवं मन्ये ' इति प्रतिवचनं विदूषकवचनपरमिति मन्यमानाया इयमुक्तिः । वस्तुतस्तु ' एवं ' इत्यनेन ' अयं तस्याः ' इत्यादि श्लोकार्थ एव परामृश्यत इति बोध्यम् । **अयमिति**—रथक्षोभाद्रथचक्रोद्धातात्तस्या उर्वश्या अंसेन निपीडितः संघट्टितोयमंसोऽस्मिन्मम शरीरे शरीरावयवेषु इत्यर्थः । एक एव कृती धन्यः । शेषमंसव्यतिरिक्तमङ्गं भुवो भर एव केवलम् । अत्रांसस्योत्कर्षाभिधानात् ' उदाहृतिः ' नाम सन्ध्यङ्गमुपक्षिप्तम् । **उर्वशी**—मम गताया इत्यत्र ' षष्ठी चानादरे ' इति षष्ठीति काट्यवेमः । **चित्रलेखा**—अनुत्क्षिप्ततिरस्करिणीका असंहततिरस्करिणीप्रयोगा । **उर्वशी**—

---

१ पुनरिदं.२ इदं तया रथक्षोभादङ्गेनाङ्गं निपीडितम् । एकं कृति शरीरेऽस्मिन् ॥ इ. पा.

(नेपथ्ये)

इत इतो भर्त्री । (इदो इदो भट्टिणी ।)

(सर्वे कर्णौ ददति । उर्वशी सह सख्या विषण्णा ।)

विदूषकः—अविहा अविहा उपस्थिता देवी । तद्वाचंयमो भव । (अविहा अविहा उवट्ठिदा देवी । ता वाचंजमो होहि ।)

राजा—भवानपि संवृताकारमास्ताम् ।

उर्वशी—हला किमत्र करणीयम् । (हला किं एत्थ करणिज्जं ।)

चित्रलेखा—अलमावेगेन । अन्तर्हिते आवाम् । उपवासनियमवेषा राजर्षिमहिषी दृश्यते तन्नैषेह चिरं स्थास्यति । (अलं आवेएण । अन्तरिदा वयं । उववासणिअमवेसा राएसिमहिसी दीसदि । ता ण एसा इह चिरं चिठिस्सदि ।)

(ततः प्रविशति औपहारिकहस्तपरिजना देवी ।)

देवी—(चन्द्रमसमवलोक्य ।) हञ्जे निपुणिके एष रोहिणीसंयोगेनाधिकं शोभते भगवान् मृगलाञ्छनः । (हञ्जे णिउणिए एसो रोहिणीसंजोएण अहिअं सोहदि भअवं मिअलञ्छणो ।)

चेटी—ननु देवीसहितो भर्ता विशेषरमणीयः । णं देवीसहिदो भट्टा विसेसरमणिज्जो ।) (इति परिक्रामतः ।)

विदूषकः—(दृष्ट्वा) भो न जानामि स्वस्तिवाचनं मे ददातीति । अथवा भवतो व्रतव्यपदेशेन मुक्तरोषा प्रणिपातलङ्घनं प्रमार्ष्टुकामेति ।

हला इ०—अत्र देव्यागमनजनितभीतेर्गम्यमानत्वात् 'संभ्रमः' नाम सञ्चार्यङ्गमुपक्षिप्तम् । **चित्रलेखा**—आवेगेन संभ्रमेण । आकुलत्वेनेत्यर्थः । अन्तर्हिते तिरस्करिणीबलादिति ज्ञेयम् । **ततः प्रविशतीति**—औपहारिकहस्तपरिजना औपहारिकं पूजासामग्री हस्ते यस्य । उपहाराणां समूहः औपहारिकम् । 'अचित्तहस्तिधेनोष्ठक्' इति ठक् । 'उपायनमुपप्राभृतमुपहारस्तथोपदा ।' इत्यमरः । **देवी**—रोहिणीसंयोगेन रोहिणी नक्षत्रविशेषस्तस्याः संयोगेन सम्बन्धेन । **चेटी**—विशेषरमणीयः रोहिणीसंयुक्तचन्द्रापेक्षयेत्यर्थः । **विदूषकः**—मह्यं स्वस्तिवाचनं

---

१ मुद्धिमदमुहो । इ. पा. २ अन्तरिदा होम्ह । एसा क्खु विणीदवेसा राआनं सेवन्ती ण एत्थ चिरं चिट्ठदि । (उभे तथा स्थिते ।). ३ धृतोपहारपरिजनाः देवी चेटी च; इ. पा. ४ अस्मात्प्राक्—चेटी—इदो इदो भट्टिनी । देवी (परिक्रम्य).

अद्य ममाक्ष्णोः शुभदर्शना देवी । (भो ण जाणामि सोत्थिवाअणं मे देइत्ति आदु भवदो वदव्ववदेसेण मुक्करोसा पणिपादलङ्घणं पमज्जिदुकामत्ति । अज्ज मे अक्खीणं सुहदंसणा देवी ।)

राजा—(सस्मितम् ।) उभयमपि घटते । तथापि भवता यत्पश्चादभिहितं तन्मां प्रति भाति । यदत्रभवती

सितांशुका मङ्गलमात्रभूषणा
पवित्रदूर्वांकुरलाञ्छितालका ।
व्रतापदेशोज्झितगर्ववृत्तिना
मयि प्रसन्ना वपुषैव लक्ष्यते ॥ १२ ॥

देवी—(उपगम्य) जयतु जयत्वार्यपुत्रः (जेदु जेदु अज्जउत्तो ।)

परिजनः—जयतु जयतु भर्ता । (जेदु जेदु भट्टा[1] ।)

विदूषकः—स्वस्ति भवत्यै (सत्थि भोदीए ।)

राजा—स्वागतं देव्यै । (तां हस्तेन गृहीत्वोपवेशयति ।)

उर्वशी—हला स्थाने खल्वियं देवीशब्देनोपचर्यते । न किमपि परिहीयते शच्या ओजस्वितया । (हला ठाणे क्खु इअं देवीसद्देण उवअरीअदि । ण किंपि परिहीअदि सचीए ओजस्सिदाए ।)

चित्रलेखा—साधु असूयापराङ्मुखं मन्त्रितम् । (साहु असू-

ददाञ्जीति हेतोर्ममाक्ष्णोः सुखदर्शना देवी उत व्रतामिषेण भवतः प्रणिपातलङ्घनस्य निष्कृतिं कर्तुमिच्छतीति सुखदर्शनेति न जानामि । किंतु सा तथेति निश्चितम् । **सितेति**–सितांशुका सितं धवलमंशुकं श्लक्ष्णवस्त्रं यस्याः सा । ' अंशुकं श्लक्ष्णवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः ।' इति मेदिनी । मङ्गल्यमेव मङ्गलमात्रं मङ्गलसूत्रकुङ्कुमतिलककज्जलाद्येव केवलं भूषणं यस्याः सा मङ्गलमात्रभूषणा । पवित्रदूर्वाङ्कुरलाञ्छितालका पवित्रैः दूर्वाङ्कुरैर्लाञ्छिताः शोभिता अलकाः केशा यस्याः सा । व्रतापदेशोज्झितगर्ववृत्तिना व्रतापदेशेन व्रतचर्याव्याजाद् उज्झिता त्यक्ता गर्ववृत्तिः मानिता यस्य तेन वपुषा मयि प्रसन्नेव प्रसन्नप्राया लक्ष्यते । ' वपुषैव ' इति बहुषु पुस्तकेषु पाठः । तत्रास्याः वपुरेवान्तःप्रसन्नतां गमयतीति तस्यार्थः । वपुषैव प्रसन्ना लक्ष्यते किमु वक्तव्यमन्तरपि तथास्यादिति । **उर्वशी**–स्थाने युक्तम् । ' युक्ते द्वे साम्प्रतं स्थाने ' इत्यमरः । उपचर्यते आमन्त्र्यते पूज्यते वा । परिहीयते न्यूना भवति । शच्या इन्द्राण्याः । ओजस्वितया दीप्तिमत्तया । ' ओजो दीप्तौ बले ' इत्यमरः । **चित्रलेखा**–असूया-

---

१ भट्टारओ; एवं देवी इत्यत्र सर्वत्र भट्टिणी इ. पा.

आपरम्मुहं मन्तिदं ।)

देवी—आर्यपुत्रं पुरस्कृत्य कोपि व्रतविशेषो मया संपादनीयः । तन्मुहूर्तमुपरोधः सह्यताम् । (अज्जउत्तं पुरोकरिअ कोवि वदविसेसो मए संपादणीओ । ता मुहुत्तं उवरोधो सहीअदु ।)

राजा—मा मैवम् । अनुग्रहः खलु नोपरोधः ।

विदूषकः—ईदृशः स्वस्तिवाचनवानुपरोधो बहुशो भवतु । (ईरिसो सोत्थिवाअणवन्तो उवरोहो बहुसो होदु)

राजा—किंनामधेयमेतद्देव्या व्रतम् ।

देवी—(निपुणिकामवेक्षते)

निपुणिका—भर्तः प्रियानुप्रसादनं नाम । (भट्टा पिआणुप्पसादणं णाम)

राजा—(देवीं विलोक्य) यद्येवम्

अनेन कल्याणि मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम् ।
प्रसादमाकांक्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते ॥ १३ ॥

उर्वशी—महान् खल्वस्यैतस्यां बहुमानः । (महन्तो खु से इमस्मिं बहुमणो ।)

चित्रलेखाः—अयि मुग्धे अन्यसंक्रान्तप्रेमाणो नागरिका अधि-

पराङ्मुखं असूया ' गुणेषु दोषाविष्करणम् ' इति सिद्धान्तकौमुदी । ' असूया तु दोषारोपो गुणेष्वपि ' इत्यमरश्च । तस्याः पराङ्मुखम् । दोषाविष्करणेच्छारहितम् । यद्वा असूया स्पर्धा । **देवी**—उपरोधः प्रतिबन्धः । **राजा**—किंनामधेयं किन्नामकं । ' रूपनामभागेभ्यो धेयः ' इति धेयप्रत्ययः । **निपुणिका**—प्रियानुप्रसादनं प्रियस्य दयितस्य अनुप्रसादं सान्त्वनम् । **अनेनेति**—हे कल्याणि शोभने । ' बह्वादिभ्यश्च ' इति ङीप् । अनेन व्रतेन व्रतचर्यया आत्मनः मृणालकोमलं मृणालवत्कोमलमतिपेलवं गात्रं शरीरं अकारणमेव कारणं विना ग्लपयसि खेदयसि । ' गात्रं गजाग्रजङ्घादि भागेप्यङ्गे कलेवरे । ' इति विश्वमेदिन्यौ । य उत्सुक उत्कण्ठितः सन् तव प्रसादमाकाङ्क्षति स दासजनस्तव सेवकः किं प्रसाद्यते । तव प्रसादमाकाङ्क्षमाणो दासजनो नैव प्रसादनार्हः इति भावः । **उर्वशी**—बहुमानः आदरः । **चित्रलेखा**—अन्यसंक्रान्तप्रेमाणः अन्यासु

---

१ सोत्थिवाआणएहिं । इ. पा.

कं दक्षिणा भवन्ति । (अई मुद्धे अण्णसंकन्तप्पेम्माणो णाअरिआ अहिअं दक्खिणा होन्ति ।)

देवी—(सस्मितम् ।) नन्वेतस्य व्रतपरिग्रहस्यायं प्रभावो यदेतावन्मन्त्रित आर्यपुत्रः । (णं इमस्स वदपरिग्गहस्स अअं पहावो जं एत्तिअं मन्तावेदो अज्जउत्तो ।)

विदूषकः—विरमतु भवान् । न युक्तं सुभाषितं प्रत्याचरितुम् । (विरमदु भवं । ण जुत्तं सुहासिदं पच्चाचरिदुं ।)

देवी—दारिका उपनयतौपहारिकं यावन्मणिहर्म्यगतांश्चन्द्रपादानर्चामि । (दारीआओ उवणेध ओवहारिअं जाव मणिहम्मिअगदे चन्दपादे अच्चेमि ।)

परिजनः—यद्देव्याज्ञापयति । एष गन्धकुसुमाद्युपहारः । (जं देवी आणवेदि । एसो गन्धकुसुमादि उवहारो ।)

देवी—[1] (नाट्येन गन्धपुष्पादिभिश्चन्द्रपादानभ्यर्च्य ।) हञ्जे एतानौपहारिकमोदकानार्यमाणवकं लम्भय । (हञ्जे इमे ओवहारिअमोदए अज्जमाणवअं लम्भावेहि ।)

परिजनः—यद्देव्याज्ञापयति । आर्यमाणवक एतत्तावत्ते । (जं देवी आणवेदि । अज्ज माणवअ एदं दाव दे ।)

संक्रान्तं प्रेम येषां ते नागरिका विदग्धाः कामिनः । दक्षिणाः स्त्र्युपचारपराः । **देवी**—प्रभावः सामर्थ्यम् । एतावद् एतत्प्रमाणमस्य । ' प्रसादमाकाङ्क्षति इत्यादि । मन्त्रितो वादितः । **विदूषकः**—विरमतु भवान् ' अनेन कल्याणि ' इत्यादिना व्रतानुष्ठाननिराकरणादिति शेषः । सुभाषितं ' आर्यपुत्रमुद्दिश्य कोपि व्रतविशिषो मया संपादनीयः ' इति राज्ञोक्तं ' प्रियानुप्रसादनं नाम ' इति । निपुणिकोक्तं च । प्रत्याचरितुं प्रत्याख्यातुम् । अलं व्रतसंपादनेनाहं प्रसन्न एवास्मीति राज्ञोक्ते देव्या उत्साहभङ्गः स्यादिति हेतोरिति भावः । **देवी**—चन्द्रपादान् अत्र पादशब्दः श्लिष्टः । चरणान् मयूखांश्च । ' पादो बुध्ने तुरीयांशे शैलप्रत्यन्तपर्वते । चरणे च मयूखे च । ' इति मेदिनी । **परिजनः**—

---

१ उवणेध । (नाट्येन कुसुमादिभिश्चन्द्रपादानभ्यर्च्य ।) हञ्जे इमेहिं उवहारेहिं मोदएहिं अ अज्जमाणवअं कञ्चुइअ अच्चेध । इ. पा.

विदूषकः—(मोदकशरावं गृहीत्वा ।) स्वस्ति भवत्यै । बहुफलस्तवोपवासो भवतु । त्सोत्थि भोदीए । बहुफलो दे उववासो होदु ।)

देवी—आर्यपुत्र इतस्तावत् । (अज्जउत्त इदो दाव ।)

राजा—अयमस्मि ।

देवी—(राज्ञः पूजामभिनीय प्राञ्जलिः प्रणिपत्य ।) एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्यपुत्रमनुप्रसादयामि । अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते या चार्यपुत्रस्य समागमप्रणयिनी तया सह मया प्रीतिबन्धेन वर्तितव्यमिति । (एसा अहं देवदामिहुणं रोहिणीमिअलञ्छणं सक्खीकरिअ अज्जउत्तं अणुप्पसादेमि । अज्जप्पहुदि जं इत्थिअं अज्जउत्तो पेत्थेदि जा अ अज्जउत्तस्स समाअमप्पणइणी ताए सह मए पीदिबन्धेण[1] वत्तिदव्वंति ।)

उर्वशी—अहो न जाने किंपरमस्या वचनमिति । मम पुनर्विश्वासविशदं हृदयं संवृत्तम् । (अम्महे ण आणे किं परं से वअणं त्ति । मम उण वीसासविसदं हिअअं संवुत्तं ।)

चित्रलेखा—सखि महानुभावया पतिव्रतया अभ्यनुज्ञातोऽनन्तरायस्ते प्रियसमागमो भविष्यति । (सहि महाणुहावाए पदिव्वदाए अम्मणुण्णादो अणन्तराओ दे पिअसमाअमो हविस्सदि ।)

उपहारः पूजासामग्री । **देवी**—लम्भय-देहि । **विदूषकः**—मोदकशरावः शरावः पात्रविशेषः । उपवासः व्रतचर्यायामुपवासस्य मुख्याङ्गत्वादिदमुक्तम् । ' उपवासः' इत्यत्र 'एतद् व्रतं' इति रङ्गनाथः पठति । अयं पाठो युक्ततरः । किंतु तस्य बहुषु पुस्तकेष्वनुपलम्भादुपरि नास्माभिः संनिवेशितः । **देवी**—पूजामभिनीय नाट्येन पूजां कृत्वा । नटमधिकृत्येयमुक्तिः । देव्या तु पूजा कृतैव । साक्षीकृत्य साक्षिस्थाने कृत्वा । 'साक्षाद्द्रष्टरि संज्ञायाम्' इति मतुबर्थे इनिः । समागमप्रणयिनी समागमे प्रणयः याच्ञा प्रीतिर्वा अस्या अस्तीति । प्रीतिबन्धेन प्रेम्णेत्यर्थः । अनेन नाहमतः परमार्यपुत्रस्यान्यस्त्रीप्रार्थनापरिपन्थिनी भविष्यामीति सूचितम् । अनेन 'औदार्यं' नाम स्त्रीभूषणमुक्तम् । **उर्वशी**—किंपरं कस्यार्थस्य गमकं किंतात्पर्यवत् । यदनयोक्तं तत्परमार्थतस्तथेति सोल्लुण्ठनमेव । विश्वासविशदं विश्वासात्प्रसन्नम् । **चित्रलेखा**—महानुभावया महाप्रभावया । 'अनु-

---

१ वदो (व्रतं) इ. पा. २ कामेदि । इ. पा. ३ ताए सह अप्पडिबन्धेन । इति, ताए समं पीदिवअणेण इति च पाठः ।

विदूषकः—(अपवार्य ।) छिन्नहस्तो मत्स्ये पलायिते निर्विण्णो धीवरो भणति धर्मो मे भविष्यतीति । (प्रकाशम् ।) भवति किं तादृशः प्रियस्तत्रभवान् । (छिन्नहत्थो मच्छे पलाइदे णिव्विण्णो धीवरो भणादि धम्मो मे हविस्सदित्ति । भोदि किं तारिसो पिओ तत्तभवं ।)

देवी—मूढ अहं खल्वात्मनः सुखावसानेनार्यपुत्रं निर्वृतशरीरं कर्तुमिच्छामि । एतावता चिन्तय तावत् प्रियो न वेति । (मूढ अहं खु अत्तणो सुहावसाणेण अज्जउत्तं णिव्वुदसरीरं कादुं इच्छामि एत्तिएण चिन्तेहि दाव पिओ ण वत्ति ।)

राजा—

दातुं वा प्रभवसि मामन्यस्यै हर्तुमेव वा दासम् ।
नाहं पुनस्तथा त्वं यथा हि मां शङ्कसे भीरु ॥ १४ ॥

देवी—भव वा मा वा । यथानिर्दिष्टं संपादितं प्रियानुप्रसादनं व्रतम् । दारिका एत गच्छामः । (होहि वा मा वा । जधाणिद्दिट्ठं संपादिदं पिआणुप्पसादणं वदं । दारिआओ एध गच्छह्म ।) (प्रस्थिता देवी ।)

राजा—प्रिये न खलु प्रसादितोस्मि यदि संप्रति विहाय गम्यते ।

भावः प्रभावे स्यात् ।' इति विश्वः । अभ्यनुज्ञातः । अनन्तरायः निष्प्रत्यूहः । ' विघ्नोन्तरायः प्रत्यूहः' इत्यमरः । **विदूषकः**—छिन्नहस्तः मोघीकृतहस्तकौशलः । निर्विण्णो जातनिर्वेदः । यथा हस्तात्प्रभ्रश्य गभीरनीरं प्रविष्टं मत्स्यं पुनर्ग्रहीतुमसमर्थो धीवरो मयाऽस्मै जीवितदानं कृतमिति पुण्यमेव लब्धव्यमिति मत्वा संतुष्यति तथेयमपि भर्तारं सुराङ्गनाप्रार्थनाया व्यावर्तयितुमशक्नुवाना ' अद्यप्रभृति यां स्त्रियम्' इत्यादि वदतीति विदूषकस्य भावः । तादृशः प्रियः तथा तवाभिमतो यथा मानं विहाय तत्रभवतोभीष्टसम्पादनार्थमत्रभवत्येवमुद्युक्ता । यद्वा तादृश उर्वशीसंक्रान्तरागस्तत्रभवांस्तव प्रियः किमिति योज्यम् । **देवी**—सुखावसानेन सुखव्ययेनापि निर्वृतशरीरं निर्वृतं वीतमदनसंतापं शरीरं यस्य । एतावता अनेन प्रमाणेन । **राजा**—दासं मामन्यस्यै स्त्रियै दातुं वा प्रभवसि समर्थोसि तस्या हर्तुं वा समर्थोसि अहं पुनरहं तावत् हे भीरु भयशीले न तथा अन्यस्त्रीप्रणयी यथा त्वं मां शङ्कसे । अहं सदा त्वत्सेवापर एवेत्यर्थः । **देवी**—'भव वा मा वा' अनेन देव्याचरितं व्रतं दाक्षिण्यादेव केवलं न परमार्थतो

---

१ भिण्णहत्थे. २ किं उदासीणो तत्तभवं । इ. पा. ३ हर्तुमेव वा । नाहं पुनस्तथा भीरु यथा मयि विशङ्कसे ॥ दातुमहसने प्रभवस्यन्यस्यै कर्तुमेव वा दासम् । नाहं पुनस्तथा त्वयि यथा हि...॥ इ. पा.

देवी—आर्यपुत्र अलङ्घितपूर्वो मया नियमः। (अज्जउत्त अलङ्घिदपुव्वो मए णिअमो ।)

[निष्कान्ता सपरिवारा देवी ।]

उर्वशी—हला प्रियकलत्रो राजर्षिः। न पुनर्हृदयं निवर्तयितुं शक्नोमि । (हला पिअकलत्तो राएसी। ण उण हिअअं णिवत्तेदुं सक्कुणोमि ।)

चित्रलेखा—किं पुनस्त्वया निराशया निवर्त्यते । (किं उण तुए णिरासाए णिवत्तीअदि ।)

राजा—(आसनमुपेत्य ।) वयस्य न खलु दूरं गता देवी ।

विदूषकः—भण विश्रब्धं यदसि वक्तुकामः । असाध्य इति वैद्येनातुर इव स्वैरं मुक्तो भवांस्तत्रभवत्या । (भण वीसद्धं जं सि वत्तुकामो । असज्झोत्ति वेज्जेण आदुरो विअ सेरं मुत्तो भवं तत्तहोदीए ।)

राजा—अपि नामोर्वशी—

उर्वशी—अद्य कृतार्था भवेत् । (अज्ज किदत्था भवे ।)

राजा—

गूढा नूपुरशब्दमात्रमपि मे कान्ता श्रुतौ पातयेत्
पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने ।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकम् ॥ १५ ॥

मानिरासादिति गम्यते । यथानिर्दिष्टं यथोक्तम् । **देवी**—अलङ्घितपूर्वो मया नियमः व्रतनियमस्य मयाद्य यावत्कदाप्युल्लङ्घनं न कृतमतो नात्रातः परमवस्थातुमहं शक्ता इत्यर्थः । **उर्वशी**—प्रियकलत्रः प्रियं कलत्रं यस्य । **चित्रलेखा**—किंपुनः किमर्थं त्वं निराशा भूत्वा हृदयं निवर्तयेस इत्यर्थः । 'कथं स्थिराशो निवर्त्यते' इति रङ्गनाथः पठति । **विदूषकः**—आतुरः रुग्णः । स्वैरं स्वेच्छया । **राजा**—अपि नाम उर्वशी इति वाक्यं ' गूढा नूपुरशब्दमात्रं—' इत्यादिवक्ष्यमाणपद्येन सहान्वयि । 'अपि नाम' इत्यवयवसंघात आशंसार्थपरः । **उर्वशी**—अद्य कृतार्था भवेत् । 'इदमुर्वशीवचो राज्ञोऽपरिसमाप्तवचनोत्तरवाक्यत्वेनान्तरेवात्मगतमाशंसनम् ।' इति रङ्गनाथः । **गूढेति**—अपिनाम उर्वशी कान्ता गूढा स्वयमतन्तर्हिता अदृश्यपरूपेत्यर्थः । मे मम श्रुतौ कर्णे नूपुरशब्द-

---

१किं मुधा—मुधे—थिरसोहिदो अप्पा णिन्दी अदि। इ.पा. २ ० देत्य कराम्बुजेन निभृत.

उर्वशी—हला इमं तावदस्य मनोरथं संपादयिष्यामि । (हला इमं दाव से मणोरहं संपादइस्सं ।)

(पृष्ठतो गत्वा राज्ञो नयने संवृणोति ।)

चित्रलेखा—(विदूषकं संज्ञापयति ।)

राजा—(स्पर्शं रूपयित्वा ।) सखे नारायणोरुसंभवा सेयं वरोरूः ।

विदूषकः—कथं भवानवगच्छति । (कहं भवं अवगच्छदि ।)

राजा—किमत्राज्ञेयम् ? ।

अङ्कमनङ्कक्लिष्टं सुखयेदन्या न मे करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः कुमुदम् ॥ १६ ॥

उर्वशी—(हस्तावपनीय किंचिदपसृत्य) जयतु जयतु महाराजः । (जेदु जेदु महाराओ ।)

मात्रमपि मञ्जीरशिञ्जितमात्रमपि पातयेत् कर्णविषयीकुर्यात् । पश्चान्मम पृष्ठतः शनैरेत्य मम लोचने नयने कराम्बुजवृते करकमलपिहिते कुर्वीत वा । अस्मिन्नहम्यें । 'हर्म्यादि धनिनां वासः' इत्यमरः । अवतीर्य साध्वसवशाद्भयवशान्मन्दायमाना । स्तिमितगतिरित्यर्थः । चतुरया कुशलया सख्या चित्रलेखया बलान्ममोपान्तिकं मम समीपे पदात्पदं शनैः शनैरानीयेत वा । **चित्रलेखा**—संज्ञापयति संज्ञां ददाति । **राजा**—वरोरूः वरौ ऊरू यस्याः सा । **अङ्कमिति**—अन्या उर्वश्या इति शेषः । अनङ्कक्लिष्टं स्मरसंतप्तं मेऽङ्कं करस्पर्शान्न सुखयेभिवृतिं प्रापयेत् । उक्तार्थे दृष्टान्तमाह—तपनकिरणैः सूर्यस्यांशुभिः कुमुदं कैरवं नैवोच्छ्वसिति विकसति । चन्द्रस्यांशुभिः किरणैरेवोच्छ्वसिति । अत्र येषां

---

१ चित्र०—हला...संपादेहि । उ०—(ससाध्वसा) कीलिस्सं दाव (इति पृष्ठेन गत्वा राज्ञो नयने सं०). २ अस्मात्पाक्—विदू०—भो वअस्स का उण एसा ।

३ अन्यत्कथमिव पुलकैः कलितं मम गात्रकं करस्पर्शात् ।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः कुमुदम् ॥

इति रङ्गनाथः पठति । तद्व्याख्या यथा—

अन्यदित्यन्यर्थे । तथा च सैवेयमन्यथा करस्पर्शात् । अर्थादस्याः । मम मात्रकं पुलकैः कलितं कथमिव । यद्वा करस्पर्शान्मम गात्रकं पुलकैः कलितं सदन्यदिवानिर्वचनीयावस्थं कथं जातामिति शेषः । पाठान्तरे-अन्या स्त्री अनङ्कक्लिष्टं मदनपीडितं मेऽङ्कं करस्पर्शाद्गात्रकं पुलकैः कलितं सदन्यदिव सुखयति । एतदन्यथानुपपत्यैव सेत्यर्थः । तपनः सूर्यः॥

४ अहाहे । वज्जलेक्खाघडिदं विअ मे हत्थजुअलं ण समत्थिअ अवणेदुं । (इति तथा मुकुलिताक्षी चक्षुषोर्हस्तावपनीय ससाध्वसा तिष्ठति ।) रा०—हस्ताभ्यां गृहीत्वा परिवर्तयति । उ०—(कथंचिदुपसृत्य) जअदु जअदु महाराओ । इ. पा.

राजा—सुन्दरि स्वागतम् । (एकासने उपवेशयति ।)

चित्रलेखा—अपि सुखं वयस्यस्य[1] ? । (अवि सुहं वअस्सस्स ।)

राजा—नन्वेतदुपपन्नम् ।

उर्वशी—हला देव्या दत्तो महाराजः । अतोस्याः प्रणयवतीव शरीरसंपर्कं गतास्मि । मा खलु मां पुरोभागिनीं समर्थयस्व । (हला देवीए दिण्णो महाराओ । अदो से पणअवदी विअ सरीरसंपक्कं गदम्हि । मा खु मं पुरोभाइणिं समत्थेहि ।)

विदूषकः—कथमिहैव युवयोरस्तमितः सूर्यः । (कहं इह ज्जेव तुह्माणं अत्थमिदो सुज्जो ।)

राजा—(उर्वशीमवलोक्य ।)

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेस्मिन् ।
प्रथमं कस्यानुमते चोरितमेतत्त्वया हृदयम् ॥ १७ ॥

चित्रलेखा—वयस्य निरुत्तरैषा । सांप्रतं मम विज्ञाप्यं श्रूयताम् । (वअस्स निरुत्तरा एसा । संपदं मह विण्णप्पं सुणीअदु ।)

राजा—अवहितोस्मि ।

चित्रलेखा—वसन्तानन्तरमुष्णसमये भगवान्सूर्यो मयोपच-

मते सञ्चिन्त्यमानार्थसिद्धिः क्रमस्तन्मतेन ' क्रमः ' नाम सन्ध्यङ्गमुक्तं भवति । तदुक्तं दशरूपके ' क्रमः सञ्चिन्त्यमानास्तिर्भावज्ञानमथापरे । ' इति । **राजा**–उपपन्नं प्राप्तम् । **उर्वशी**–प्रणयवती सखी । पुरोभागिनी दोषदर्शिनी । ' दोषैकदृक्पुरोभागी ' इत्यमरः । देवीसंपर्कोचितशरीरसङ्गतत्वात्पौरोभाग्यम् । **विदूषकः**—कथमिहैव इत्यादि उर्वशीचित्रलेखे प्रति । ' देव्या दत्तो महाराजः– इत्युर्वशीवचः श्रुत्वा राज्ञ्या आगमनात्प्रागेते अत्र आगते स्यातामित्यनुमिमानस्य विदूषकस्योक्तिः । कथं युवाभ्यामासन्ध्यासमयादिहैव स्थितमित्यर्थः । **राजा**— देव्या दत्त इति देव्या अनुमतिर्लब्धेति यद्यस्मिन्मे शरीरे व्यापारमालिङ्गनादिं व्रजसि । तर्हि प्रथमं कस्यानुमते । कस्यानुमत्येत्यर्थः । एतद्धृदयं त्वया चोरितम् । ' अत्र देवीप्रसङ्गेन व्यवहितस्य बीजस्य पुनर्योजनात् ' आक्षेपः ' नाम सन्ध्यङ्ग-मुक्तं भवति । ' इति काटयवेमः । **चित्रलेखा**–वयस्य निरुत्तरा एषा । अत्र ' विकृतं ' नामालङ्कार उक्त । तदुक्तं–'वक्तव्यकालेप्यवचो व्रीडया विकृतं मतम् । ' इति । **चित्रलेखा**–सूर्य उपचरितव्यः–अप्सरसो नृत्यादिना सूर्यं

---

१ अयि मे.

रितव्यः । तद्यथेयं मे प्रियसखी स्वर्गस्य नोत्कण्ठते तथा वयस्येन कर्तव्यम् । (वसन्ताणन्तरे उण्हसमए भअवं सुज्जो मए उवचरिदव्वो । ता जहा इअं मे पिअसही सग्गस्स ण उक्कण्ठेदि तहा वअस्सेण कादव्वं ।)

विदूषकः—भवति किं वा स्वर्गे स्मर्तव्यम् । न वाऽश्यते न वा पीयते । केवलमनिमिषैर्नयनैर्मीना विडम्ब्यन्ते । (भोदि किं वा सग्गे सुमरिदव्वं । ण वा अण्हीअदि ण वा पीअदि । केवलं अणिमिसेहिं णअणेहिं मीणा विडम्बीअन्दि । ।

राजा—भद्रे

अनिर्देश्यसुखः स्वर्गः कस्तं विस्मारयिष्यति ।
अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः ॥ १८ ॥

चित्रलेखा—अनुगृहीतास्मि । हला उर्वशी अकातरा भूत्वा विसर्जय माम् । (अणुगहिदम्हि । हला उव्वसि अकादरा भविअ विसज्जेहि मं ।)

उर्वशी—(चित्रलेखां परिष्वज्य ।) सखि मा खलु मां विस्मर । (सहि मा खु मं विसुमरेहि ।)

पर्यायेणोपचरन्तीति पुराणेषु प्रसिद्धम् । एतत्सर्वं विस्तरेणाग्रे वक्ष्यामः । स्वर्गस्य नोत्कण्ठते इत्यत्र ' अधीगर्थदयेशां कर्मणि ' इति षष्ठी । स्वर्गस्य स्मरणं न करोतीत्यर्थः । एवमुत्तररामचरितेऽपि ' उत्कण्ठते च युष्मत्सन्निकर्षस्य ' इति । अनेन भाविविरहसूचनमित्यप्रिमाङ्कार्थोपक्षेपादङ्कावतारोऽयमिति रङ्गनाथः । **विदूषकः**—न वा अश्यते इ०—देवा हि यज्ञेषु दत्तैर्हविर्भागैरेव तुष्यन्ति न किमप्यन्यददन्ति पिबन्ति वेति प्रसिद्धम् । अनिमिषैः इ०—देवानां मत्स्यानां चाक्षिस्पन्दो न जायते । तेन देवा मत्स्याश्च ' अनिमिषाः ' इत्युच्यन्ते । ' सुरमत्स्यावनिमिषौ ' इत्यमरः । विडम्ब्यन्ते इत्यनेन स्वर्गवासस्य तुच्छत्वं ध्वनितम् । **अनिर्देश्येति**—स्वर्गः अनिर्देश्यसुखः अनिर्देश्यं वक्तुमशक्यं सुखं यत्र स तथोक्तः । कस्तं विस्मारयिष्यति स्वर्गसुखस्य विस्मरणं कारयितुं समर्थ इत्यर्थः । तु किंतु पुरूरवा अस्या अनन्यनारीसामान्यः अन्याभिर्नारीभिः सह सामान्यो न भवतीति अनितरस्त्रीसाधारणः । उर्वशीसंवैकदक्ष इत्यर्थः । दासः । अत्रान्य-

---

१ ' अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते । ' इति पाठः ।

चित्रलेखा—(सस्मितम् ।) वयस्येन संगता त्वमेवैतन्मया याचितव्या । (वअस्सेण संगदा तुमं एव्व एदं मए याचिदव्वा ।) (इति राजानं प्रणम्य निष्क्रान्ता ।)

विदूषकः—दिष्ट्या मनोरथसंपत्त्या वर्धते भवान् । (दिट्ठिआ मणोरहसंपत्तीए वड्ढदि भवं ।)

राजा—इयं तावद्वृद्धिर्मम । पश्य ।

सामन्तमौलिमणिरञ्जितशासनाङ्क-
मेकातपत्रमवनेर्न तथा प्रभुत्वम् ।
अस्याः सखे चरणयोरहमद्य कान्त-
माज्ञाकरत्वमधिगम्य यथा कृतार्थः ॥ १९ ॥

उर्वशी—नास्ति मे विभवोतः प्रियतरं मन्त्रयितुम् । (णत्थि मे विहवो अदो पिअदरं मन्तिदुं ।)

राजा—(उर्वशीं हस्तेनावलम्ब्य) अहो विरुद्धार्थसम्पादयितेप्सितलाभो नाम ।

वैलक्षण्येणोर्वशीसेवाकरणं तेन सखीवियोगदुःखापाकरणं व्यङ्ग्यम् । **विदूषकः**—मनोरथसम्पत्त्या मनोरथस्य सम्पत्तिः सिद्धिः तया । **राजा**—इयं सामन्तेत्यादिपद्ये वक्ष्यमाणार्थरूपा । **सामन्तेति**—हे सखे अस्या उर्वश्याश्चरणयोः कान्तं कमनीयमाज्ञाकरत्वमधिगम्य प्राप्य यथाहमद्य कृतार्थः सफलजीवित इत्यर्थः । तथा सामन्तमौलिमणिरञ्जितशासनाङ्कं सामन्ताः प्रत्यन्तवर्तिभूपतयस्तेषां मौलिषु किरीटेषु ' मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् ' । इति मेदिनी । ये मणयो रत्नानि तै रञ्जितं । मणिप्रभानुलिप्तमित्यर्थः । यत् शासनमाज्ञापत्रं तदेवाङ्कश्चिह्नं यस्य तत् । एकातपत्रं आतपात्रायत इत्यातपत्रं छत्रम् । अत्र राजच्छत्रम् । एकमेव प्रतिद्वन्द्विराजविरहादद्वितीयमातपत्रं यस्मिंस्तत । अवनेः प्रभुत्वं स्वामित्वं । साम्राज्यमिति यावत् । अधिगम्य न कृतार्थः । **उर्वशी**—नास्ति मे विभवः इत्यादि—यन्महाराजेनोक्तं तदेव प्रियभाषणस्य परमा सीमा । अतोपि प्रियभाषणे न मे सामर्थ्यमिति भावः । **राजा**—विरुद्धार्थसम्पादयिता विपरीतार्थघटकः । वस्तुकार्यविपर्ययकारीत्यर्थः । ' नाम '

१ इमां तावन्मनोरथसिद्धिं पश्य; वृद्धिः—समृद्धि. इ. पा.२ पादपीठम् । इ. पा.३ अहो अविरुद्धसंवर्धनमेतदिदानीमीप्सितलम्भानां;—नमीहितफलानाम् । इ. पा.

पादास्त एव शशिनः सुखयन्ति गात्रं
बाणास्त एव मदनस्य ममानुकूलाः ।
संरम्भरूक्षमिव सुन्दरि यद्यदासी-
त्त्वत्संगमेन मम तत्तदिवानुनीतम् ॥ २० ॥

उर्वशी—अपराद्धास्मि चिरकारिका महाराजस्य । (अवरद्धह्मि चिरकारिआ महाराअस्स ।)

राजा—मा मैवम् ।

यदेवोपनतं दुःखात्सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ २१ ॥

विदूषकः—भोः सेविताः प्रदोषरमणीयाश्चन्द्रपादाः । समयः खलु ते वासगृहप्रवेशस्य । (भो सेविदा पदोसरमणीआ चन्दवादा । समओ खु दे वासघरपवेसस्स ।)

राजा—तेन हि सख्यास्ते मार्गमादेशय ।

विदूषकः—इत इतो भवती । (इदो इदो भवदी ।)

इति परिक्रामन्ति ।

राजा—सुन्दरि इयमिदानीमभ्यर्थना[1] ।

उर्वशी—कथमिव । (कथं विअ ।)

आकाश्ये । **पादा इति**—ये त्वत्संगमात्प्राक् संतापदास्त एव शशिनः पादा मयूखा अधुना त्वत्संगमे गात्रं शरीरं सुखयन्ति । ते एव मदनस्य बाणाः स्मरस्य सायका ममानुकूलाः सुखदाः सम्पन्ना ये मां पुराक्लिश्नन् । इत्थं हे सुन्दरि यद्यत् त्वत्सङ्गमनात्प्राक् संरम्भरूक्षमिव कोपपरुषमिव । आवेशदारुणं वा । आसीत्तत्तत्त्वत्संगमेन ममानुनीतमिव कृतसांत्वमिव । आनुकूल्येन परिवर्तितमिवेत्यर्थः । 'संरम्भः संभ्रमे कोपे' इति विश्वः । **उर्वशी**—चिरकारिका मय कालक्षेपः कृतोऽतो महाराजेन विरहदुःखमनुभूतमतः कृतापराधास्मि । **यदेवेति**—यदेव सुखं दुःखादुःखानुभूतेरनन्तरमुपनतमुपस्थितं तदेव रसवत्तरं स्वादुतरम् । 'रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे ।' इति हैमः । तप्तस्य आतपक्लान्तस्य । हि हिरवधारणे । 'हि पादपूरणे हेतौ विशेषेष्ववधारणे ।' इति मेदिनी । तरुच्छाया विशेषतो निर्वाणाय समधिकसुखाय भवतीति शेषः । **विदूषकः**—वासगृहप्रवेशस्य वासगृहं गर्भागारम् । ' गर्भागारं वासगृहम् '

---

१ मनोनुकूलाः । २ मे प्रार्थना । इ. पा.

राजा—

अनुपनतमनोरथस्य[1] पूर्वं शतगुणितेव गता मम त्रियामा।
यदि तु तव समागमे तथैव प्रसरति सुभ्रु ततः कृती भवेयम्॥ २२॥

(इति निष्क्रान्ताः सर्वे ।)

तृतीयोऽङ्कः समाप्तः ।

इत्यमरः । **अनुपनतेति**–अनुपनतमनोरथस्यानुपनतोऽप्राप्तो मनोरथोऽभिलषितार्थस्त्वत्समागमरूपो येन स तथोक्तस्तस्य । मम पूर्वं त्वत्समागमात्प्राक् शतगुणिता शतधा वर्धितेव । रात्रिशततुल्यकालेवेत्यर्थः । त्रियामा रात्रिर्गता याता । त्रयो यामा यस्याः सा त्रियामा । 'आद्यन्तयोरर्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वात् । यद्वा त्रीन् धर्मादीन्यापयति निरवकाशीकरोति कामप्रधानत्वात् । इति भानुजीदीक्षिताः । त्वद्विरहसंतप्तेन मयातिदीर्घतरा रात्रयः क्षपिता इत्यर्थः । हे सुभ्रु इदानीं तव समागमे सति सा रात्रिस्तथैव शतगुणितैव यदि प्रसरति प्रयाति तर्हि ततस्तस्यास्तथाप्रसरणात्कृती कृतार्थो भवेयम् । इदानीं तव समागमे रात्रिर्झटित्येवापेयादतस्तस्या दीर्घभावमभ्यर्थय इत्यर्थः । अत्रेयं सूचनोत्तराङ्ककथोपयोगित्वाद्विन्दुरित्यवगन्तव्यम् ।' इति काटयवेमः । 'सुभ्रु' इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाप्रतिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं नास्ति । अतो ह्रस्वः प्रामादिक इति केचित् । अन्ये तु 'अप्राणिजातेश्चारज्वादीनाम्' इत्यत्र 'अलाबूः' 'कर्कन्धूः' इत्युकारान्तस्याप्यूङ्प्रत्ययमुदाजहार भाष्यकार एतस्मादेव ज्ञापकाच्चिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वत्वमित्याहुः । अत एवाह वामनः–'उकारादप्यूङ् प्रकृतेः' इति ॥ इति कुमारसंभवटीकायां मल्लिनाथः । भ्रूशब्दात् 'अप्राणिजातेः' इत्यादिनोङ् । उवर्णान्तमात्रस्य विधानाद्बहुव्रीहिः । उपसर्जनत्वं च । पुनः स्त्रियामूङ् । अन्तादिवच्चेति पूर्वं प्रत्यन्तत्त्वात्प्रातिपदिकत्वम् । अतः सम्बुद्धौ ह्रस्वत्वम् । इति भट्टिकाव्यटीकायां जयमङ्गलः ।

इति श्रीमद्विक्रमोर्वशीयटीकायामर्थप्रकाशिकायां तृतीयोऽङ्कः ।

१ अनधिगतमनोरथस्य । इ. पा.

चतुर्थोऽङ्कः

(ततः प्रविशति विमानस्था[1] चित्रलेखा सहजन्या च ।)

सहजन्या—(चित्रलेखां विलोक्य ।) सहि म्लायमानशतपत्रस्येव ते मुखस्य च्छाया हृदयस्यास्वस्थतां सूचयति । तत्कथय निर्वेदकारणम् । समदुःखा भवितुमिच्छामि । (सहि[3] मिलाअमाणसदवत्तस्स विअ दे मुहस्स छाआ हिअअस्स अस्सत्थदं सूएदि । तं[4] कहेहि णिव्वेदकारणं । समदुक्खा होदुं इच्छामि ।

चित्रलेखा—सखि अप्सरोवारपर्यायेण इह भगवतः सूर्यस्य पादमूलोपस्थाने वर्तमाना बलवत्खलूर्वश्या उत्कण्ठितास्मि । (हला अच्छरावारपज्जाएण इह भअवदो सुज्जस्य पादमूलोवट्ठाणे वट्टन्ती बलिअं खु उव्वसीए उक्कण्ठिदह्मि ।)

कविरधुनाङ्कान्तरमारभमाणः कथानुसंधानार्थं प्रथमं प्रवेशकमुपक्षिपति ततः प्रविशतीत्यादिना । **सहजन्या**—शतपत्रं कमलम् । 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।' इत्यमरः । छाया छविः । 'छाया सूर्यप्रिया कान्तिः' इत्यमरः । अस्वस्थतां व्याकुलताम् । **चित्रलेखा**—अप्सरोवारपर्यायेण अप्सरसां वाराः सेवासमयाः । 'वारः सूर्यादिदिवसे वारोऽवसरवृन्दयोः ।' इति विश्वः । तेषां पर्यायेण क्रमेणाप्सरोवारपर्यायेण । पादमूलोपस्थाने वर्तमाना । भगवन्तं सूर्यं व्यूह्य तिष्ठन्त ऋष्यप्सरोगन्धर्वादयः पर्यायेण तदुपस्थानं कुर्वन्तीति प्रसिद्धमेव । सूर्यव्यूहवर्णनं भागवते द्वादशस्कन्धे एकादशाध्याये यथा—मध्वादिषु द्वादशसु भगवान्कालरूपधृक् ॥ लोकतन्त्राय चरति पृथग्द्वादशभिर्गणैः ॥ ३२ ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ॥ ३३ ॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुञ्जिकस्थली ॥ नारदः कच्छनीरश्च नयन्त्येते स्म माधवम् ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ॥ रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रम्भा सहजन्या तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ॥ ३६ ॥ इन्द्रो विश्वावसुः श्रोता एलापत्रस्तथाङ्गिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयन्त्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शङ्खपालो नभस्याख्यं नयन्त्यमी ॥ ३८ ॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा । घृताची गौतमश्चेति तपोमासं नयन्त्यमी ॥ ३९ ॥ क्रतुर्वर्चा भरद्वाजः

१ विमानस्था । इत्य. ए. पु. । २ (विलोक्य सखेदम्) । ३ सहि चित्तलेहे . ४ ता कहेहि मअ णिव्वुदिकारणं जेण दे समाणदुक्खा होमि । इ. पा. ४ (सकरुणम्) सहि ।

सहजन्या—जाने युवयोरन्योन्यस्नेहम्। ततस्ततः। (जाणे वो अण्णोण्णसिणेहं। तदो तदो।)

चित्रलेखा—तत एतेषु दिवसेषु को नु खलु वृत्तान्त इति प्रणिधानस्थितया मया अत्याहितमुपलब्धम्। (तदो इमाइं दिवसाइं को णु खु वुत्तन्तोत्ति पणिधाणट्ठिदाए मए अच्चाहिदं उवलद्धं।)

पर्जन्यः सेनजित्तथा ॥ विश्व ऐरावतश्चैव तपस्याख्यं नयन्त्यमी ॥ ४० ॥ अथांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥ ४१ ॥ भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्च पञ्चमः ॥ कर्कोटकः पूर्वचित्तिः पुण्यमासं नयन्त्यमी ॥ ४२ ॥ त्वष्टा ऋचीकतनयः कम्बलश्च तिलोत्तमा ॥ ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषम्भराः ॥ ४४ ॥ विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमासं नयन्त्यमी ॥ ४४ ॥ एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां सन्ध्ययोर्नृणां हरन्त्यंहो दिने दिने ॥ ४५ ॥ द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ जरन्समन्तात्तनुते परत्रेह च सन्मतिम् ॥ ४६ ॥ सामगर्ग्यजुर्भिस्तल्लिङ्गैर्ऋषयः संस्तुवन्त्यमुम् ॥ गन्धर्वास्तं प्रगायन्ति नृत्यन्त्यप्सरसोऽग्रतः ॥ ४७ ॥ उन्नह्यन्ति रथं नागा ग्रामण्यो रथयोजकाः ॥ चोदयन्ति रथं पृष्ठे नैर्ऋता बलशालिनः ॥ ४८ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोऽभिमुखं यान्ति स्तुवन्ति स्तुतिभिर्विभुम् ॥ ४९ ॥ इति। अत्रवर्णितास्वप्सरःसु चित्रलेखाया अनुपलम्भात्कविरेवात्र प्रमाणम्। **चित्रलेखा**—प्रणिधानस्थितया प्रभावाद्यथाभूतवृत्तान्तज्ञानार्थं ध्यानस्थितया। अत्याहितम्। 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि

---

१ एते चादित्यादयः कौर्मे विभज्योक्ताः।

धातार्यमा च मित्रश्च वरुणश्चेन्द्र एव च। विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च। भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथाङ्गिरा भृगुः। गौतमोथ भरद्वाजः कश्यपः क्रतुरेव च। जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः। रथकृच्चोरिष्टनेमिर्ग्रामणीश्च रथस्वनः। रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा। तार्क्ष्यश्चारिष्टनेमिश्च कृतजित्सत्यजित्तथा॥ एते यक्षाः। अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा। वर्चो व्याघ्रस्तथापश्च वायुर्वियद्दिवाकरः। ब्रह्मापेताश्च विप्रेन्द्रा यज्ञापेताश्च राक्षसाः। वासुकी कच्छनीरश्च तक्षकः सर्पपुंगवः। एलापत्रः शङ्खपालस्तदैरावतसंज्ञितः। धनंजयो महापद्मस्तथा कर्कोटको द्विजाः। कम्बलोश्वतरश्चैव वहन्त्येव यथाक्रमम्॥ तुम्बुरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा। उग्रसेनो वसुरुचिर्विश्वावसुरथापरः। चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः। सूर्यवर्चा द्वादशेति गन्धर्वा गायतां वराः॥ कृतस्थल्यप्सरोवर्या तथान्या पुञ्जिकस्थली। मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः। अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा। अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा। रम्भा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृताः॥ इति भावार्थदीपिका।

सहजन्या—(सावेगम्) कीदृशमिव । (कीरिसं विअ)

चित्रलेखा—उर्वशी किल तं रतिसहायं राजर्षिममात्येषु निवेशितराज्यधुरं गृहीत्वा गन्धमादनवनं विहर्तुं गता । (उव्वसी किल तं रदिसहाअं राएसिं अमच्चेसु णिवेसिदरज्जधुरं गेण्हिअ गन्धमादणवणं विहरिदुं गदा ।)

सहजन्या—स नाम संभोगो यस्तादृशेषु प्रदेशेषु । ततस्ततः । (सो णाम संभोओ जो तारिसेसु पदेसेसु । तदो तदो ।)

चित्रलेखा—तत्र खलु मन्दाकिन्याः पुलिनेषु सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका उदयवती नाम तेन राजर्षिणा चिरं निध्यातेति कुपिता उर्वशी । (तहिं खु मन्दाइणीए पुलिणेसु सिअदापव्वदकेलीहिं कीलमाणा विज्जाधरदारिआ उदयवदी णाम देण राएसिणा चिरं णिज्झाइदत्ति कुविदा उव्वसी ।)

सहजन्या—भवितव्यम् । दूरारूढः खलु प्रणयोऽसहनः । ततस्ततः । (होदव्वं । दूरारूढो खु पणओ असहणो । तदो तदो ।)

च ।' इत्यमरः । **सहजन्या**--सावेगम्-आवेगश्चित्ताकुलता । **चित्रलेखा**—रतिसहायं क्रीडाकर्मणि सहायं सखायम् । निवेशितराज्यधुरं निवेशिता निहिता राज्यधुरा राज्यभारो येन तम् । गन्धमादनवनं गन्धेन मादयतीति गन्धमादनो नाम गिरिः हिमवत्पुरस्यौषधिप्रस्थस्योपवनम् । तथा चोक्तं कुमारसंभवे (स. ६. श्लो० ४६) यस्य चोपवनं बाह्यं सुगन्धिर्गन्धमादनः । **सहजन्या**—स नाम संभोगः स एव परमार्थतः संभोगः इत्युच्यते यस्तादृशेषु प्रदेशेषु क्रियते । **चित्रलेखा**—मन्दाकिन्याः भागीरथ्याः । मन्दमकितुं शीलमस्या इति मन्दाकिनी । पुलिनेषु सैकतेषु । मन्दाकिन्याः पुलिनेषु हि विद्याधरादीनां कन्याः केलिं कुर्वन्तीति कवयो वर्णयन्ति । तथा च मेघदूतम्-'मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिर्मन्दाराणामनुतटरुहां छायया वारितोष्णाः । अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः' ॥ इति । निध्याता अनन्यमनसा दृष्टा । निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।' इत्यमरः । **सहजन्या**—भवितव्यं भवितव्यतैव बलीयसी

---

१ (सकरुणम्) उव्वसी किल राएसिं लच्छीसणाहं गेण्हिअ अमच्चेसु णिहितकज्जधुरं केलाससिहरुद्देशं गन्धमादणवणं विहरिदुं गदा । इति, उव्वसी किल उम्मदिदा.....इति, × × × केलाससिहरुद्देसं × × इति च पाठान्तराणि । २ असहणा खु सा । दूरारूढो अ से प्पणओ ता भवितव्वदा एत्थ बलवदी । इ. पा.

चित्रलेखा—ततो भर्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढ-हृदया विस्मृतदेवतानियमा स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा । प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतमस्या रूपम् । (तदो भट्टिणो अणुणअं अपडिवज्जमाणा गुरुसावसंमूढहिअआ विसुमरिददेवतानिअमा इत्थिआजणपरिहराणिज्जं कुमारवणं पइट्ठा । पवेसाणन्तरं अ कणणोवन्तवत्तिलदाभावेण परिणदं से रूवं ।)

सहजन्या[1]—नास्ति विधेरलङ्घनीयं नाम । तस्यानुरागस्यायं नाम एकपद ईदृशोनर्थः । अथ किमवस्थः स राजर्षिः । (णत्थि विहिणो अलङ्घणिज्जं णाम । तस्स[3] अणुराअस्स अअं णाम एक्कवदे ईरिसो अणत्थो । अह किमवत्थो सो राएसी ।)

चित्रलेखा—तस्मिन्नेव कानने प्रियतमां विचिन्वन्नहोरात्रानतिवाहयति । एतेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेनानर्थाधीनो भविष्यति । (तस्सिं[4] एव्व काणणे पियदमं विचिण्णन्तो अहोरत्ते अदिवाहेदि । इमिणा उण णिव्वुदाणंपि उक्कण्ठाकारिणा मेहोदएण अणत्थाहीणो हविस्सदि[5] ।)

अन्यथोर्वशी अकारणं न कुप्येदिति भावः । दूरारूढः काष्ठां गतः । प्रणयः प्रेम । असहनः स्वल्पमपि स्खलनं न सहते इत्यर्थः । **चित्रलेखा**—अप्रतिपद्यमाना अस्वीकुर्वाणा । गुरुशापसंमूढहृदया । गुरुशापेन भरतमुनिशापेन संमूढं मोहं प्राप्तम् । अज्ञानोपहतमित्यर्थः । हृदयं यस्याः । गुरुशापेन मर्त्यभावं प्राप्ताया उर्वश्या हि प्रभावलोपः सञ्जात इति ज्ञेयम् । विस्मृतदेवतानियमा विस्मृतो देवतायाः कार्तिकेयस्य नियमः समयो यया । देवतासमयं च वक्षत्यग्रे 'यैतं प्रदेशं स्त्री प्रवेक्ष्यति' इत्यादिना । स्त्रीजनपरिहरणीयं स्त्रीजनप्रवेशानर्हम् । काननोपान्ते अरण्यप्रान्ते वर्तते तच्छीला लता तस्या भावेन । काननप्रान्तवर्तिनी लता जातेत्यर्थः । **सहजन्या**—नास्ति विधेरलङ्घनीयं न तद्विद्यते यद्विधिन शक्तः विधिरेव सर्वत्र प्रभवतीत्यर्थः । **चित्रलेखा**—अतिवा-

१ कारणन्तरपरिआत्तिणा इ. पा. २ (सशोकम्) इत्य. ३ जेण तारिसस्स अणारिसो एव्व परिणामो संवृत्तो । तदो तदो । इ. पा. ४ तदो सोवि तस्सिं एव्व काणणे पिअदमं अण्णेसअन्तो उन्मत्तीभूतो इदो उव्वसी तदो उव्वसीत्ति कदुअ अहोरात्र अदिवाहेदि । इ. पा. अस्मात्परं—नभो विलोक्येति क्वचित्. ५ अप्पदाआरो इ. पा. ६ नि तक्केमि । इ. त्य. ए. पु.

सहजन्या—सखि न तादृशा आकृतिविशेषाश्चिरं दुःखभागिनो भवन्ति । अवश्यं किमप्यनुग्रहनिमित्तं भूयोपि समागमकारणं भविष्यति । तदेहि उदयोन्मुखस्य भगवतः सूर्यस्योपस्थानं कुर्वः । (सहि ण तारिसा आकिदिविसेसा चिरं दुक्खभाइणो होन्ति । अवस्सं किंपि अणुग्गहणिमित्तं भूओवि समाअमकारणं हविस्सदि । तो एहि उदअम्मुहस्स भअवदो सुज्जस्स उवट्ठाणं करेम्ह ।)

(इति निष्क्रान्ते ।)

(**प्रवेशकः**)

(ततः प्रविशति उन्मत्तवेषो राजा ।)

राजा—आः दुरात्मन् रक्षस्तिष्ठ तिष्ठ । क्व मे प्रियतमामादाय गच्छसि । हन्त शैलशिखराद्गगनमुत्पत्य बाणैर्मामभिवर्षति ।

(विभाव्य ।)

नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शरासनम् ।
अयमपि पटुर्धारासारो न बाणपरंपरा
कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ॥ १ ॥

हयति यापयति । निर्वृतानामप्युत्कण्ठाकारिणा—अनुरूपभावो मेघदूते ' मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः । ' इत्यादिः । **सहजन्या**—आकृतिविशेषाः विशिष्टाः पुरुषाः महात्मानः । अनुग्रहनिमित्तमनुग्रहो निमित्तं यस्य तत् । अत्रावश्यं समागमो भविष्यतीत्यादिनोर्वशीप्राप्तेरवश्यंभावसूचनात् ' नियताप्तिः ' नाम चतुर्थावस्था सूचिता । **प्रवेशकः**—प्रवेशकलक्षणमुक्तम् । **ततः प्रविशतीति**—उन्मत्तवेष उन्मत्तस्य इव वेषो यस्य । अत्र नायकस्य ' उन्मादः ' नाम सप्तमाऽवस्था वर्ण्यते । **राजा**—आ इति कोपे । ' आस्तु स्यात्कोपपीडयोः ' इत्यमरः । क्व मे प्रियतमामादायेत्यादिना परामृष्टस्य बीजस्य नियताप्तिसमन्वयादवमर्शसन्धिः । तल्लक्षणं दशरूपके—' क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात् । गर्भनिर्भिन्नबीजार्थः सोवमर्शः । ' इति । शैलशिखरात् प्रचुराः शिलाः सन्त्यत्र शैलः । ज्योत्स्नादित्वादण् । **नवजलधर इति**—अयं पुरस्ताद् दृश्यमानो नवजलधरो नूतनमेघ एव । संनद्धः कवचधारी हन्तुमुद्युक्तो वा दृप्तोऽतिगर्वितो निशाचरो न । एवमग्रेपि विशेषदर्शनेन पूर्वसंजात-

---

१अणुग्गहणिमित्तं...समाअमो इ. पा. २ (प्राचीमवलोक्य) इ. त्य. ए. पु. ३ आकाशबद्धलक्ष्यः सोन्मादः इ. पा. ४ (विलोक्य) हन्त. ५ (लोष्टं गृहीत्वा हन्तुं धावन् विभाव्य सकरुणम् ।) कथम्.

(विचिन्त्य[1] ।) क नु खलु रम्भोरूर्गता स्यात् ।

तिष्ठत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमदर्शनं नयनयोर्यातेति कोयं विधिः ॥ २ ॥

(दिशोवलोक्य । सनिःश्वासम्) अये परावृत्तभागधेयानां दुःखं दुःखानुबन्धि । कुतः

भ्रमविषयनिषेधो नञो गम्यमानभवनक्रियान्वयाद्द्रष्टव्यः । यदिदं दृश्यते तत्सुरधनुरिन्द्रधनुः न नाम दूराकृष्टं दूरमत्यन्तमाकृष्टं शरासनम् । 'नाम' इति वितर्के । अयमपि पुरोवर्ती पटुस्तीव्रो धारासारो वर्षप्रसर एव । 'धारासंपात आसारः' इत्यमरः । बाणपरम्परा शरवर्षो न । इयमपि च पुरोवर्तिनी कनकनिकषस्निग्धा कनकस्य निकषः कषणरेखा तद्वत्स्निग्धा रुचिरा । दीप्तिमतीत्यर्थः । विद्युत्तडिदेव । मम प्रियोर्वशी न भवतीति शेषः । अत्राविमृष्टविधेयांशत्वं न दोषो नञोर्थस्याभावस्य प्राधान्यात् । एतदेव स्फुटीकर्तुमुदाजहारेमं श्लोकं काव्यप्रकाशकृद्दोषप्रकरणे । हरिणवृत्तम् । तल्लक्षणम्–' नसमरसला गः षड्भिर्दैर्हयैर्हरिणी मता । ' रम्भोरूः रम्भे कदलीस्तम्भाविव मांसलौ वृत्तौ चेत्यर्थः ऊरू यस्याः सा । ' ऊरूत्तरपदादौपम्ये ' इत्यूङ्प्रत्ययः । **तिष्ठदिति**—सा उर्वशी कोपवशात्कोपाविष्टा सती प्रभावपिहिता प्रभावेण अन्तर्धानविद्याशक्त्या पिहितान्तर्हितात्रैव तिष्ठेत् । इति वितर्कः । तस्योत्तरम् । नैवं यस्मात् सा दीर्घं चिरकालं न कुप्यति । एवमग्रेपि योज्यम् । स्वर्गाय स्वर्गं गन्तुम् । ' तुमर्थाच्च भाववचनात् ' इति चतुर्थी । उत्पतिता भवेत् । अस्या मनः पुनर्मयि भावार्द्रं भावेन स्नेहेनार्द्रं सरसम् । तेनैतदपि न । दानवैरपहृता स्यादित्येतदप्यसंभाव्यम् । यतो मे मम पुरोवर्तिनीं तां प्रियां हर्तुं विबुधद्विषोऽसुरा अपि न च शक्ताः समर्थाः । सा च एवं सत्यपि नयनयोरत्यन्तमगोचरं यातेति कोऽयं विधिः प्रकारो दैवं वा । अत्र दीर्घमित्याद्युत्तरवाक्यार्थावगमेनैव पूर्वस्य बाध्यत्वावगमान्न्यूनपदत्वं न दोषो न वा गुणः । उदाहृतश्चायं श्लोक एतदुदाहरणत्वेन काव्यप्रकाशकृता । परावृत्तभागधेयानां प्रतिकूलदैवानाम् । दुःखं दुःखानुबन्धि दुःखमनुबध्नातीत्येवंशीलम् । आपदापदनुबन्धिनी ।

---

१ विचिन्त्य सकरुणम्.२मध्येयं हरिणीभिः स्मितं हिमरूचा नेत्रे कुरङ्गीगणैः कान्तिश्चम्यकः कुड्मलैः कलरवो हा हा हतः कोकिलैः । मातङ्गैर्नगमनं कथं कथमहो हंसैर्विभज्याधुना कान्तारे सकलैर्विनाश्य पशुवन्नीतासि किं मानिनि ॥ चन्द्रश्चण्डकरायते मृदुगतिर्वातोपि वज्रायते माल्यं सूचिकलायते मलयजालेपः स्फुलिङ्गायते । रात्रिः कल्पशतायते विधिवशात्प्राणोपि भारायते हा हन्त प्रमदावियोगसमयः संहारकालायते ॥ इत्यधिकमेकस्मिन्पुस्तके पद्यद्वयम् ।

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपर्द्धिरम्यैः ॥ ३ ॥

(विहस्य ।) मुधैव खलु मया मनसः परितापवृद्धिरुपेक्ष्यते । यथा मुनयोपि व्याहरन्ति राजा कालस्य कारणमिति । तत्किमहं जलदसमयं न प्रत्यादिशामि । अथ वा पावृषेण्यैरेव लिङ्गैर्मम राजोपचारः संप्रति । कथमिव ।

विद्युल्लेखाकनकरुचिरं श्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि ।
घर्मच्छेदात्पटुतरगिरो बन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमाः सानुमन्तः ॥ ४ ॥

भवतु । किमेवं परिच्छदश्लाघया । यावदस्मिन्कानने तां प्रियाम-

अयमिति—अयं तया मम प्रियया सुदुःसहः सुतरां दुःसहो वियोग एकपदे तुल्यकालमुपनतः प्राप्तः । ' तत्समैकपदे तुल्ये सद्यः सपदि च स्मृतम् ' । इति हलायुधः । नववारिधरोदयान्नूतनमेघोदयादहोभिर्दिवसैर्निरातपर्द्धिरम्यैर्निर्गता आतपस्य ऋद्धिः समृद्धिर्येषां तैस्तथोक्तैर्भवितव्यं भाव्यं च । उभयोस्तुल्यकालमुपस्थितिर्जातेत्यहो मम दैवविपर्यास इत्यर्थः । राजा कालस्य कारणम् । अत्र महाभारतम्–' कालो वा कारणं राज्ञो राजा वा कालकारणम् । इति ते संशयो मा भूद्राजा कालस्य कारणम् ' ॥ इति । किं न प्रत्यादिशामि निराकरोमि । ' प्रत्यादेशो निराकृतिः ' । इत्यमरः । अयं भावः–राजा हि कालस्य कारणम् । अतो ममादेशादेवायं जलदसमयः प्रवृत्तः । अत एवास्य प्रत्यादेशोपि मया सुकरः । प्रावृषेण्यैः प्रावृषि भवैः प्रावृट्कालसम्बन्धिभिः । 'प्रावृष एण्यः' इत्येण्यप्रत्ययः । लिङ्गैश्चिह्नैः । उपचारः राजपरिच्छदः । **विद्युदिति**–विद्युल्लेखा एव रेखाकनकं तेन रुचिरं शोभमानमभ्रं मेघ एव मम श्रीवितानं श्रीमदुल्लोचः । निचुलतरुभिः हिज्जलाख्यैर्द्रुमविशेषैः । 'निचुलो हिज्जलेम्बुजः' । इत्यमरः । मञ्जरीचामराणि मञ्जरीरूपाणि चामराणि व्याधूयन्ते । घर्मच्छेदादुष्णकालनाशात् । प्रावृट्समयप्रवृत्त्येति शेषः । पटुतरगिरस्तीक्ष्णतरकेकाः । ' पटुस्तीक्ष्णे स्फुटे दक्षे निष्ठुरे निर्दयेपि च ।' इति रुद्रः । नीलकण्ठा मयूरा एव बन्दिनः स्तुतिपाठकाः । धारासारोपनयनपराः धारासारस्य धारावर्षस्य पक्षे धारारूपं सारं धनं तस्योपनयनं तत्पराः सानुमन्तः पर्वता एव नैगमा वणिजः । 'आसारस्तु प्रसरणे धारावृष्टौ सुहृद्बले ' । इति ' नैगमः क्षुरवेदान्तवणिग्वाणिज्यनागरे । ' इति च विश्वलोचनः । ' सारो बले स्थिरांशे च मज्जि पुंसि जले धने । ' इति मेदिनी । 'धाराहारोपनयनपराः' इत्यपि पाठः ।

---

१ निरातपत्व. २ अथ वा न प्रत्यादिशामि जलदसमयम्.

न्वेषयामि । (विलोक्य ।) हन्त व्यवसितस्य मे संदीपनमिव संवृत्तम् । कुतः

आरक्तराजिभिरियं कुसुमैर्नवकन्दली सलिलगर्भैः ।
कोपादन्तर्बाष्पे स्मरयति मां लोचने तस्याः ॥ ५ ॥

इतो गतेति कथं नु तत्रभवती मया सूचयितव्या ।

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ ६ ॥

(परिक्रम्यावलोक्य च सहर्षम् ।) उपलब्धमुपलक्षणं येन तस्याः कोपनाया मार्गोऽनुमीयते ।

हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्यामभिदं स्तनांशुकम् ॥७॥

मन्दाक्रान्ता छन्दः । परिच्छद उपकरणसामग्री । व्यवसितस्य व्यवसायस्य । संदीपनं प्रोत्साहनम् । **आरक्तेति**–इयं नवकन्दली अचिरोत्पन्ना कन्दली भूकदली 'द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपि ।' इति शब्दार्णवः । आरक्तरजिभिरारक्ता राजयो रेखा येषां तैः । सलिलगर्भैः सलिलं जलं गर्भे अन्तर्येषां तैः । कुसुमैः कोपादन्तर्बाष्पे । कोपादित्यनेन तयो रक्तत्वमपि ध्वनितम् । तस्या लोचने मां स्मरयति । सोत्कण्ठापूर्वकं स्मरणं कारयतीत्यर्थः । **पद्भ्यामिति**–यदि सा सुगात्री शोभनाङ्गी पद्भ्यां वसुमतीं स्पृशेत्ततो मेघाभिवृष्टसिकतासु मेघैरभिवृष्टाः कृतवर्षाः सिकता वालुका यासु तासु वनस्थलीषु वनभूमिषु अस्या गुरुनितम्बतया पृथुकटीपश्चाद्भागभारादित्यर्थः । ' पश्चान्नितम्बः स्त्रीकट्याः ' इत्यमरः । पश्चान्नता निम्ना । निम्नत्वं च सापेक्षमित्यग्रभागापेक्षया निम्नत्वं ज्ञेयम् । अलक्तकाङ्का अलक्तकोऽङ्को यस्यास्तादृशी लाक्षारागचिह्ना । चारुपदपंक्तिश्चारुः सुन्दरा पदपङ्क्तिः पदचिह्नसंततिर्दृश्येत । ' पदं शब्दे च वाक्ये च पदतच्चिह्नयोरपि । ' इति विश्वः । वसन्ततिलकावृत्तम् । अनुरूपवर्णनं शाकुन्तले ' अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात् । ' इति । **हृतोष्ठर गैरिति**–इदं पुरोवर्ति असंशयं ध्रुवं निमग्ननाभेर्गभीरनाभे रुषा कोपाद्विन्नगतेर्विसंष्ठुलचरणसंचारायास्तस्याः निपतद्भिरत एव हृतोष्ठरागैर्हृत ओष्ठरागोधरारुणिमा यैस्तैस्तथोक्तैर्नयनोदबिन्दुभिरश्रुजललवैरङ्कितं चिह्नितं च्युतं शुकोदरश्यामं स्तनांशुकं

---

१ परिक्रम्यावलोक्य च ।

(विभाव्य ।) कथं सेन्द्रगोपं नवशाद्वलमिदम् । कुतो नु खलु निर्जने वने प्रियाप्रवृत्तिरवगमयितव्या[1] (दृष्ट्वा) अये आसारोच्छ्वसितशैलेयस्थलीपाषाणमारूढः

आलोकयति पयोदान्प्रबलपुरोवाततााडिताशिखण्डः ।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ ८ ॥

यावदेनं पृच्छामि । (उपेत्य ।)

नीलकण्ठ ममोत्कण्ठा वनेस्मिन्वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग दृष्टा दृष्टिक्षमा भवेत् ॥ ९ ॥

कथमदृष्ट्वैव प्रतिवचनं नर्तितुं प्रवृत्तः । किं नु खलु हर्षकारणमस्य । (विचिन्त्य ।) भवतु । विदितमेतत् ।

कुचपिधानवस्त्रं भवतीति शेषः । भिन्नगतेर्भिन्नगतिहेतुत्वादिति तत्पुरुषो वा । सेन्द्रगोपमिन्द्रगोपसहितं । इन्द्रगोपो नाम वार्षिको लोहितः कीटविशेषः । शा लं नवतृणप्रचुरा भूमिः । ' शाद्वलं शादहरिते' इत्यमरः । प्रवृत्तिर्वार्ता ' वार्ता प्रवृत्तिर्वृत्तान्त उदन्त स्यात्' इत्यमरः । अवगमयितव्या ज्ञातव्या । आसारेण धारासम्पातेनोच्छ्वासिता बाष्पोद्गमनादुच्छ्वासं कारितेव या शैलेयस्थली पर्वतस्थली तस्याः पाषाणम् । **आलोकयतीति**–प्रबलपुरोवाततााडिताशिखण्डः प्रबलेन पुरोवहता वातेन ताडितः शिखण्डो बर्हः यस्य । ताडित इत्यत्र नर्तितेति पाठः । ' शिखण्डो बर्हचूडयोः ' इति हेमचन्द्रः । शिखी मयूरो दूरोन्नमितेन दूरमुच्छ्रितेन केकागर्भेण कण्ठेनोपलक्षितः पयोदान्मेघानालोकयति । **नीलकण्ठेति**–हे सितापाङ्ग धवलनयनान्त । 'अपाङ्गो नयनस्यान्ते' इत्यजयः । नीलकण्ठ मयूर । अस्मिन्वने दीर्घापाङ्गा आकर्णपूर्णदृगन्ता उत्कण्ठा उन्नतः कण्ठो यस्याः सा कम्बुग्रीवेत्यर्थः । मम वनिता प्रिया दृष्टा किमिति शेषः । दर्शने हेतुमाह । दृष्टिक्षमा दर्शनार्हा भवेत् । अत्र रङ्गनाथटीका यथा–नीलकण्ठेति–सितापाङ्ग धवलदृगन्त नीलकण्ठ मयूर । अस्मिन्वने दीर्घापाङ्ग आकर्णपूर्णनयनान्ता दृष्टिक्षमा दृष्टौ दर्शने क्षमा यस्याः सा नेत्रव्यापारेणैव यदीया क्षान्तिरुन्नीयत इति भावः । अथवा दृष्टिक्षमा दर्शनयोग्या । ' दिष्टिक्षमा' इत्यपि क्वचित्पाठः । तत्पक्षे दिष्टिं कालं क्षमते सा । जीवन्तीत्यर्थः । दृष्टा भवेदिति ममोत्कण्ठास्ति । इत्यस्ती अध्याहार्यौ । मद्वियोगेन प्रायस्तस्या जीवनं न संभाव्यत एवेति भावः । ' दिष्टिर्मुदि परीमाणे दिष्टिः कालोपदिष्टयोः । दिष्टं भाग्येऽथ दृष्टिः स्यान्नेत्रद-

१ भवतु । आदास्ये तावत् । (परिक्रम्य विभाव्य च सास्रम्).२ प्रियाप्रवृत्तिमागमयेयम् । ०त्तिरागमयितव्या । इ. पा. ३ अयमासारोच्छ्वलितशैलतटस्थली०. ४ आ ज्ञातम् । इ.पा.

मृदुपवनविभिन्नो मत्प्रियाया विनाशा-
द्घनरुचिरकलापो निःसपत्नोस्य जातः ।
रतिविगलितबन्धे केशहस्ते सुकेश्याः
सति कुसुमसनाथे किं करोत्येष बर्हीं ॥ १० ॥

भवतु । परव्यसननिर्वृतं न खल्वेनं पृच्छामि । (परिक्रम्य ।) इयमातपान्तसंधुक्षितमदा जम्बूविटपमध्यास्ते परभृता । विहंगमेषु पण्डिता जातिरेषा । यावदेनामभ्यर्थये । भवति ।

त्वां कामिनो मदनदूतिमुदाहरन्ति
मानावभङ्गनिपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं
मां वा नयाशु कलभाषिणि यत्र कान्ता ॥ ११ ॥

र्शनबुद्धिषु ॥' इति विश्वलोचनः ॥ **मृद्वि॰**—अस्य मृदुपवनविभिन्नो मृदुपवनेन मन्दानिलेन विभिन्नो विकसितो घनरुचिरकलापो घनवन्मेघवद्रुचिरः सुन्दरश्चासौ कलापश्च । घनोत्र विद्युद्विशिष्टो ग्राह्यः कलापस्य चन्द्रकवत्त्वात् । यद्वा घनो निबिडश्चासौ कलापः पिच्छभारः । ' कलापः संहते बर्हे काञ्च्यादौ तृणवृन्दयोः ' इति विश्वलोचनः । मत्प्रियाया विनाशात्तिरोधानात् । ' नाशः क्षये तिरोधाने' इत्यमरः । निःसपत्नः सदृशस्याभावात्प्रतिस्पर्धिरहितो जातः । सुकेश्याश्चारुकेश्या उर्वश्या रतिविगलितबन्धे रतौ विगलितः शिथिलो बन्धो यस्य तथाभूते । विस्तीर्णकलापसाम्यार्थमिदम् । कुसुमसनाथे कुसुमैर्युक्ते । अनेन चन्द्रकसाम्यम् । केशहस्ते केशकलापे । ' पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ।' इत्यमरः । सति एष बर्हीं मयूरः किं करोति । हतगर्व एव तिष्ठेदित्यर्थः । किं करोत्यत्र ' कं हरेत् ' इति काव्यप्रकाशे पाठः । कं हरेत् कमनुरञ्जयेदिति तस्यार्थः । अत्र विनाशशब्दस्यामङ्गलव्यञ्जकत्वादश्लीलदोषदुष्टत्वेनोदाहृतोयं श्लोकः काव्यप्रकाशकृता । अत्र रङ्गनाथव्याख्या यथा—' अत्र च विनाशब्दोऽमङ्गलव्यञ्जकत्वादश्लील इति प्रकाशकृदप्रकाशयदिदं पद्यं पददोषेषु । तत्र पूर्वश्लोके दिष्टिक्षमेत्यत्र जीवितसंदेहस्योक्तत्वात्कथमदस्त्वैव प्रतिवचनमित्यत्र प्रतिवचनाप्रदानपुरःसरं नर्तनारम्भाज्जीवितसंदेहस्य तावदवस्थानादेतस्मिन्नेव च पद्ये ' निःसपत्नोऽस्य जातः ' इति सिद्धवदुक्तत्वाद्राज्ञश्चोन्मादोतिशयरूपप्रकृष्टतरकारणवशाद्विप्रलम्भपोषकृदेवैतत्पद्यमिति न कश्चित्तदुक्तदोषलेशावकाश इति प्रतिभाति' ॥ परव्यसननिर्वृतं परव्यसनेन परस्यापदा निर्वृतं सुखितम् । अतापान्तेनोष्णसमयात्ययेन संधुक्षित उद्दीपितो मदो यस्याः सा । **त्वामिति**—कामिनः कामुकास्त्वां मदनदूतिमुदा-

---

१ अद्य. इ. पा.

किमाह भवती । कथं त्वामेवमनुरक्तं विहाय गतेति । शृणोतु भवती ।

कुपिता न तु कोपकारणं सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां न हि भावस्खलितान्यपेक्षते ॥ १२ ॥

कथं कथाच्छेदकारिणी स्वकार्य एव सक्ता ।

महदपि परदुःखं शीतलं सम्यगाहुः
प्रणयमगणयित्वा यन्ममापन्नतस्य ।
अधरमिव मदान्धा पातुमषा प्रवृत्ता
फलमभिमुखपाकं राजजम्बूद्रुमस्य ॥ १३ ॥

एवंगतेपि प्रियेव मे मञ्जुस्वनेति न कोपोऽस्याम् । इतो वयम्—

हरन्ति । स्मरस्येयं दूतीति वर्णयन्तीत्यर्थः । दूतीशब्दो ऱ्हस्वेकारान्तोप्यस्ति । तथा च 'दूत्यां दूतिरपि स्मृता' इतिशब्दभेदप्रकाशे । इति 'इति तेन दूतिविदितं निषेदुषा–' इत्यत्र रघुवंशटीकायां हेमचन्द्रः । "ङीबन्तस्यापि दूतीशब्दस्य छन्दोभङ्गभयाद्ह्रस्वः । 'अपि मापं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिरम् ।' इति केचित् । 'उणादयो बहुलम्' इति बहुलग्रहणाद्ह्रस्व इति वल्लभः ।" इति 'रतिदूतिपदेषु कोकिलाम्' इत्यत्र कुमारसंभवटीकाया मल्लिनाथः । त्वं मानावभङ्गे निपुणं स्त्रीणां रोषनिरासदक्षमित्यर्थः । 'स्त्रीणामीर्ष्याकृतः कोपो मानोन्यासङ्गिनि प्रिये' इति मानलक्षणम् । अमोघं सदैव कार्यसाधकमस्त्रम् । तथा च वर्णनं रघुवंशे 'त्यजत मानमलं बत विग्रहैः–' इत्यादि । कुमारसंभवेपि 'चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज । मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥' इति । अतो हेतोः हे कलभाषिणि तां वा प्रियतमां मम समीपमाशु आनय । मां वा यत्र कान्ता तत्राशु नय । **कुपितेति**— सा मम प्रिया कुपिता रुष्टा । अहं तु सकृदप्येकवारमप्यात्मगतं मत्सम्बन्धि कोपकारणं न स्मरामि । ममापराधमन्तरेणैव कुपितेति भावः । कथमसत्येव कोपकारणे कुपितेति चेच्छृणु । रमणेषु प्रियेषु योषितां प्रभुता स्वामित्वं भावस्खलितानि भावस्य प्रणयस्य स्खलितानि चलनानि नापेक्षते न काङ्क्षति । दूरारूढप्रणयानां कामिनीनां कोपो न प्रीत्यतिक्रमसापेक्षः स्खलनशङ्कापि तासां कोपं जनयितुमलमिति भावः । कथाच्छेदकारिणी प्रतिवचनमदत्त्वैवेत्यर्थः । **महदिति**–परदुःखं महद् दुःसहमपि शीतलमन्येषां व्यथाऽजनकमिति यदाहुः । लौकिका इति शेषः । तत्सम्यग्यथार्थम् । यद्यस्मादापन्नतस्य मम प्रणयं प्रार्थनामगणयित्वाऽनादृत्य मदान्धा मदोपहतविवेकशक्तिरेषा परभृता राजजम्बूद्रुमस्य तत्संज्ञकवृक्षस्याभिमुखपाकमभिमुख आसन्नः पाको यस्य तत्फलमधरमिव

१ अस्मात्परं–सुखमास्तां भवती । साधयामस्तावत् ।

(परिक्रामितकेन । कर्णं दत्त्वा ।) अये दक्षिणेन[1] प्रियाचरणनिक्षेपशंसी नूपुररवः । यावदत्र गच्छामि । (परिक्रम्य) अहो धिग् धिक् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसाम्[2] ।
कूजितं राजहंसानां नेदं नूपुरशिञ्जितम् ॥ १४ ॥

भवतु । यावदेते मानसोत्सुकाः पतत्रिणः सरसो नोत्पतन्ति तावदेतेभ्यः प्रियाप्रवृत्तान्तरवगमयितव्या[3] । (उपेत्य ।) भो भो जलविहंगमराज[4]

पश्चात्सरः प्रतिगमिष्यसि मानसं तत्[5]
पाथेयमुत्सृज बिसं ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव ॥ १५ ॥

यथोन्मुखो विलोकयति मानसोत्सुकेन मया न लक्षितेत्येवं वचनमाह ।

यदि हंस गता न ते नतभ्रूः
सरसो रोधसि दर्शनं प्रिया मे ।

पातुं प्रवृत्ता । 'राजजम्बूर्महाफला' इति त्रिकाण्डी । मालिनीछन्दः । **मेघश्यामा इति**—दिशो मेघैः श्यामा दृष्ट्वा मानसोत्सुकचेतसां मानसे तदाख्यसरसि । उत्सुकमुत्कण्ठितं चेतो येषां तेषां राजहंसानां कूजितं विरुतमिदम् । न नूपुरशिञ्जितं नूपुररवः । 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।' इत्यमरः । पतत्रिणः । पक्षिणः । **पश्चादिति**—मानसं सरः प्रति पश्चाद्गमिष्यसि । तत्त्वया गृहीतं पाथेयं पथि साधु पथि भोज्यम् । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् प्रत्ययः । बिसं मृणालं भूयोग्रहणाय पुनर्ग्रहणाय उत्सृज । गृहीतं बिसं त्यक्त्वा ममोत्तरं दत्त्वा पुनरपि बिसं ग्रहीतुमर्हसीत्यर्थः । मानसोत्का राजहंसा हि मृणालसूत्राणि पाथेयं गृहीत्वा मानसं गच्छन्तीति कवयो वर्णयन्ति । तथा च मेघदूते वर्णनम्—मानसोत्काः । आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ इति । किं तर्हि मया प्रथमं कर्तव्यमित्यपेक्षायामाह तावत्प्रथमं दयिताप्रवृत्त्या मत्प्रियोदन्तकथनेन मां शुचः शोकादुद्धर । कुत एतन्मया कर्तव्यमित्याह—सतां सज्जनानां स्वार्थात्स्वकार्यात् प्रणयिक्रिया प्रणयिनामर्थिनां क्रिया कार्यनिर्वाह एव गुरुतरा महत्तरा । अर्थान्तरन्यासः । अनुरूपभावः कुमारसंभवे—'क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः-शिरसां सतीव ।' इति । यथा उन्मुखो विलोकयति तथा मानसोत्कण्ठितेन मया न तव प्रिया लक्षिता इति वचनमाहेति तर्कयामीति शेषः **यदीति**—हे हंस यदि सा मे नतभ्रूः नते कुटिले भ्रुवौ यस्याः सा । 'अरालं वृजिनं जिह्म-

---

१ दक्षिणेन वनधाराम् । २ चेतसा । कूजितं राजहंसेन । इ. पा. ३ हंसवर जल. इ.पा. ४ त्वम् । इ. पा. ५ पथो०.

मदखेलपदं कथं न तस्याः
सकलं चोर गतं त्वया गृहीतम् ॥ १६ ॥

अतश्च

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥ १७ ॥

(विहस्य ।) एष चोरानुशासी राजेति भयादुत्पतितः[1] (परिक्रम्य ।) अयमिदानीं प्रियासहायश्चक्रवाकस्तावदेनं पृच्छामि ।

रथाङ्गनामन् वियुतो रथाङ्गश्रोणिबिम्बया ।
अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः ॥ १८ ॥

कथं कः क इत्याह । मा तावत् । न खलु विदितोऽहमस्य ।

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः ॥ १९ ॥

मूर्मिमत्कुञ्चितं नतम् । आविद्धं कुटिलं भुग्नम् ' इत्यमरः ॥ । ' नतं..... कुटिलनम्रयोः ' इति मेदिनी । प्रिया सरसो रोधसि तीरे । ' कूलं रोधश्च तीरं च ' इत्यमरः । ते दर्शनं न गता तर्हि हे चोर तस्या मदखेलपदं मदेन खेलानि सलीलानि । सुभगानीति यावत् । पदानि यस्मिंस्तत् । गतं गमनं । ' नपुंसके भावे क्तः ' इति क्तः । त्वया कथं गृहीतम् । गमनप्रकारः शिक्षित इत्यर्थः । अत्र तर्जनस्योक्तत्वात् ' द्युतिः ' नाम सन्ध्यङ्गमुक्तम् भवतीति काटयवेमः । **हंसेति**–हे हंस मे कान्तां प्रयच्छ प्रत्यर्पय । यतोऽस्या गतिस्त्वया हृताऽपहृता । गतिमात्रापहरणे सकला कान्ता प्रत्यर्पयितव्येति कोयं न्याय इत्याकाङ्क्षायां धर्मशास्त्रसंमतिमर्थत उपन्यस्यति । विभावितैकदेशेन विभावितोऽनेन गृहीत इति निर्णीय स्थापितो दृष्टो वा एकदेशश्चोरितद्रव्यांशो यस्य तादृशेन चोरेण यदभियुज्यते चोरितत्वेन निर्दिश्यते तद्देयं स्वामिने पुनर्दातव्यम् । यदाह याज्ञवल्क्यः–' निन्हुतेऽभिहितं नैकमेकदेशविभावितः । दाप्यः सर्वं नृपेणार्थं न प्राप्यस्त्वनिवेदितः ॥ ' इति । चोरानुशासी चोरानुशास्ति दण्डयतीति । **रथाङ्गेति**–हे रथाङ्गनामन् चक्रवाक रथाङ्गश्रोणिबिम्बया रथाङ्गं चक्रं तद्वत्पृथु वृत्तं च श्रोणिबिम्बं श्रोणिमण्डलं यस्याः सा तथोक्ता तया प्रियया वियुक्तो विरहितोऽयं रथी स्यन्दनवान् राजेत्यर्थः । मनोरथशतैरभिलाषशतैर्वृतो युक्तः सन् । त्वां पृच्छति । अतो झटिति त्वयोत्तरं दातव्यमिति भावः । कथं कः क इत्याह अत्र काटयवेमः–" अर्क इति चक्रवाकरुतानुकरणम् । एतदस्य स्वाभाविकमित्यज्ञात्वा ' त्वं कः कः ' इत्येष मामधिक्षिपतीत्याशङ्कते । " इति । **सूर्याचन्द्रमसाविति**–मातामहपितामहौ–' कृतयुगादौ सूर्यनप्ता मनोः पुत्रः सुद्युम्नापर-

---

१ इति अञ्जलिं बध्वा । इत्य० २ अतःपरं यावदन्यमवकाशमवगाहिष्ये इत्य०. ३ समं वृतः पतिस्ताभ्यामुर्वश्या च भुवा च यः । इ. पा.

कथं तूष्णीं स्थितः । भवतु । उपालप्स्ये तावदेनम् ।

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः ।
इति च भवतां जायास्नेहात्पृथक्स्थितिभीरुता
मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः ॥ २० ॥

सर्वथा मदीयानां भागधेयानां विपर्यायेण प्रभावप्रकाशः । यावदन्यमवकाशमवगाहे । (पदान्तरे स्थित्वा ।) भवतु न तावद्गच्छामि ।

इदं रुणद्धि मां पद्ममन्तःकूजितषट्पदम् ।
मया दष्टाधरं तस्याः ससीत्कारमिवाननम् ॥ २१ ॥

भवतु । अस्मिन्नेव कमलाध्यासिनि मधुकरे प्रणयित्वं करिष्ये इतो गतस्यानुशयो मा भूदिति ।

नामा इलो नाम राजा मृगयासङ्गाद्धरनिवारितमुभावनमेकाकी प्रविष्टमात्रः स्त्री बभूव । तामेकाकिनीं सुन्दरीं दृष्ट्वा बुधः कामातुरः सन्नाश्रमं नीत्वा तस्यां पुरूरवसं पुत्रमजीजनदिति भविष्योत्तरपुराणकथाप्रथा । ' इति रङ्गनाथः । श्लोकार्थः स्पष्टः । उपालभे अधिक्षिपामि । **सरसीति**—सरसि सरोवरे नलिनीपत्रेणापि कमलिनीदलेनापि आच्छादितविग्रहामावृतशरीराम् । ' विग्रहो युधि विस्तारे प्रविभागशरीरयोः । ' इति हैमः । केवलं कमलिनीपत्रेण त्वत्तो व्यवहितामतिनिकटस्थामपीत्यर्थः । सहचरीं चक्रवाकीं त्वत्प्रियां दूरे विप्रकृष्टस्थां मत्वा समुत्सुक उत्कण्ठितः सन् विरौषि ननु आक्रन्दसि खलु । जायास्नेहाद्भार्यानुरागाद्भवत इति च इत्थंरूपा पृथक्स्थितिभीरुता पृथगवस्थानकातर्यम् । मयि च विधुरे परमार्थतः प्रियाविरहिते भवतो भावोऽभिप्रायः कान्ताप्रवृत्तिपराङ्मुखो मत्प्रियावार्ताकथनविमुखः इत्यहो आश्चर्यम् । विपर्ययेण प्रातिकूल्येन प्रभावप्रकाशः सामर्थ्यप्रकाशनम् । **इदमिति**—इदमन्तःकूजितषट्पदमन्तः कूजिताः शब्दायमानाः षट्पदा भ्रमरा यस्मिंस्तत्पद्मं मां रुणद्धि अग्रे गमनान्निवारयति । मया दष्टोऽधरो यस्य तद्दष्टाधरमत एव ससीत्कारं तस्या उर्वश्या आननमिवेत्युपमा । कमलाध्यासिनि कमलमध्यास्तेऽसौ तस्मिन् ।

१ उपालभे २ भाग्यविपर्यासानां प्रभावः; भाग्यानां विपर्यासः (विपर्ययः), सर्वथा मदीयानां विपर्ययेण प्रभवेद्यावदाकारः; सर्वथायं मदीयानां भागधेयानां प्रभावः, मदीयानां भाग्यविपर्यासानां प्रभावोयम् । भवत्वन्यदेव काननमवगाहिष्ये । पदान्तरे स्थित्वा । इदानीमेवमवगच्छामि । इ० पाठान्तराणि । ३ कणित० । इ. पा. ४ भवतु सानुशयोहमस्मिन्कमलसेविनि भ्रमरे प्रणयित्वं करिष्ये इ. पा. ५ कमलसेविनि.

मधुकर मदिराक्ष्याः शंस तस्याः प्रवृत्तिं—

(विभाव्य ।)

वरतनुरथवासौ नैव दृष्टा त्वया मे ।
यदि सुरभिमवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत्पुण्डरीके किमस्मिन् ॥ २२ ॥

साधयामस्तावत् । (परिक्रम्यावलोक्य च ।) एष [3]नीपस्कन्धनिषण्ण-हस्तः [4]करिणीसहायो नागराजस्तिष्ठति । अस्मात् प्रियोदन्तमुपलप्स्ये । (विलोक्य ।) [5]अथवा न त्वरा कार्या ।

अयमचिरोद्भूतपल्लवमुपनीतं प्रियकरेणुहस्तेन ।
अभिलषतु तावदासवसुरभिरसं सल्लकीभङ्गम् ॥ २३ ॥

(क्षणमात्रं स्थित्वा । अवलोक्य ।) हन्त कृताह्निकः संवृत्तः । भवतु पृच्छामि ।

मदकल युवतिशशिकला गजयूथप यूथिकाशबलकेशी ।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका ॥ २४ ॥

अनुशयः पश्चात्तापः । **मधुकरेति**—हे मधुकर भ्रमर मदिराक्ष्या मत्तलोचनायास्तस्याः प्रवृत्तिं वार्तां शंस कथय । अथवा वरतनुश्चारुगात्री मे प्रिया ते त्वया नैव दृष्टा । कुत इदं निश्चीयते इत्याह—सुरभि घ्राणतर्पणं तन्मुखोच्छ्वासगन्धं तन्मुखमारुतसौगन्ध्यमवाप्स्यो यदि आस्वादयिष्यथाश्चेदस्मिंस्त्वयाधिष्ठिते पुण्डरीके तव रतिः प्रीतिरभविष्यत्किम् । नैवाभविष्यत् । तस्या असामान्यमुखोच्छ्वास-गन्धलोलुपस्त्वं तां नानुगतोत्रैव तिष्ठसीति सा नैव त्वया दृष्टेति भावः । साधयामो गच्छामः । नीपस्कन्धनिषण्णहस्तः नीपः कदम्बस्तस्य स्कन्धे शाखायां निषण्णो निहितो हस्तः शुण्डा यस्य । ' हस्तः करे करिकरे ' इति मेदिनी । **अयमिति**—अयं नागराजः प्रियकरेणुहस्तेन प्रियकरिणीकरेणोपनीतं प्रापितम् । अचिरोद्भूत-पल्लवमचिरोद्भूतो नूतनोत्पन्नः पल्लवो यस्य तादृशम् । आसवसुरभिरसमासवो मधु तस्येव सुरभिर्मधुरो रसो यस्य तम् । सल्लकीभङ्गं सल्लक्याः सल्लकी हस्तिप्रियो वृक्ष-विशेषस्तस्या भज्यत इति भङ्गो भग्ना शाखा तं तावदादौ अभिलषतु आकाङ्क्षतु । आस्वादयतु इत्यर्थः । ' अभिलेढु ' इति पाठः । स तु स्पष्टार्थः । कृताह्निकः कृताहारः । अह्नि निर्वर्त्यते आह्निकं दिनकृत्यम् । अत्र भोजनम् । **मदकलेति**—हे गजयूथप यूथनाथ मदकलयुवतिशशिकला मदेन कला अव्यक्तमधुरमालपन्त्यो

---

१ अथवा ते...प्रिया मे. २ परिक्रामितकेन. ३ करिणीसहायो नागाधिराजो नीपस्कंधनिषण्णः । ४ प्रियासहायः इ. पा. । ५ भवतु. ६ अस्मात्परं न तावदयमुपसर्पणकमः. ७ अभिलषतु तावदास्यासवसुरभि सल्लकीकुसुमम् इ. पा. ८ कलभकरोरूः इ. पा.

(आकर्ण्य सहर्षम् ।) अनेन स्निग्धमन्द्रेण गर्जितेन[1] प्रियोपलम्भशंसिना समाश्वासितोस्मि । साधर्म्याच्च त्वयि मे भूयसी प्रीतिः ।

मामाहुः पृथिवीभृतामधिपतिं नागाधिराजो भवा-
नव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं ममाप्यर्थिषु ।
स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा
सर्वं मामनु ते प्रियाविरहजां त्वं तु व्यथां मानुभूः ॥२५॥

सुखमास्तां भवान् । साधयामस्तावत् । (परिक्रम्य पार्श्वतो दृष्टिं दत्वा ।) अये सुरभिकन्दरो[2] नाम विशेषरमणीयः सानुमानालोक्यते । प्रियश्चायमप्सरसाम् । अपि नाम सुतनुरस्योपत्यकायामुपलभ्येत ।

रम्या वा युवतयस्तासु शशिकला । शशिकलेत्यनेन नक्षत्रस्थानीयासु युवतिषु शशिस्थानीयाया उर्वश्याः श्रेष्ठत्वं कलेत्यनेन कलङ्कराहित्यं च ध्वनितम् । मदकल इति पृथग्योगो वा । तेन हे मदकल मदेन कल मदोत्कट इति गजयूथपशब्दस्य विशेषणम् । यूथिकाशबलकेशी यूथिकापुष्पै : शबलाश्चित्राः केशा यस्याः सा । ' चित्रं किर्मीरकल्माषशबलेताश्च कर्बुरे । ' इत्यमरः । सुखालोका रम्यदर्शना स्थिरयौवना । स्थिरयौवनत्वं तु दिव्यत्वादवसेयम् । मम प्रियेति शेषः । ते दूरालोके स्थिता किं त्वया दूरतो दृष्टा किम् । अनुप्रासालंकारः । स्निग्धमन्द्रेण स्निग्धं मधुरं मन्द्रं गम्भीरं च तेन । उपलम्भो ज्ञानं उपलब्धिर्वा । साधर्म्यात्समानधर्मत्वात् । साधर्म्यमेवोपन्यस्यति । **मामिति**-मां पृथिवीभृतां राज्ञामधिपतिमधिराजमाहुः । भवानपि नागानामाधिराजः । अधिको राजाधिराजः । ' राजाहःसखिभ्यष्टच् ' इति टच्प्रत्ययः । भवतो ममापि दानं मदवारि द्रव्यवितरणं चार्थिषु भृङ्गादिषु याचकेषु च । अव्युच्छिन्नपृथुप्रवृत्ति विशेषेणोच्छिन्ना न भवतीत्यव्युच्छिनाऽविरता पृथ्वी महती च प्रवृत्तिः प्रवाहो यस्य तत्तथा । ' दानं गजमदे त्यागे ' इति विश्वमेदिन्यौ । स्त्रीरत्नेषूर्वशी मम प्रियतमा । यूथे इयं वशा करिणी तव प्रियतमा । ' वशा वन्ध्यासुतायोषास्त्रीगवीकरिणीषु च । ' इति विश्वः । इत्थं ते तव सर्वं मामनु मदनुगुणम् । त्वं तु प्रियाविरहजां व्यथां माऽनुभूः मा ज्ञासीः । सानुमान् पर्वतः । उपत्यका अद्रेरासन्ना भूमिः । 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः । उपाधिभ्यां त्यकन्नासन्नारूढयोः । ' इति त्यकन् । दुरितपरिणामैः पापविपाकैः । शतह्रदा विद्युत् । 'शंपा शतह्रदाह्रादिन्यैरावत्यः, क्षणप्रभा । ' इत्यमरः । शतं ह्रदा अव्यक्तमधुराः शब्दा

१ मन्द्रकण्ठगर्जितेन. २ अयमर्धो सुराभि०

(परिक्रम्यावलोक्य च ।) हन्त मदीयैर्दुरितपरिणामैर्मेघोपि शतह्रदाशून्यः संवृत्तः । तथापि शिलोच्चयमेतमपृष्ट्वा न निवर्तिष्ये ।

अपि वनान्तरमल्पकुचान्तरा श्रयति पर्वत पर्वसु संनता
इदमनङ्गपरिग्रहमङ्गना पृथुनितम्ब नितम्बवती तव ॥ २६ ॥

कथं तूष्णीमास्ते । शङ्के विप्रकृष्टो न शृणोतीति । समीपेऽस्य गत्वा पुनरेनं पृच्छामि । (परिक्रम्य ।)

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया ॥ २७ ॥

(आकर्ण्य । सहर्षम्) कथं यथाक्रमं दृष्टेत्याह । भवानपि अतः प्रियतरं शृणोतु । क्व तर्हि मम प्रियतमा । (नेपथ्ये तदेवाकर्ण्य ।) हा धिक् । ममैवायं कन्दरमुखविसर्पी प्रतिशब्दः । (विषादं रूपयित्वा ।) श्रान्तोस्मि । अस्यास्तावद्गिरिनद्यास्तीरे स्थितस्तरङ्गवातमासेविष्ये । ईमां नवाम्बुकलुषामपि स्रोतोवहां पश्यतो मे रमते मनः ।

अर्चींषि वा यस्याम् । पृषोदरादित्वाद्भ्रस्वः । **अपीति**–हे पृथुनितम्ब वृहत्कटक पर्वत । अङ्गना अनङ्गपरिग्रहमनङ्गस्य कामस्य परिग्रहं परिगृह्णत इति परिग्रहं स्वम् । अतिरमणीयतया मन्मथस्य निवासस्थानभूतामित्यर्थः । इदं वनान्तरं श्रयति आश्रयते अपि किम् । अपिः प्रश्ने । कीदृशी सेत्याकाङ्क्षायां तामेव विशिनष्टि–अल्पकुचान्तरा अल्पं कुचान्तरं कुचयोर्मध्यभागो यस्याः सा । पीवरस्तनीत्यर्थः । पर्वसु गुल्फादिसन्धिषु सन्नता निम्ना । मांसपिहितग्रन्थिरित्यर्थः । नितम्बवती प्रशस्तनितम्बा च । प्राशस्त्यार्थे मतुप् । **सर्वक्षितिभृतामिति**–हे सर्वक्षितिभृतां सर्वेषां पर्वतानां नाथ सर्वाङ्गसुन्दरी चारुसर्वाङ्गी रामा रमणी मया विरहिता रम्ये वनोद्देशे वनप्रान्ते त्वया दृष्टा किम् । कथं यथाक्रमं दृष्टेत्याह–उक्तमेव प्रतिध्वनितं श्रुत्वा राज्ञोत्तरत्वेन योजितम् । तद्यथा–हे सर्वक्षितिभृतां सर्वनृपाणां नाथ त्वया विरहिता मया दृष्टा । शेषमुभयत्र समानम् । त्रिगताख्यं वीथ्यङ्गं चेदम् । यदाह विश्वनाथः–'त्रिगतं स्यादनेकार्थयोजनं

---

१ कथमन्धकारः । भवतु विद्युत्प्रकाशनावलोकयामि । कथं मदीयैः–इ. पा.; दुरितपरिणामैः०– दोषैः । इ. पा. २ संमुखं स्थित्वा । इ. त्य. ए. पु. ३ विप्रकर्षान्न शृणातीति मन्ये । हन्तास्य समीपमेव गत्वा पुनरेनं पृच्छामि । (तथा कृत्वा) । इ. पा. ४ वनान्तेस्मिन् । इ. पा. ५ भवतु अवलोकयामि । (दिशोवलोक्य सखेदम् ।) कथं वायं कन्दरान्तरावसर्पी प्रतिशब्दः । (इति मूर्च्छति । उत्थायोपविश्य सविषादम् ।) अहह श्रान्तोस्मि । इ. पा. ६ इति मूर्च्छति । उत्थाय सविषादम् ।७ अहह श्रान्तः ८ अस्मात्प्राक् (परिक्रम्य अवलोक्य च) इत्य०. ९ पश्यता मया रतिरुपलभ्यते । इ. पा.

तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम् ।
यथाविद्धं याति स्खलितमभिसंधाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता ॥ २८ ॥

भवतु । याचिष्ये तावदेनाम् । (अञ्जलिं कृत्वा ।)

त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।
कमपराधलवं मम पश्यसि त्यजसि मानिनि दासजनं यतः ॥ २९ ॥

अथ वा परमार्थसरिदेवैषा । न खलूर्वशी पुरूरवसमपहाय समुद्रामिसारिणी भविष्यति । भवतु । अनिर्वेदप्राप्याणि श्रेयांसि । यावदमुमेव प्रदेशं गच्छामि यत्र मे नयनयोः सुनयना तिरोभूता । (परिक्रम्य अवलोक्य ।) हन्त दृष्टमुपलक्षणं तस्या मार्गस्य ।

श्रुतिसाम्यतः । ' इति । कन्दरमुखविसर्पी गुहामुखे प्रतिध्वनन् । नवाम्बुकलुषां वर्षजलाविलाम् । **तरङ्गेति**–तरङ्गभ्रूभङ्गा तरङ्गा वीचय एव भ्रूभङ्गा भ्रूविकारा यस्याः सा । क्षुभितविहगश्रेणिरसना क्षुभितानां त्रस्तानां विहंगानां श्रेणिरेव रसना मेखला यस्याः सा । संरम्भशिथिलं रोषवेगात् श्लथं वसनमिव फेनं विकर्षन्ती । बहुशो यथा यस्मादियं मम स्खलितमपराधमभिसन्धाय मनसि ध्यात्वा आविद्धं कुटिलं यथा तथा स्खलनपूर्वकं वा याति तथा तस्मादियं ध्रुवं नदीभावेन सरिद्रूपेण परिणता विकृता असहना कोपना सोर्वश्येव । ध्रुवमित्युत्प्रेक्षायाम् । तदुक्तं दण्डिना ' मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः । इत्यमरः । 'स्खलितं तूचिताद्धंशे स्खलितं चलिते त्रिषु । ' इति विश्वलोचनः । **त्वयीति**–हे मानिनि मम मामकं कमपराधलवमपराधस्य लेशं पश्यसि । यतो यस्मादपराधलेशाद्धेतोर्दासजनं तव दासभूतं मल्लक्षणं जनं त्यजसि । कीदृशस्य मम । त्वयि निबद्धरतेर्निबद्धा निवेशिता रतिरनुरागो येन तस्य । प्रियभाषिणः प्रियं भाषते इत्येवंशीलस्य । कदापि खेदकरं वचनमनुच्चारयत इत्यर्थः । तथा च प्रणयभङ्गपराङ्मुखचेतसः प्रणयः प्रीतिप्रार्थना प्रेम वा तस्य भङ्गस्तस्मात्पराङ्मुखं चेतो यस्य स तथोक्तस्तस्य । एवं विशेषणत्रयस्यापराधलेशाभावोपपत्त्याभिप्रायगर्भत्वात्परिकरालंकारः । अत्र लवमपीत्यप्यर्थोऽवश्यवाच्यः । अन्यथा लवनिषेधे स्थूलप्रतीतिप्रसङ्गात् । इति काव्यप्रदीपः । तेनात्र ' अनभिहितवाच्यत्वम् ' दोषः । तथाह्युदाहृतोयं श्लोकः काव्यप्रकाशकृतोक्तदोषोदाहरणप्रसङ्गे । परमार्थसरिन्निसर्गनदी न तु रूपान्तरं प्राप्तोर्वशी ।

१ यथा खेलम् । इ. पदालेखम् । इ. च. पा. २ प्रसादयामि । ३ रतौ प्रियवादिनि... चेतसि ।...मयि ।

रक्तकदम्बः सोयं प्रियया घर्मान्तशंसि यस्यैकम् ।
कुसुममसमग्रकेसरविषममपि कृतं शिखाभरणम् ॥ ३० ॥

(विलोक्य ।) इमं तावत् प्रियाप्रवृत्तिनिमित्तं सारङ्गमासीनमभ्यर्थये ।

कृष्णशारच्छविर्योसौ दृश्यते काननश्रिया ।
वनशोभावलोकाय कटाक्ष इव पातितः ॥ ३१ ॥

(विलोक्य ।) किं नु खलु मामवधीरयन्निव अन्यतोमुखः संवृत्तः ।(दृष्ट्वा)

अस्यान्तिकमायान्ती शिशुना स्तनपायिना मृगी रुद्धा ।
तामयमनन्यदृष्टिर्भुग्नग्रीवो विलोकयति ॥ ३२ ॥

समुद्राभिसारिणी समुद्रगामिनी । अत्राभिसारिकात्वमपि व्यज्यते । अनिर्वेदप्राप्याणि निर्वेदप्राप्याणि न भवन्तीति । निर्वेदादुर्वशीप्राप्तिरूपं श्रेयो नैव लब्धुं शक्येतात एव न मयालसेन भाव्यमित्यर्थः । उपलक्षणं लिङ्गम् । **रक्तकदम्बेति**—अयं पुरोवर्ती रक्तकदम्बः सः । यस्य घर्मान्तशंसि निदाघात्ययसूचकं अग्रिमं कुसुममित्यर्थः । रक्तकदम्बो हि वर्षास्वेव कुसुमितो भवति । अत एवासमग्राणि यानि केसराणि तैर्विषममुन्नतानतम् । एकं कुसुमं प्रियया शिखाभरणं कृतं आसीदिति शेषः । प्रियाप्रवृत्तिनिमित्तं प्रियाप्रवृत्त्यर्थम् । **कृष्णेति**—योऽसौ सारङ्गः कृष्णशारच्छविः कृष्णा नीला शारा कर्बुरा च छविः कान्तिर्यस्य तादृशः सन् वनशोभावलोकाय वनश्रियोवलोकनार्थं काननश्रिया वनलक्ष्म्या पातितः कटाक्ष इव दृश्यते । ' कृष्णसारच्छविः ' इति रङ्गनाथः पठति व्याख्याति च—' कृष्णसारः कृष्णमृगस्तद्वच्छविर्दीप्तिर्यस्य । पक्षे कृष्णो यः सारोऽर्थोदक्ष्णः कनीनिका तद्वच्छविर्यस्मिन् । अतिश्याम इत्यर्थः । ' इति । **अस्येति**—अस्यान्तिकं समीपमायान्ती मृगी स्तनपायिना शिशुना रुद्धा प्रतिषिद्धा । तां मृगीमयमनन्यदृष्टिस्तदासक्तदृष्टिः भुग्नग्रीवो वलितकन्धरो विलोकयति । अनुरूपवर्णनं रघुवंशे—' तस्य स्तन-

---

१ परिक्रम्याशोकमवलोक्य ।

रक्ताशोक कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनम्

(पवनधूयमानमूर्धानमवलोक्य ।)

नो दृष्टेति मुधैव चालयसि यद्बाताभिभूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासंघट्टघृष्टच्छदः
तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोयं कुतः ।

परिभाव्य । इमं ० । इ. पा. २ एतस्यानन्तरम्.

अभिनवकुसुमस्तबकिततरुवरस्य परिसरे
मदकलकोकिलकूजितमधुपझंकारमनोहरे ।
नन्दनविपिने निजकरिणीविरहानलेन संतप्तो
विचरति गजाधिपतिरैरावतनामा ॥

इति रङ्गनाथः पठति । एतादृशविशेषणविशिष्टे वने भ्रमणेन विरहातिशयं द्योतयति । इति टीकयते च । ३ मेघकालावलोकाय । इ. नवशष्पावलोकाय । इ. च पा.

हंहो यूथपते

अपि दृष्टवानसि मम प्रियां वने
कथयामि ते तदुपलक्षणं शृणु ।
पृथुलोचना सहचरी यथैव ते
सुभगं[1] तथैव खलु सापि वीक्षते ॥ ३३ ॥

कथमनादृत्य मद्वचनं कलत्राभिमुखं स्थितः । उपपद्यते । परिभवास्पदं दशाविपर्ययः[2] । इतो वयम्[3]—(परिक्रामितकेन ।)

(अवलोक्य ।) किं नु खलु शिलाभेदान्तरगतं नितान्तरक्तमिदमालोक्यते ।

प्रभालेपी[4] नायं हरिहतमृगस्यामिषलवः
स्फुलिङ्गः स्यादग्नेर्गगनमभिवृष्टं पुनरिदम् ।

(विभाव्य ।)

अयं[5] रक्ताशोकस्तवकसमरागो मणिरयं
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः[6] ॥ ३४ ॥

प्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् । ' इति । ' हंहो ' इत्यामन्त्रणे । **अपीति**–अपिः प्रश्ने । मम प्रियां वने दृष्टवानसि किम् । ते तुभ्यं तदुपलक्षणमभिज्ञानचिह्नं कथयामि । ते तव पृथुलोचना सहचरी यथैव सुभगमभिरामं वीक्षते तथैव खलु सापि वीक्षते । तव प्रियाया इव मम प्रियाया अपि वीक्षणं सुभगम् । अस्मादुपलक्षणाद्या मया दृष्टा सास्यैव प्रियतमेति प्रत्यभिज्ञातुं भवान् शक्ष्यतीति भावः । परिभवास्पदं तिरस्कारस्थानम् । **प्रभालेपीति**–प्रभालेपी प्रभया तेजसा लिम्पति व्याप्नोतीति प्रभालेपी प्रभाया लेपोस्यास्तीति वा । विसदृशप्रभ इत्यर्थः । अत एवायं हरिहतमृगस्य हरिणा सिंहेन हतस्य मारितस्य मृगस्यामिषलवो मांसखण्डो न भवति तस्यासृक्स्फुरणाभावात् । अग्नेः स्फुलिङ्गः कणः स्यात् । ' त्रिषु स्फुलिङ्गोऽग्निकणः '

---

१ सुभगा. २ सर्वथोप० विधिविपर्ययः । ३ अस्यानन्तरमिदं पद्यं क्वचित् ।

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा
दोषाणां प्रशमाय नः श्रुतमहो कोपेपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योधरं पास्यति ॥

व्यभिचारिभावानां शबलत्वोदाहरणत्वेनोदाहृतमेतत्पद्यं काव्यप्रकाशकृता।तच्च केश्चित्काव्यप्रकाशटीकाकारैर्विक्रमोर्वशीयान्तर्गतामिति तत्र निर्दिष्टम् । अस्माभिश्चोपलब्धेषु हस्तलिखिततपुस्तकेष्वेकैकमस्मिन्नुपलब्धमित्यत्र निवेशितम् । वस्तुतस्त्वस्थाने एवेदं पद्यमित्यवगन्तव्यम् ।' शुक्रकन्यां देवयानीं दृष्टवतो राज्ञो ययातेरियमुक्तिः।' इति उदाहरणचन्द्रिका।

४ यावदितोहमन्यमथकाशमवगाहिष्ये । ५ प्रभाते पीनोयं; मृगस्य–गजस्य । इ. पा. ६ अमुं समुद्धर्तुं.....इवासंजितकरः इ. पा.

हरति मे मनः । आदास्ये तावदेनम् अथ वा

मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्पणीयः ।
सैव प्रिया संप्रति दुर्लभा मे किमेनमस्रोपहतं करोमि ॥ ३५ ॥

(नेपथ्ये ।) वत्स गृह्यतां गृह्यताम् ।

संगमनीय इति मणिः शैलसुताचरणरागयोनिरयम् ।
आवहति धार्यमाणः संगममचिरात्प्रियजनेन ॥ ३६ ॥

राजा—(कर्णं दत्त्वा ।) को नु खलु मामेवमनुशास्ति । (दिशोवलोक्य ।) अये अनुकम्पते मां कश्चिन्मृगचारी मुनिर्भगवान् । भगवन् अनुगृहीतोस्म्यहमुपदेशाद्भवतः ।

(मणिमादाय ।) हंहो संगमनीय

तया वियुक्तस्य विलग्नमध्यया
भविष्यसि त्वं यदि संगमाय मे ।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमीश्वरः ॥ ३७ ॥

इत्यमरः । इदं पुनर्गगनमभिवृष्टमस्मिन्नेव काले भितो वृष्टम् । गगनादभितो वृष्टिर्जातेत्यर्थः । तस्मादेतदपि न संभवति । स्यादित्यनन्तरं नैतदिति शेषपूरणे पुनःशब्दार्थानन्वयप्रसङ्गात् । 'अये' इत्याश्चर्ये । रक्ताशोकस्तबकसमरागो रक्ताशोकस्तबकेन रक्ताशोककुसुमगुच्छेन समस्तुल्यो रागो यस्य स तथोक्तः । अयं मणिः । लोहितत्वात्पद्मरागमणिरित्यर्थः । एकस्य पुष्पस्य तथालौहित्याभावात्स्तबकग्रहणम् । यमुद्धर्तुमुद्ग्रहीतुं पूषा सूर्यः आलम्बितकरः प्रसारितपाणिः सन् व्यवसित इव कृतोद्योग इवेत्युत्प्रेक्षा । **मन्दारेति**—मन्दारपुष्पैस्तदाख्यदेवतरुकुसुमैरधिवासितायां सुरभीकृतायां यस्याः शिखायामयमर्पणीयो निधातुमुचितः । सा एव मे प्रिया सम्प्रत्यधुना दुर्लभा नष्टेत्यर्थः । अतस्तदर्थं रुदन्नहमेनं किं किमर्थमस्रोपहतमश्रुदूषितं करोमि । **संगमनीय इति** । संगमनीय इति संगमनीयनामा शैलसुताचरणरागयोनिः शैलसुताया गौर्याश्चरणरागश्चरणोपयुक्तलाक्षारागो योनिरुत्पत्तिकारणं यस्य स तथोक्तः । अयं मणिः । यश्च धार्यमाणः शरीरे धृतः सन् अचिराज्झटिति प्रियजनेन संगममावहति घटयति । अनुशास्ति उपदिशति । मृगचारी—मृगवच्चरतीति मृगवृत्तिः । काटयवेमस्तु 'मृगचर्मधारी भगवान्मुनिः' इति पठित्वा 'अयं नारायण इति संप्रदायः' इत्याह । **तयेति**—विलग्नमध्यया विशेषेण लग्नो विलग्नोतिकृशः मध्यः कटिभागो यस्यास्तया तनुमध्ययेति यावत् । तया वियुक्तस्य मे मम यदि त्वं संगमाय

---

१ को नु खलु मामेवमनुकम्पते । विभाव्य । अयि अनुकम्पते मां भगवान्गजचर्मवासाः ।० कश्चन मुनिर्मृगचारी । इ. पा. २ निमग्न.

(परिक्रम्यावलोक्य च ।) अये किं नु खलु कुसुमरहितामपि लतामिमां पश्यतो मे रतिरुपलब्धा । अथ वा स्थाने मनोरमा ममेयम् इयं हि ।

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः
शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥ ३८ ॥

यावदस्याः[2] प्रियानुकारिण्याः परिष्वङ्गप्रणयी भवामि ।

(इति लतामालिङ्गति ।)

(ततः प्रविशति तत्स्थान एवोर्वशी ।

राजा—(निमीलिताक्ष एव स्पर्शं रूपयित्वा ।) अये[3] उर्वशीगात्रसंपर्कादिव निर्वृतं मे शरीरम् । तथापि न पुनरस्ति विश्वासः । कुतः ।

समर्थये यत्प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्ततेन्यथा ।
अतो विनिद्रे[4] सहसा विलोचने
करोमि न स्पर्शविभावितप्रियः ॥ ३९ ॥

भविष्यसि तर्हि ततस्तस्मात्कारणाद्रवन्तमात्मनः शिखामणिं करिष्यामि । स्वमूर्ध्नि धारयिष्यामि । अनेन गौरवातिशयो द्योतितः । ईश्वरः शिवः बालमिन्दुं चन्द्रलेखामिव । **तन्वीति**—तन्वी पेलवाङ्गी विरला च । मेघजलार्द्रपल्लवतया मेघजलेन वर्षवारिणा आर्द्राः क्लिन्नाः पल्लवा यस्या साः मेघजलार्द्रपल्लवा तस्या भावस्तत्ता तया । अश्रुभिर्बाष्पैर्धौताधरेव धौतः क्षालितोऽधरो यस्याः सा । स्वकालविरहात् स्वेषां प्रसूनानां कालो विकसनसमयस्तस्य विरहादभावादपगमाद्वा हेतोर्विश्रान्तपुष्पोद्गमा विश्रान्तो विरतः पुष्पाणामुद्गमः प्रादुर्भावो यस्याः सा । कुसुमरहितेत्यर्थः । सती । आभरणैरलङ्कारैः शून्या विरहितेव । मधुलिहां भ्रमराणां शब्दैर्गुञ्जारवेण विना विनाभूता सती चिन्तया कृतं मौनं चिन्तामौनमास्थितेव । पुष्पविरहाद्भ्रमरगुञ्जारवविरह इति बोध्यम् । इयं लता पादपतितं मामवधूय तिरस्कृत्य जातानुतापा सञ्जातपश्चात्तापा चण्डी कोपना सा उर्वशीव लक्ष्यते हि । ' चण्डस्त्वत्यन्तकोपनः ' इत्यमरः । " अत्र कार्यान्वेषणाद् ' विरोधनं ' नाम सन्ध्यङ्गमुक्तं भवति । " इति काटयवेमः । **समर्थय इति**—यत् यद्यदंशुकनूपुररवादिकं । प्रथमं पूर्वं प्रियां प्रति प्रियासम्बन्धित्वेन प्रियारूपत्वेन वा समर्थये संभावयामि । निश्चिनोमीत्यर्थः । तत् तत्तत् क्षणेन मे ममान्यथा विपरीतत्वेन शाद्वलहंसकूजितादिरूपेण परिवर्तते विनिमीयते ।

---

१ मया रतिरुपलभ्यते । अथ वा स्थाने मम मनो रमते । इ. पा. २ अस्यां...कारिण्यां. ३ आयि उर्वशीगात्रं संस्पृशदिव निर्वृतं मे हृदयम् । इ. पा. ४ विमुद्रे । इ. पा.

(शनैश्चक्षुषी उन्मील्य) कथं सत्यमेव प्रियतमा ।

उर्वशी—(बाष्पं विसृज्य ।) जयतु जयतु महाराजः । (जेदु जेदु महाराओ ।)

राजा—

त्वद्वियोगोद्भवे तन्वि मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥ ४० ॥

उर्वशी—अभ्यन्तरकरणया मया प्रत्यक्षीकृतवृत्तान्तः खलु महाराजः । (अब्भन्तरकरणाए मए पच्चक्खीकिदवुत्तन्तो खु महाराओ ।)

राजा—अभ्यन्तकरणयेति न खलु ते वचनार्थमवैमि ।

उर्वशी—कथयिष्यामि । एतत्तावत् प्रसीदतु महाराजो यन्मया कोपवशं गतया एतदवस्थानन्तरं प्रापितो महाराजः । (कहइस्सं । इमं दाव पसीददु महाराओ जं मए कोववसं गदाए एदं अवत्थन्तरं पाविदो महाराओ ।)

राजा—कल्याणि न तावदहं प्रसादयितव्यः । त्वद्दर्शनादेव[1] प्रसन्नबाह्यान्तःकरणोन्तरात्मा । कथय कथमियन्तं कालमवस्थिता मया विना भवती ।

उर्वशी—शृणोतु महाराजः । भगवता कुमारेण शाश्वतं कुमारव्रतं गृहीत्वा अकलुषो नाम गन्धमादनकच्छोध्यासितः कृतश्चैष विधिः ।

अतो यस्मादेवं तस्मात्स्पर्शविभावितप्रियः । स्पर्शेन विभाविता निश्चिता प्रिया येन सोहं सहसाऽकस्माल्लोचने विनिद्रे उन्मीलिते न करोमि । अस्या अप्यन्यत्वेन परिवर्त उर्वशीस्पर्शसुखविनाशभयादित्यर्थः । **त्वद्वियोगोद्भव इति**—हे तन्वि तन्वङ्गि त्वद्वियोगोद्भवे त्वद्विरहजनिते तमसि शोके । ' तमो ध्वान्ते गुणे शोके ' इति मेदिनी । मज्जता मया दिष्ट्या भाग्ययोगेन प्रत्युपलब्धासि पुनः प्राप्तासि । गतासुना मूर्च्छितेन चेतना संज्ञेव । **उर्वशी**—अभ्यन्तरकरणया अभ्यन्तराणि अन्तर्गूढानि करणानि इन्द्रियाणि यस्याः सा तथोक्ता तया । अन्तर्निगूढेन्द्रियशक्त्येत्यर्थः । **उर्वशी**—एतत्तावत् क्षन्तुमिति शेषः । कोपवशं गतया कोपाधीनतया । **राजा**—प्रसन्नबाह्यान्तःकरणः प्रसन्नानि बाह्यानि करणानि चक्षुरादीनि अन्तःकरणं च यस्य । **उर्वशी**—कुमारेण कार्तिकेयेन । कुमारव्रत-

---

१ शनैरुन्मील्य चक्षुषी । कथं सत्यमेवोर्वशी । इति मूर्च्छितः पतति । २ समाश्वसितु समाश्वसितु महाराजः । राजा (संज्ञां लब्ध्वा) प्रिये अद्य जीवितम् । त्वद्वियोगे० इ. पा. ३ त्वद्दर्शनेन प्रसन्नो मे सबाह्यान्तरात्मा; ममान्तरात्मा.

(सुणादु महाराओ। भअवदा कुमारेण सासदं कुमारवदं गेण्हिअ अक-लुसो णाम गन्धमादणकच्छो अज्झासिदो किदो अ एस विही।)

राजा—क इव।

उर्वशी—यैतं प्रदेशं स्त्री प्रवेक्ष्यति सा लताभावेन परिणंस्यति। गौरीचरणरागसंभवं मणिं विना ततो न मोक्ष्यते इति। साहं गुरु-शापसंमूढहृदया देवतासमयं विस्मृत्यागृहीतानुनया कुमारवनं प्रविष्टा। प्रवेशानन्तरमेव वासन्ती लता संवृत्ता। (जो इमं पदेसं इत्थिआ पविसदि सा लदाभावेण परिणमिस्सदि। गोरीचरणराअसंभवं माणिं विणा तदो ण मुच्चिस्सदित्ति। साहं गुरुसावसंमूढहिअआ न्तरं देवदासमअं विसुमरिअ अगहिदाणुणआ कुमारवणं पविट्ठा। पवेसाणन्तरंएव्व वासन्ती लदा संवुत्ता।)

राजा—सर्वमुपपन्नम्।

रतिखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम्।
सा त्वं प्रिये सहेथाः कथं मदीयं चिरवियोगम्॥ ४१॥

इदं तैद्यथाकथितं त्वत्संगमनिमित्तं मुनेरुपलभ्य मणिप्रभावादासादिता त्वमस्माभिः। (इति मणिं दर्शयति।)

उर्वशी—अहो संगमनीयः। अतः खलु महाराजेन आलिङ्गित-

मदारपरिग्रहव्रतं ब्रह्मचर्यम्। कच्छो जलप्रायप्रदेशः अनूपेत्यपरनामा। 'जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः।' इत्यमरः। विधिः नियमः। **उर्वशी**—ततो लताभावात्। देवतासमयं कार्तिकेयकृतं विधिम्। अगृहीतानुनया महाराजकृतमनुनयमप्रतिपद्येत्यर्थः। **राजा**—उपपन्नं यत्त्वयोक्तं तत्तथा। अन्यथा **रतीति**—या त्वं शयने रतिखेदसुप्तं रतिजनितश्रमेण निद्रितमपि मां प्रवासगतं मन्यसे। सुषुप्तिजनितमल्पमपि वियोगं सोढुमसमर्थेत्यर्थः। सा त्वं मदीयं चिरवियोगं कथं सहेथाः न कथंचिदपि। अतो यत्त्वयोक्तं तत्तथैव। **राजा**—यथाकथितं त्वयेत्यर्थः। त्वत्संगमनिमित्तं तव संगमस्य निमित्तम्।

---

१ कुमारेण—महासेनेन। गेण्हिअ अअं। किदा अ त्थिदी। (स्थितिः) इ. पा. २ जा किल. ३ किदो अ सावान्तो गोरीचरणराअसंभवं मणिं वज्जिअ लदाभावं ण मुच्चिस्सदि त्ति। तदो अहं गुरुसावसंमूढहिअआ विसुमरिददेवदाणिअमा अल्लकाजन-परिहरणीअं कुमारवणं पविट्ठा। पवेसाणन्तरं अ काणणोवन्तवत्तिलदाभाएण परिणदं मे रुवम्। इ. पा. ४ सात्वमिहैतदवस्थं कथं सहेथाश्चिरवियोगम्। इति रङ्गनाथः पठति। व्याख्याति च एतदवस्थमेवंप्रकारम्। अनिर्वचनीदृशमित्यर्थः। ५ इदं चैतद्यथाक-थितं त्वत्संगमनिमित्तं पुनरुपलब्धप्रभावमस्माभिः। इ. पा.

मात्रैव प्रकृतिस्थास्मि संवृत्ता । (अम्मो संगमणिओ । अदो खु महाराएण आलिङ्गिदमेत्त जेव्व पकिदित्थह्मि संवुत्ता ।) (मणिमादाय मूर्धनि वहति ।)

राजा—एवमेव सुन्दरि क्षणमात्रं स्थीयताम् ।

स्फुरता विच्छुरितांमद रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते बालापतरक्तकमलस्य ॥ ४२ ॥

उर्वशी—प्रियंवद महान् खलु कालस्तव प्रतिष्ठानान्निर्गतस्य । असूयन्ति मह्यं प्रकृतयः । तदेहि निवर्तावहे । (पिअंवदं महन्तो खु कालो तुह पइट्ठाणादो णिग्गदस्स । असूअन्ति मं पकिदिओ । ता एहि णिवुतह्म ।)

राजा—[३]यदाज्ञापयति भवती ।

उर्वशी—कथं महाराजो गन्तुमिच्छति । (कहं महाराओ गन्तुं इच्छदि ।)

राजा—

अचिरप्रभाविलसितैः पताकिना
सुरकार्मुकाभिनवचित्रशोभिना ।
गमितेन खेलगमने विमानतां
नय मां नवेन वसतिं पयोमुचा ॥ ४३ ॥

[इति निष्क्रान्ताः सर्वे ।]

इति विक्रमोर्वशीये चतुर्थोऽङ्कः समाप्तः ॥

उपलभ्य ज्ञात्वा । **स्फुरतेति**—ललाटनिहितस्य ललाटे अलिके निहितस्य धारितस्य मणेः स्फुरता समंततः प्रसरता रागेण रक्तभासा ते मुखं बालातपरक्तकमलस्य बालातपेन अरुणांशुभी रक्तं यत्कमलं तस्य श्रियं शोभामुद्वहति । **उर्वशी**—असूयन्ति दोषं दास्यन्ति । **अचिरप्रभेति**—हे खेलगमने खेलं सलीलं गमनं यस्यास्तत्सम्बुद्धिः । अचिरप्रभाविलसितैर्विद्युद्विलसितैः पताकिना ध्वजवता । तडिल्लतास्फुरणकेतुमतेत्यर्थः । 'पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् । ' इत्यमरः । सुरकार्मुकाभिनवचित्रशोभिना सुरकार्मुकं शक्रधनुरेवाभिनवं नूतनं चित्रमालेख्यं तेन शोभत इति तेन शोभिना शोभमानेन । नवेन पयोमुचा मेघेन । स्वप्रभावाद्विमानतां प्रापितेनेत्यर्थः । मां वसतिं स्वगृहं नय प्रापय ।

इति श्रीमद्विक्रमोर्वशीयटीकायामर्थप्रकाशिकायां चतुर्थोऽङ्कः ॥

---

१ ० णीओ अअ मणी;कधं संग०२ पिअंवद महन्तो खु कालो अह्माणं पइट्ठाणदो णिग्गदाणं । कदाइ अस्सहस्सन्ति पकिदि ओ अह्माणम् । ता एहि । गच्छम्ह ।३ यदाह

पञ्चमोऽङ्कः ।

(ततः प्रविशति परितुष्टो विदूषकः ।)

विदू०—दिष्ट्या चिरस्य कालस्य उर्वशीसहायो नन्दनवनप्रमुखेषु देवतारण्येषु विहृत्य प्रतिनिवृत्तः प्रियवयस्यः । इदानीं सत्कारोपचारैः प्रकृतिभिरनुरज्यमानो राज्यं करोति । असंतानत्वं वर्जयित्वा न किमप्यस्य हीनम् । अद्य तिथिविशेष इति भगवत्योर्गङ्गायमुनयोः संगमे देवीभिः सह कृताभिषेकः सांप्रतमुपकार्यां प्रविष्टः । तद्यावत्तत्रभवतोऽलंक्रियमाणस्यानुलेपनभाल्ये अग्रभागी भवामि । (इति परिक्रमति ।) (दिट्ठिआ चिरस्स कालस्स उव्वसीसहाओ णन्दनवणप्पमुहेसु देवारण्णेसु विहरिअ पडिणिवुत्तो पिअवअस्सो । दीणिं ससक्कारोवआरेहिं पकिदीहिं अणुरज्जन्तो रज्जं करेदि । असंताणत्तणं वज्जिअ ण किंवि से हीणं । अज्ज तिहिविसेसोत्ति भअवदीणं गङ्गाजउणाणं संगमे देविहिं सह किदाहिसेओ संपदं उवआरिअं पविट्ठो । तो जाव तत्तभवदो अलंकरीअमाणस्स अणुलेवणमल्ले अग्गभागी होमि ।)

इदानीं स्वस्वस्थानोपक्षिप्तान्मुखसन्ध्यादिरूपार्थानेकार्थत्वेन योजयितुं निर्वहणसन्धिरूपमन्तिमाङ्कमारभते । निर्वहणसन्धिलक्षणं दशरूपके–"बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥ ' इति । सुधाकरे च–'मुखसन्ध्यादयो यत्र विकीर्णा बीजसंयुताः । यदा प्रयोजनं यान्ति तन्निर्वहणमुच्यते ॥ ' इति । कार्यफलयोगेनास्य सन्धित्वम् । तल्लक्षणं मातृगुप्ताचार्योक्तम्–'यदाधिकारिकं वस्तु सम्यक्प्राज्ञैः प्रयुज्यते । तदर्थो यः समारम्भस्तत्कार्यं कथ्यते ' इति । ' अभिप्रेतं समर्थं च प्रतिरूपं क्रियाफलम् । इतिवृत्तं भवेद्यस्मिन्फलयोगः स उच्यते ॥' इति । अस्य चतुर्दशाङ्गानि । तदुक्तम्–सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम् । प्रसादानन्दसमयाः कृतिर्भावोपगूहनम् । पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥ ' इति । अधुना पूर्वापरकथासंदर्भार्थं विदूषकं तावत्प्रवेशयति । तत इत्यादिना । ' दिष्ट्या ' इत्यव्ययमानन्दे । ' दिष्ट्या समुपजोषंचेत्यानन्दे ' इत्यमरः । केचिदस्मात्पूर्वं ' ही ही भोः ' इति पठन्ति । तत्र ' हीही ' इति हर्षसूचको निपातः ।

---

१ हृष्टः. २ही ही भो दिट्ठिआ. ३देवतारण्णेसु–प्पदेसेसु. ४पविसिअ णअरं दाणिं सक्कज्जाणुसासणेण पइदिमण्डलं अणुरज्जअन्तो रज्जं करेदि। ५सोअणीअं(त्रोचनीयम्)६देवीए।७उवविट्ठो।८ता जाव अलंकरणीअमाणस्स अङ्गाणुलेवणमल्लभाई भादुओ विअ होमि । इ. पा

नेपथ्ये ।

हा धिक् हा धिक् । दुकूलोत्तरच्छदे तालवृन्ताधारे निक्षिप्य नीयमानो मया भर्तुरभ्यन्तरविलासिनीमौलिरत्नयोग्यो मणिरामिषशङ्किना गृध्रेणाक्षिप्तः । (हद्धी हद्धी । दुऊलुत्तरच्छदे तालवेण्टाधारे णिक्खिविअ णीअमाणो मए भट्टिणो अठभन्तरविलासिणीमोलिरअणजोग्गो मणी आमिससङ्किणा गिद्धेण अक्खित्तो ।)

विदूषकः—(कर्णं दत्त्वा ।) अत्याहितम् । परं बहुमतः खलु स वयस्यस्य संगमनीयो नाम चूडामणिः । अतः खल्वसमाप्तनेपथ्यस्तत्रभवानासनादुत्थायेत एवागच्छति । यावदेनमुपसर्पामि । (अच्चहिदं । परं बहुमदो क्खु सो वअस्सस्स संगमणीओ णाम चूडामणी अदो खु असमत्तणेवच्छो तत्तभवं आसणादो उट्ठिअ इदो एव्व आअच्छदि । जाव णं उवसप्पामि ।)

'दिष्ट्या' इत्यस्य सुदैवादित्यर्थः । चिरस्य चिरकालात् । ससत्कारोपचारैः सत्कारेण सहिताः ससत्कारा ये उपचाराश्चन्दनसेकपुष्पविक्षेपादयस्तैः । प्रकृतिभिः पौरवर्गेण । अनुरज्यमानः प्रीयमाणः आराध्यमानो वा । चिरकालादर्शनाहितौत्सुक्याभिः प्रजाभिः पताकोच्छ्रयपुष्पवर्षादिनाभिनन्द्यमान इत्यर्थः । असंतानत्वं निरपत्यताम् । तिथिविशेषः पुण्या तिथिर्माध्यादिः । देवीभिः राजस्त्रीभिः । यद्यपि 'देवी कृताभिषेकायाम्' इत्यमरसिंहेनोक्तं तथाप्यत्र देवीशब्दो सामान्यराजस्त्रीवाची द्रष्टव्यः । कृताभिषेको विहितस्नानः । उपकार्या पटभवनम् । इति 'उपकार्योपकारिका' इत्यमरवचनव्याख्याने क्षीरस्वामी । अनुलेपनमाल्ये अनुलेपनं घृष्टचन्दनकुङ्कुमादि माल्यं सुरभिपुष्पहारादि । जातावेकवचनम् । अग्रभागी अग्रे भागोस्यास्तीति । **नेपथ्य इति**—दुकूलोत्तरच्छदे दुकूलम् क्षौमं । 'क्षौमं दुकूलम्' इत्यमरः । उत्तरच्छद उपर्योच्छादनं यस्य तस्मिन् । तालवृन्तं व्यजनं तालपत्रपुटं वा तदेवाधारस्तस्मिन् । अभ्यन्तरविलासिन्योन्तःपुरस्त्रियः । अभ्यन्तरा प्रेष्ठा वा विलासिनी । आमिषं मांसखण्डः । आक्षिप्त उत्क्षिप्य नीतः । **विदूषकः**—बहुमतः अभिमतोऽभीप्सित इत्यर्थः ।

---

१ एसो खु लोओत्तरकदतालवेंटपिहाणे णिक्खिविअ णीअमाणो अच्चराविलासदीए मोलिरअणो मणी इदो–इति, हद्धि हद्धि दुऊलुत्तरच्छदे कलधौदभाअणे णिक्खिविअ आणीअमाणो उव्वासिविलासोज्जिताए मोलिरअणाए पओजिदो मणि–इति, हद्धी हद्धी एस तालवेण्टपिधाणं णिक्खिविअ णीअमाणो अच्चराविरहिदेण मउलिपणअणदाए पओइदो मणी इति, तालउन्तविधाणे भाअणे णिक्खिअ णीअमाणो अत्थराविलासपरिइदामोलीरअणाए पओजइदव्वो मणि–इति च पा. । २ अदो क्खु असमत्तणेवत्थो एव्व तत्तभवं आसणदो उट्ठिदो । ता पासपरिवत्ती होमि (इति निष्क्रान्तः ।) प्रवेशकः । इ. प्र.

(ततः प्रविशति सावेगपरिजनो राजा ।)

राजा—

आत्मनो वधमाहर्ता क्वासौ विहगतस्करः ।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम् ॥ १ ॥

किराती—एष एष खलु मुखकोटिलग्नहेमसूत्रेण मणिना आलिखन्निवाकाशं परिभ्रमति । (एसो एसो खु मुहकोडिलग्गहेमसुत्तेण मणिणा आलिहन्तो विअ आआसं पडिब्भमदि ।)

राजा—पश्याम्येनम् ।

असौ मुखालम्बितहेमसूत्रं बिभ्रन्मणिं मण्डलचारशीघ्रः ।
अलातचक्रप्रतिमं विहंगस्तद्रागरेखावलयं तनोति ॥ २ ॥

किं नु खलु[3] कर्तव्यम् ।

विदूषकः—(उपेत्य) अलमत्र घृणया[4] । अपराधी शासनीयः । (अलं एत्थ घिणाए । अवराही सासणीओ ।)

राजा—सम्यगाह भवान् । धनुर्धनुस्तावत् ।

[निष्क्रान्तौ धनुर्ग्राहिणी यवनी ।]

राजा—वयस्य न दृश्यते विहंगः ।

असमाप्तनेपथ्योऽसमाप्तं नेपथ्यं प्रसाधनकर्म यस्य । 'नेपथ्यं तु प्रसाधने । रङ्गभूमौ वेषभेदे' इति हैमः । **ततः प्रविशतीति**–सावेगपरिजनः सावेगो व्यग्रः परिजनो यस्य । **आत्मन इति**–आत्मनो वधमाहर्ता । न तु मणिम् । मणिरूपवधमाहर्तेत्यर्थः । असौ विहगतस्करः पक्षिचौरः क्व । येन तदेव प्रथमं तत्प्रथमम् । अभूतपूर्वमित्यर्थः । स्तेयं चौर्यं गोप्तुः प्रजानां रक्षितुर्मम गृहे एव कृतम् । **किराती**—मुखकोटिलग्नं चञ्चुवग्रसक्तं हेमसूत्रं यस्य तेन । आलिखन् उल्लिखन् । **असाविति**–असौ विहंगः पक्षी मुखेनालम्बितं हेमसूत्रं यस्य तं मुखालम्बितहेमसूत्रं मणिं बिभ्रत् । मण्डलेन तदाकारभ्रमणेन यश्चारस्तत्र शीघ्रः सत्वरो मण्डलचारशीघ्रः सन् । अलातचक्रप्रतिममलातं ज्वलत्काष्ठं तस्य चक्रं वलयं तत्प्रतिमं तत्तुल्यम् । अतिवेगभ्रमितालातप्रभामण्डलवदित्यर्थः । तद्रागरेखावलयं तस्य मणेः रागः प्रभा तस्य रेखा तस्या वलयं मण्डलं तनोति उत्पादयति । प्रकटयतीत्यर्थः । **विदूषकः**—घृणया दयया । 'कारुण्यं करुणा घृणा' इत्यमरः ।

---

१ ततः प्रविशति राजा सूतश्च कञ्चुकीवधकौ [०रेचकौ, ०रवैतकौ] परिजनश्च इ. पा. वेधक इति किरातनाम । क्वचिद्रेचक इत्यपि । इ. रङ्गनाथः । २ अग्गमुहलग्गहेमसुत्तेण मणिणा अनुरञ्जन्तो विअ आआसं भमदि । ३ खल्वत्र. ४ यवनी–एसा आणइस्सामि (इति निष्क्रान्ता ।)

विदूषकः—इतो दक्षिणान्तेनापगतः शासनीयः कुणपभोजनः । (इदो दक्खिणन्तेण अवगदो सासणीओ कुणवंभोअणो ।

राजा—(परिवृत्यावलोक्य ।) दृष्ट इदानीम् ।

प्रभापल्लवितेनासौ करोति मणिना खगः ।
अशोकस्तबकेनेव दिङ्मुखस्यावतंसकम् ॥ ३ ॥

(प्रविश्य चापहस्ता यवनी ।)

यवनी—भर्तः एदद्धस्तावापसहितं शरासनम् । (भट्टा एदं हत्थावावसहिदं सरासणं ।)

राजा—किमिदानीं धनुषा । बाणपथमतीतः क्रव्यभोजनः । तथाहि

आभाति मणिविशेषो दूरमिदानीं पतत्रिणा नीतः ।
नक्तमिव लोहिताङ्गः परुषघनच्छेदसंयुक्तः ॥ ४ ॥

(कञ्चुकिनं विलोक्य ।) लातव्य मद्वचनादुच्यतां[1] नागरिकः सायं निवासवृक्षाश्रयी विचीयतां विहगदस्युरिति ।

कञ्चुकी—यदाज्ञापयति देवः ।

(इति निष्क्रान्तः ।)

विदूषकः—उपविशतु भवान् सांप्रतम् । क्व गतः स रत्नकु-

धनुर्ग्राहिणी धनुर्गृह्णातीति कार्मुकमानेतुमित्यर्थः । **विदूषकः**—दक्षिणान्तेन दक्षिणदिक्प्रान्तेन । कुणपभोजनः शवभक्षकः । गृध्र इत्यर्थः । 'कुणपः शवमात्रियाम्' इत्यमरः । **प्रभेति**—असौ खगः पक्षी प्रभापल्लवितेन प्रभया दीप्त्या पल्लवितेन सञ्जातपल्लवेन विस्तृतेनेत्यर्थः । मणिना अशोकस्तबकेनाशोककपुष्पगुच्छकेनेव दिङ्मुखस्यावतंसकं करोति । अवतंसशोभामापादयतीत्यर्थः । अवतंसः शिरोभूषणं कर्णभूषणं वा । 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे । ' इत्यमरः । **यवनी**—हस्तावापो हस्तत्राणं ज्याघातादिवारणार्थम् । **राजा**—क्रव्यभोजनो मांसाशी । 'पिशितं तरसं मांसं पललं क्रव्यमामिषम् । ' इत्यमरः । **आभातीति**—इदानीमनेन समयेन पतत्रिणा दूरं नीतो मणिविशेषो मणिप्रवरो नक्तं रात्रौ परुषघनच्छेदसंयुक्तः परुषोऽविरलो यो घनो मेघस्तस्य च्छेदः खण्डस्तेन संयुक्तो लोहिताङ्गो मङ्गलग्रह इवाभाति । 'अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः । ' इत्यमरः । नागरिकः प्रधानः

---

१ सो सउणीओ, सउणिहदासो । इ. पा. २ शरासनेन. ३ उच्यन्तां नागरिकाः सायं निवासवृक्षे विचीयतां विहंगाधमः । इति, विहगतस्करो यत्र विहंगाः स्फुरन्ति।इति च पाठः।

म्भीरको भवतः शासनान्मोक्ष्यते । (उवविसदु भवं संपदं । कहिं गदो सो रअणकुम्भीलओ भवदो सासणादो मुच्चिस्सदि ।)

राजा—(विदूषकेण सहोपविश्य ।)

रत्नमिति न ममं तस्मिन् मणौ प्रियत्वं विहंगमाक्षिप्ते ।
प्रियया तेनास्मि सखे संगमनीयेन संगमितः ॥ ५ ॥

विदूषकः—ननु परिगतार्थोस्मि कृतो भवता । (णं परिगदत्थो ह्मि किदो भवदा ।

(ततः प्रविशति सशरं मणिमादाय कञ्चुकी ।)

कञ्चुकी—जयतु जयतु देवः ।

अनेन निर्भिन्नतनुः स वध्यो बलेन ते मार्गणतां गतेन ।
प्राप्यापराधोचितमन्तरिक्षात्समौलिरत्नः पतितः पतत्री ॥ ६ ॥

(सर्वे विस्मयं रूपयन्ति ।)

कञ्चुकी—अद्भिः प्रक्षालितो मणिः कस्मै प्रदीयताम् ।

राजा—किरातिं अग्निशुद्धमेनं कृत्वा पेटकं प्रवेशय ।

किराती—यद्भर्ताज्ञापयति । (जं भट्टा आणवेदि ।) (इति मणिं गृहीत्वा निष्क्रान्ता)

राजा—ज्ञातव्य अपि जानीते भवान् कस्यायं बाण इति ।

नगररक्षाधिकारी । दस्युश्चौरः । **विदूषकः**—कुम्भीरकश्चौरः । **रत्नमिति**—हे सखे विहङ्गमाक्षिप्ते विहङ्गमेन पक्षिणा आक्षिप्य नीते तस्मिन् मणौ रत्नमिति महार्घो मणिरेष इति हेतोः प्रियत्वं न । किंतु संगमनीयेन तेनाहं प्रियया संगमितः संयोजितः इति स मे प्रियः । **विदूषकः**—परिगतार्थः परिगतः साकल्येन ज्ञातोर्थो वृत्तान्तो येन तथोक्तः । **अनेनेति**—वध्यो वधमर्हति तादृशः स पतत्री मार्गणतां बाणत्वं गतेनानेन ते बलेन सामर्थ्येन । बाणरूपधारिणानेन तव बलेनेत्यर्थः । निर्भिन्नतनुर्विदारितदेहः सन् अपराधोचितमपराधानुरूपं शासनमित्यर्थः । उपकार्यान्तरमिति पाठे अन्यामुपकार्याम् । प्राप्य समौलिरत्नश्चूडामणिसहितः पतितः । ' बलेन ते मार्गणतां गतेन ' इत्यत्र इवशब्दाभावाद्गम्योत्प्रेक्षा । **कञ्चुकी**—कस्मै दीयताम्—गृध्राक्षिप्तं रत्नं राज्ञात्मार्थं रक्षितुमयोग्यमिति मन्यमानस्य प्रश्नोयम् । **राजा**—पेटकं । ' पिटकः पेटकः

---

१ ममतास्मिन् । प्रियत्वं-प्रयत्नः । विहंगमाक्षिप्ते-विहंगमाकृष्टे, विहंगमोक्षिप्ते इ. पा. २ रोषेण । ३ प्योपकार्यान्तरम् । इ. पा. ४ ० तोयम्. ५ वेधक गच्छ । कौषपट्टके स्थापयेनम् । इ. रङ्गनाथः पठति । ६ (ज्ञातव्यं प्रति ।) आर्य जानाति भवान्-

कञ्चुकी—नामाङ्कितो दृश्यते न तु मे वर्णविचारक्षमा दृष्टिः ।

राजा—तेन ह्युपनय शरम् ।

कञ्चुकी—(तथा करोति ।)

राजा—(नामाक्षराण्यनुवाच्य सापत्यतां रूपयति ।)

कञ्चुकी—यावन्नियोगमशून्यं करोमि ।

(इति निष्क्रान्तः ।)

विदूषकः—किं भवान् विचारयति । (किं भवं विआरेदि ।

राजा—शृणु तावत्प्रहर्तुर्नामाक्षराणि । (वाचयति)

उर्वशीसंभवस्यायमैलसूनोर्धनुर्भृतः ।
कुमारस्यायुषो बाणः प्रहर्तुर्द्विषदायुषाम् ॥ ७ ॥

विदूषकः—(सपरितोषम् ।) दिष्ट्या संतानेन वर्धते भवान् । (दिट्ठिआ संताणेण वड्ढदि भवं ।

राजा—सखे कथमेतत् । अन्यत्र नैमिषेयसत्रादवियुक्तोऽहमुर्वश्या । न च मया गर्भव्यक्तिरालक्षिता । कुत एव प्रसूतिः । किं तु

आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम् ।
कतिचिदहानि वपुरभूत्केवलमलसेक्षणं तस्याः ॥ ८ ॥

पेटा मञ्जूषा' इत्यमरः **कञ्चुकी**—वर्णविचारक्षमा वर्णानामक्षराणां विचारे विभावनायां क्षमा समर्था । तस्य वार्धक्ययजनितातिमिरादक्षरविभावनाक्षमत्वमिति ज्ञेयम् । **कञ्चुकी**—यावदिति स्वकार्यव्यापृतो भवामीत्यर्थः । **राजा**—उर्वशीसंभवस्योर्वश्याः संभवो जन्म यस्य । ऐलसूनोः इलाया अपत्यं पुमान् ऐलः पुरूरवास्तस्य सूनोः पुत्रस्य धनुष्मतो धन्विनः । द्विषतामायुषां प्रहर्तुः प्रकर्षेण हर्तुः । आयुष आयुर्नामकस्य कुमारस्यायं बाणः । **राजा**—नैमिषेयसत्रात् नैमिषारण्ये वितताात्सत्रात् । गर्भव्यक्तिः गर्भस्य व्यक्तिः स्फुटचिह्नानि । **आविलेति**—तस्या वपुः शरीरं कतिचिदिनानि कानिचिद्दिनानि । अर्थान्नैमिषेयसत्रात्प्राक् । केवलमाविलपयोधराग्रमाविले कलुषे पयोधराग्रे चूचुकाग्रे यस्य तत् । ' चूचुकं तु कुचाग्रं स्यात् ' इत्यमरः । अत्र वाह्वटः—' अम्लेष्टता स्तनौ

१ विभावन-विभाग-क्षमा.२ तदुपक्षेपय शरं यावन्निरूपयामि.३ धनुष्मतः. ४ महाराओ. ५ अनिमिष्याावियुक्तोहमुर्वश्या। ६गर्भव्यतिकरः। इति,न कदाचिदपि तत्रभवती गर्भाविर्भूतदोहदाप्युलक्षिता । इ. च पा. ७ आनीलचूचुकाग्रम् । कतिचिदहानि-कानि—तानिदिनानि । कतिचिदहानि शरीरं श्लथवलयमिश्रमवत्तस्याः । कानिचिदहानि जातं शरीरमलसेक्षणं तस्याः । इ. पा.

विदूषकः—मा भवान् सर्वं मानुषीधर्मं दिव्यासु संभावयतु। प्रभावनिगूढानि तासां चरितानि। (मा भवं सव्वं माणुसीधम्मं दिव्यासु संभावेदु। पहावणिगूढाहं ताणं चरिदाइं।)

राजा—अस्तु तावदेवं यथा भवानाह। पुत्रसंवरणे किमिव कारणं तत्रभवत्याः।

विदूषकः—को देवतारहस्यानि तर्कयिष्यति (को देवदारहस्साइं तक्कइस्सदि।)

(प्रविश्य।)

कञ्चुकी—जयतु जयतु देवः। देव च्यवनाश्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति।

राजा—उभयमप्यविलम्बितं प्रवेशय।

कञ्चुकी—यदाज्ञापयति देवः।

(इति निष्क्रम्य चापहस्तेन कुमारेण तापस्या च सह प्रविष्टः।)

कञ्चुकी—इत इतो भगवती। (सर्वे परिक्रामन्ति।)

विदूषकः—(विलोक्य।) किं न खलु स एष तत्रभवान् क्षत्रियकुमारको यस्य नामाङ्कितो गृध्रलक्षवेध्यर्धनाराचः। तथा बहुतरं भवन्तमनुकरोति। (किं ण खु सो एसो तत्तभवं खत्तिअकुमारओ जस्स णामङ्किदो गिद्धलक्खवेधी अद्धणाराओ। तह बहुअरं भवन्तं अणुकरेदि।)

राजा—स्यादेवम्। अतः खलु

पीनौ श्वेतान्तौ कृष्णचूचुकौ' इति। लवलीदलपाण्डुराननच्छायं लवली लताविशेषस्तस्या दलवत्पाण्डुराननच्छाया मुखकान्तिर्यस्य तत्। अलसेक्षणमलसे जडे ईक्षणे नेत्रे यस्य तत्तथोक्तम्। अभूत् केवलमस्पष्टगर्भचिह्नान्यालक्षितानि उपारूढगर्भभरा तु नैव दृष्टेत्यर्थः। **विदूषकः**—प्रभावनिगूढानि प्रभावाद्धेतोः निगूढानि मानुषदृष्टेरगोचराणि। **राजा**—संवरणे गोपने। उभयमपि कुमारं तापसीं चेत्यर्थः। **विदूषकः**—गृध्रलक्षवेधी गृध्र एव लक्षं तद्विध्यतीति गृध्र-

---

१ भवं मानुसीधम्मं दिव्वाए ताए. २ किं अण्णं महाराओ-मा वुड्ढं मं-राज्यस्सदिति (मा वृद्धां मां राजा परिहरिष्यतीति). राजा-कृतं परिहासेन। चिन्त्यताम्। विदू०-को-इ०. ३ णं खु एसो क्खत्तिअकुमारो जस्स णामकिंदो गिद्धलक्खवेही णाराओ उवलद्धो तत्थभवदो बहु अणुकरेदि। इ. पा.

बाष्पायते निपतिता मम दृष्टिरस्मिन्
वात्सल्यबन्धि हृदयं मनसः[1] प्रसादः ।
संजातवेपथुभिरुज्झितधैर्यवृत्ति-
रिच्छामि चैनमदयं परिरब्धुमङ्गैः[2] ॥ ९ ॥

कञ्चुकी—भगवति एवं स्थीयताम् ।

(तापसीकुमारौ स्थितौ)

राजा—अम्ब अभिवादये ।

तापसी—महाभाग सोमवंशविस्तारयिता भव । (आत्मगतम् ।) अहो अनाख्यातोपि विज्ञातोस्य राजर्षेरौरसः संबन्धः । (प्रकाशम् ।) जात प्रणम ते गुरुम् । (महाभाअ सोमवंसवित्थारइत्तओ[3] होहि । अम्हो अणाचक्खिदोवि विण्णादो इमस्स राएसिणो[4] ओरसो संबन्धो । जाद पणम दे गुरुं ।)

कुमारः—(चापगर्भमञ्जलिं करोति ।)

राजा—आयुष्मान् भव ।

कुमारः—(आत्मगतम् ।)

यदि हार्दमिदं श्रुत्वा पिता ममायं सुतरोहमस्येति ।
उत्सङ्गवर्धितानां गुरुषु भवेत्कीदृशः स्नेहः[5] ॥ १० ॥

लक्ष्यभेदकः अर्धनाराचोर्धचन्द्राकृत्ययोमुखो बाणः । **बाष्पायत इति**—अस्मिन्कुमारे निपतिता मम दृष्टिर्बाष्पायते बाष्पमुद्गमति । अश्रुपूर्णा भवतीत्यर्थः । 'बाष्पोष्मभ्यामुद्गमने' इति क्यङ् । हृदयमन्तःकरणं वात्सल्यबन्धि वात्सल्यस्य प्रेमातिशयस्य बन्धोस्यास्तीति तथोक्तम् । मनसः प्रसादः प्रसन्नता । मन आनन्दपूर्णमभूदित्यर्थः । उज्झितधैर्यवृत्तिरुज्झिता धैर्ये धैर्यस्य वा वृत्तिर्येन तादृशोहम् । संजातवेपथुभिः संजातो वेपथुः कम्पः येषां तैस्तथोक्तैः । अङ्गैरेनमदयमशिथिलं यथा तथा परिरब्धुमालिङ्गितुमिच्छामि च । इमं कुमारं पश्यन्तं मां कोप्यौरससम्बन्धख्यापको विकारो वत्सलयतीति भावः । **तापसी**—विज्ञातोऽस्य राजर्षेः विज्ञातोनेन राजर्षिणा । कर्तरि षष्ठी । 'जात' इति पुत्रामन्त्रणमिति रघुनाथः । **यदीति**—यदि अयं मम पिता अहमस्य सुत इति श्रुत्वेदं हार्दं प्रेम । 'प्रेमा ना प्रियता हार्द्रं प्रेम स्नेहः' इत्यमरः । तर्हि पितृभिः उत्सङ्गवर्धितानामुत्सङ्गेऽङ्के वर्धितानाम् । लालनपालनादिनोपचितस्नेहानामित्यर्थः । पुत्राणां गुरुषु पितृषु कीदृशः स्नेहो भवेत् ।

---

१ ल्यवन्तु. २ बहति प्रसादम् । इ. पा. ३ सोमवंसं धारअन्तो । इ. पा. ४ आउसो अ । इ त्य. ए. पु. । ५ कीदृशी प्रीतिः । इ. पा.

राजा—भगवति किमागमनप्रयोजनम् ।

तापसी—शृणोतु महाराजः । एष दीर्घायुरायुर्जातमात्र एव उर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः । यत्क्षत्रियकुमारस्य जातकर्मादि विधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम् । गृहीतविद्यो धनुर्वेदेभिविनीतः । (सुणादु महाराओ । एसो दीहाऊ आऊ जादमेत्तो एव्व उव्वसीए किंवि णिमित्तं अवेक्खिअ मम हत्थे णासीकिदो । ज खत्तिअकुमारअस्स जादकम्मादि विहाणं तं से भअवदा चवणेन असेसं अणुचिट्ठिदं । गहिदविज्जो धणुव्वेदे अहिविणीदो ।)

राजा—सनाथः खलु संवृत्तः ।

तापसी—अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम् । (अज्ज पुप्फसमिदत्थं इसिकुमारएहिं सह गदेण इमिणा अस्समविरुद्धं आअरिदं ।)

विदूषकः—(सावेगम् ।) किमिव । (किं विअ ।)

तापसी—गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानोनेन लक्ष्यीकृतो बाणस्य । (गहिदामिसो किल गिद्धो पादवसिहरे णिलीअमाणो अणेण लक्खीकिदो बाणस्य ।)

विदू०—(राजानमवलोकयति ।)

राजा—ततस्ततः ।

तापसी—तत उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा ।

अनिर्वचनीय एव भवेदित्यर्थः । **तापसी**—दीर्घायुः अयं शब्द आशीर्वादपरः । जातकर्मादि जातकर्म जातस्य संस्कारविशेषस्तदादि । यदाह मनुः—'प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।' इति । विधानं विधिः । अभिविनीतः शिक्षितः । **राजा**—सनाथः संवृत्तो भगवत्या धात्रीकर्मतो भगवता च्यवनेन च पितृकर्मत्वेन परिगृहीतत्वादित्यर्थः । **तापसी**—आश्रमविरुद्धमाश्रमवासिजनानुचितं कर्मेत्यर्थः । 'किल' इति वार्तायाम् । इति लोकप्रवादतः श्रुतमिति तस्यार्थः । 'किलशब्दस्तु वार्तायां संभाव्यानुनयार्थयोः' इति विश्वः ।

१ अंदसिअ महाभागस्स (महाराअस्स) इ.पा. २ फुल्लसमिधकुसणिमित्तं...अस्समवासविरुद्ध । इ. पा.

निर्यातय हस्तन्यासमिति । तदिच्छामि देवीमुर्वशीं प्रेक्षितुम् ॥) (तदो उवलद्धउत्तन्तेण भअवदा चवणेण अहं समादिट्ठा ॥ णिज्जादेहि हत्थणासंति । ता इच्छामि देविं उव्वसिं पेक्खिदुं ।)

राजा—तेन हि आसनमनुगृह्णातु भगवती ।

तापसी—(उपनीत आसन उपविशति ।)

राजा—लातव्य आहूयतामुर्वशी ।

कञ्चुकी—यदाज्ञापयति देवः ।

[इति निष्क्रान्तः ।]

राजा—(कुमारमवलोक्य ।) एह्येहि वत्स ।

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ॥ ११ ॥

तापसी—जात आनन्दय पितरम् । (जाद आणन्देहि पिदरं ।)

कुमारः—(राजानमुपगम्य । पादग्रहणं करोति ।)

राजा—(कुमारं परिष्वज्य पादपीठे चोपवेश्य ।) वत्स इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदूषकः—किमिति शङ्किष्यते । ननु आश्रमवासपरिचित एव शाखामृगः (किंति सङ्किस्सदि । णं अस्समवासपरिचिदो एव्व साहामिओ ।)

लक्ष्यीकृतो बाणस्य बाणेन विद्ध इत्यर्थः । निर्यातय प्रत्यर्पय । 'दाने न्यासार्पणे वैरशुद्धौ निर्यातनं मतम् ।' इति मुक्तावली । **राजा**—आहूयतामुर्वशी—अत्र मुखे क्षिप्तबीजस्य पुनरुद्भावनात् 'सन्धिः' नाम सन्ध्यङ्गमुक्तम् । **सर्वाङ्गीण इति**—सुतस्य पुत्रस्य स्पर्शः शरीरसंपर्कः । स्पर्शजन्यं सुखमिति यावत् । सर्वाङ्गीणः सर्वं च तदङ्गं सर्वाङ्गं तद्व्याप्नोतीत्येवंशीलः सर्वाङ्गव्यापी किल । 'तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' इति खः । 'किल' इत्यैतिह्ये । तेन तेन कारणेन । यद्वा तेन स्पर्शेन । मामुपगतेन मामुपगम्येत्यर्थः । आह्लादयस्वानन्दय । तावत् झटिति । चन्द्रकरश्चन्द्रकिरणो यथा स्वस्पर्शेन चन्द्रकान्तं तदाख्यं मणिमाह्लादयति तथा । उपमालङ्कारः । **राजा**—अशङ्कितः शङ्कारहितः । भयकारणं विदूषकवचनादेव स्फुटीभवति । **विदूषकः**—आश्रमवासपरिचितः आश्रमे वास आश्रमवासस्तेन परिचितः संस्तुतः । आश्रम

---

१ णिज्जादेहि एदं उव्वसीहत्थे णासंति । ता उव्वसीं पेक्खिदुं इच्छामि । इ.पा. २ उपनतेन । इ.पा. ३ आणन्देहि–अणुणेहि । ४ आलिंग्य. तव–तावत् । वत्स प्रियसखं मे-इ.पा.

कुमारः—(सस्मितम् ।) तात वन्दे ।

विदूषकः—स्वस्ति भवते । (सत्थि भवदो[1] ।)

(ततः प्रविशत्युर्वशी कञ्चुकी च ।)

कञ्चुकी—इत इतो देवी ।

उर्वशी—(कुमारमवलोक्य ।) को नु खल्वेष सबाणासनः पादपीठे स्वयं महाराजेन संयम्यमानशिखण्डकस्तिष्ठति । (तापसीं दृष्ट्वा ।) अहो सत्यवतीसूचितो मम पुत्रक आयुः । महान् खलु संवृत्तः । (को णु[2] खु एसो सबाणासणो पादपीठे सअं महाराएण संजमीअमाणसिहण्डओ चिट्ठदि । अम्मो सच्चवदीसूइदो मे पुत्तओ[3] आऊ । महन्तो खु संवुत्तो ।) (परिक्रामति ।)

राजा—(उर्वशीं दृष्ट्वा ।)

इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।
स्नेहप्रस्नवनिर्भिन्नमुद्वहन्ती स्तनांशुकम् ॥ १२ ॥

तापसी—जात एहि प्रत्युद्गच्छ मातरम् । (जाद एहि पच्चुग्गच्छ मादरं ।)

उभयोरेकत्रावस्थानात्परिचयः । वानरा हि वृक्षाग्रेभ्यः फलान्युपाहृत्यर्षीन् सेवन्त इति कादम्बर्योदौ वर्णनम् । शाखामृगो वानरः । शाखामृगः शाखाचारी मृगः शाखामृगः । शाकपार्थिवादित्वात्समासः । 'कपिप्लवंगप्लवगशाखामृगवलीमुखाः ।' इत्यमरः । विदूषकस्य विकृतवेषत्वाद्विकृताङ्गत्वाच्छाखामृगसाम्यम् । तदेव भयशङ्काकारणम् । **उर्वशी**—बाणा अस्यन्ते अनेनेति बाणासनं धनुः । संयम्यमानशिखण्डकः संयम्यमानो बध्यमानः शिखण्डकः शिखा यस्य । ' शिखण्डौ तु शिखावर्हौ ' इति रभसः । " अत्र कार्यमार्गणात् ' विबोधः ' नाम सन्ध्यङ्गमुक्तं भवति । अहो सत्यवतीसूचित इत्यत्र कार्यस्य ' निबन्धनात् ' ' ग्रथनं ' नाम सन्ध्यङ्गमुक्तं भवति । " इति काटयवेमः । **इयमिति** इयं त्वदालोकनतत्परा त्वदवलोकनैकसक्ता स्नेहप्रस्नवनिर्भिन्नं स्नेहेन प्रेम्णा प्रस्नवः क्षीराभिस्यन्दनं तेन निर्भिन्नं नितरां भिन्नं । आर्द्रीभूतमिति यावत् । स्तनांशुकमुद्वहन्ती धारयन्तीयं ते जननी प्राप्ता । अत्र रङ्गनाथः—' स्नेहप्रसर— ' इति पाठे स्नेहस्य प्रसरो रोमाङ्करस्वेदादिद्वारा आधिक्यम् । ' प्रस्नव ' इति पाठे

१ वड्ढयु भवम् । इ. त्य ए. पु. २ को णु खु एसो बाणासणहत्थो कणअपादपीठोपविट्ठो सअं महाराएण सज्जीकिअमाणसिहण्डओ चिट्ठदि । इ. पाअपीठे ओविसिअ सअं महाराएण संजम्यमाणसिहो आअंतुओ चिट्ठदि । इ. च. पा. । ३ अअं मे पुत्तओ.

कुमारः—(उर्वशीं प्रत्युद्गच्छति ।)

उर्वशी—अम्ब पादप्रणामं करोमि । (अम्बे पादपणामं करेमि ।)

तापसी—वत्से भर्तुर्बहुमता भव । (वच्छे भत्तुणो बहुमदा होहि ।)

कुमारः—अम्ब अभिवादये ।

उर्वशी—(कुमारमुन्नामितंमुखं परिष्वज्य ।) वत्स पितरमाराधयिता भव । (राजानमुपेत्य ।) जयतु जयतु महाराजः । (वच्छ पिदरं आराधइत्तओ होहि । जेदु जेदु महाराओ ।)

राजा—स्वागतं पुत्रवत्यै । इत आस्यताम् (अर्धासनं ददाति ।)

उर्वशी—(उपविशति ।)

(सर्वे यथोचितमुपविशन्ति ।)

तापसी—एष गृहीतविद्य आयुः सांप्रतं कवचहरः संवृत्तः । तदेतस्य ते भर्तुः समक्षं निर्यातितो हस्तनिक्षेपः । तद्विसर्जयितुमिच्छामि । उपरुध्यते ममाश्रमधर्मः । (वच्छे एसो गहिदविज्जो आऊ संपदं कवअहरो संवुत्तो । ता एदस्स दे भत्तुणो समक्खं णिज्जादिदो हत्थणिक्खेवो । ता विसज्जेदुं इच्छामि । उवरुज्झइ मे अस्समधम्मो ।)

उर्वशी—चिरस्यार्यो दृष्ट्वाधिकतरमवितृप्णास्मि । न शक्नोमि विसृष्टुम् । अन्याय्यं पुनरुपरोद्धुम् । तद्गच्छत्वार्या पुनर्दर्शनाय । (चिरस्स अज्जं देक्खिअ अहिअंदरं अवितिण्हम्हि । ण सक्कुणोमि विसज्जिदुं । अण्णय्यं उण उवरोहिदुं । ता गच्छदु अज्जा पुणोदंसणाअ ।)

स्नेहप्रस्रवोथौत्स्वेद्रोद्गमः ' इति । **उर्वशी**—आराधयिता तोषयिता । **तापसी**—कवचहरः कवचधारणक्षमः । कवचं हरति सहत इति कवचहरः कवचधारणक्षमं वयः प्राप्त इत्यर्थः । ' वयसि च इत्यच् । हस्तनिक्षेपो हस्तन्यासः । विसर्जयितुं विसृष्टा भवितुम् । उपरुध्यते । इहातः परमवस्थानादिति शेषः । **उर्वशी**—अवितृष्णास्मि विगता तृष्णास्या इति वितृष्णा सा न भवतीत्यवि-

---

१ इत्यत्र—इति कुमारेण सहोर्वशी प्रत्युद्गच्छति । इ. पा. २ अज्जे इ. पा. ३ उन्नमितानानं कृत्वा । ०मुखमुन्नमितं कृत्वा । इ. पा. ४ वत्से गहिदविज्जो संपदं आउसो कवअहरो संवुत्तो । एस भत्तुणो समक्खं दे णिज्जादिदो मए तुह हत्थे णिक्खवो । तुह्मेहिं विसज्जिदं अत्ताणं इच्छामि । अवरज्जदि मे अस्समवासधम्मो । इ. पा. ५ कामं चिरस्स पेक्खिअ विरहुक्कण्ठिदम्हि ण उण धम्मावरोधे वट्टिदुं । इ. चिरस्स अज्जउत्तं पेक्खिअ अवहिदहिअए ण जुज्जदि पुणो अस्समधम्मो विभाविदुं । इ. पा.

राजा—अम्ब भगवते च्यवनाय मां प्रणिपातयं[1]।

तापसी—एवं भवतु। (एव्वं भोदु।)

कुमारः—आर्ये यदि सत्यमेव निवर्तसे[2] तदा मामप्याश्रमं नेतुमर्हसि।

राजा—अयि वत्स उषितं त्वया पूर्वस्मिन्नाश्रमे। द्वितीयमध्यासितुं तव समयः।

तापसी—जात गुरोर्वचनमनुतिष्ठ। (जाद गुरुणो वअणं अणुचिट्ठ।

कुमारः—तेन हि

यः सुप्तवान् मदङ्के शिखण्डकण्डूयनोपलब्धसुखः।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम्॥ १३॥

तापसी—(विहस्य।) एवं करोमि। स्वस्ति भवतु युष्मभ्यम्। (एव्वं करेमि। सत्थि भोदु तुह्माणं[3]।)

[इति निष्क्रान्ता।]

राजा—कल्याणि

अद्याहं पुत्रिणामग्र्यः सत्पुत्रेणामुना तव।
पौलोमीसंभवेनेव जयन्तेन पुरंदरः॥ १४॥

उर्वशी—(स्मृत्वा रोदिति।)

तृष्णा साभिलाषा। आर्यायाः समागमस्येति शेषः। **राजा**—पूर्वस्मिन्नाश्रमे ब्रह्मचर्याश्रम इत्यर्थः। द्वितीयं गार्हस्थ्याश्रमम्। **यः सुप्तवानिति**—यः शिखण्डकण्डूयनोपलब्धसुखः शिखण्डी बर्हस्तस्य कण्डूयनं खर्जनं तस्मादुपलब्धं सुखं येन स तादृशः सन् यो मदङ्के सुप्तवान् सुषुप्तिं भेजे। तं जातकलापमुद्गतपिच्छभारम्। 'कलापः संहते बर्हे काञ्च्यादौ तूणवृन्दयोः।' इति मुक्तावली। मणिकण्ठकं नाम शिखिनं मयूरं प्रेषय। **अद्याहमिति**—अहमद्य पुत्रिणां पुत्रवतामग्र्यः श्रेष्ठः। पौलोमी पुलोमजा शची। तस्याः संभवो यस्य तेन जयन्तेन तन्नामकेन सूनुना पुरन्दर इन्द्र इव। 'जयन्तः पाकशासनिः' इत्यमरः। अनुरूपं वर्णनं रघुवंशे—'यथा जयन्तेन शचीपुरन्दरौ' इति।

---

१ आर्य तत्रभवते च्यवनाय मत्प्रणाममावेदयिष्यसि। इ. पा. २ सत्यवति। यदि सत्यं निवर्तनमेतत्तदा इ.।—मामप्याश्रमपदं नयस्व। इ. पा. ३ सत्थि भोदु—दीहाउ होहि। इ. पा. उ० भअवदि पादवन्दणं करोमि। रा० भगवति प्रणमामि। **तापः** सत्थि सव्वाणं। इति निष्क्रान्ता। इत्य. ए. पु. ४ सुन्दरि। इ. पा. ५ अहं हि। इ. पा.।

विदूषकः—किं नु खलु तत्रभवती एकपदेऽश्रुमुखी संवृत्ता । (किं णु खु तत्तहोदी एक्कवदे अस्सुमुही संवुत्ता ।

राजा—(सावेगम् ।)

किं सुन्दरि प्ररुदितासि ममोपपन्ने
वंशस्थितेरधिगमान्महति प्रमोदे ।
पीनोन्नतस्तनविसर्पिभिरानयन्ती
मुक्तावलीविरचनापुनरुक्तिमस्रैः ॥ १५ ॥

(बाष्पमस्याः प्रमार्ष्टि ।)

उर्वशी—शृणोतु महाराजः । प्रथमं पुनः पुत्रदर्शनेन विस्मृतास्मि । इदानीं महेन्द्रसंकीर्तनेन स्मारितः समयो मम हृदयमायासयति । (सुणादु महाराओ । पढमं उण पुत्तदंसणेण[1] विसुमरिदम्हि । दाणिं महिन्दसंकित्तणेण सुमरिदो समओ मह हिअअं आआसेदि ।)

राजा—कथ्यतां समयः ।

विदूषकः—एकपदे अकस्मात् । अश्रुमुखी अश्रूणि मुखे यस्याः सा तथाविधा । **किं सुन्दरीति**—हे सुन्दरि वंशस्थितेः वंशस्य कुलस्य स्थितिः प्रतिष्ठा तस्या अधिगमात्प्राप्तेः । वंशस्य स्थितिर्यस्मात्तादृशस्य पुत्रस्य प्राप्तेरिति वा । मम महति प्रमोदे प्रकृष्टो मोदः प्रमोदस्तस्मिन्नत्यानन्द इत्यर्थः । उपपन्ने उपस्थिते सति किं किमर्थं प्ररुदितासि रोदितुं प्रवृत्तासि । 'आदिकर्मणि क्तः कर्तरि च' इति क्तप्रत्ययः । 'वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेपि च ।' इति विश्वः । 'उपपन्ने' इत्यत्र उपनीते [कृते] इति । 'महति' इत्यत्र स्फुरति [प्रकाशमाने] इति रङ्गनाथः पठति । पीनोन्नतस्तनविसर्पिभिः पीनौ पीवरौ उन्नतौ यौ स्तनौ तयोर्विसर्पिभिः प्रसरद्भिरस्रैरश्रुभिः । मुक्तावलीविरचनापुनरुक्तिं मुक्तावली मौक्तिकहारस्तस्या विरचनायाः पुनरुक्तिमानयन्ती । पुनरुक्तां मुक्तावलीं विरचयन्तीत्यर्थः । एकस्याः सत्त्वादन्या पुनरुक्ता व्यर्था । ''पीनस्तनोपरिनिपातिभिरर्पयन्ती मुक्तावलीविरचनां पुनरुक्तमस्रैः । ' इति रङ्गनाथस्य पाठः । तत्र पुनरुक्तमिति क्रियाविशेषणमिति तद्व्याख्यानम् । **उर्वशी**—विस्मृतास्मि समयमित्यर्थात् । संकीर्तनं नामग्रहणम् । समयो नियमः कालावधिर्वा । ' समयाः शपथाचारकालसिद्धान्तसंविदः ' इत्यमरः । आ-

१ पुत्तदुहदंसणेण । पुत्तदंसणसमुत्थिदेण आनन्देण णन्दिदम्हि (विसुमरिदम्हि) इ.पा. । दाणिं इ०—समअं सुमरिदम्हि । अवधी मए सुमरिदो । मम हिअअे ठिदं समएण । आआसेदि—आहाण्डिअदि । इ. पा. हिअअं आआसेदि इति बहुषु पुस्तकेषु नास्ति।

उर्वशी—अहं पुरा महाराजगृहीतहृदया महेन्द्रेण आज्ञापिता। (अहं पुरा महाराअगहिदहिअआ महिन्देअ आणत्ता।

राजा—किमिति।

उर्वशी—यदा स मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य वंशकरस्य मुखं प्रेक्षिष्यते तदा त्वया भूयोपि मम समीपमागन्तव्यमिति। ततो मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं भगवतश्च्यवनस्याश्रमपदे एष पुत्र आर्यायाः सत्यवत्या हस्तेऽप्रकाशं निक्षिप्तः। अद्य पितुराराधनसमर्थः संवृत्त इति कलयन्त्या निर्यातितो मे दीर्घायुः। तदेतावान्मे महाराजेन संवासः। (जदा सो मम पिअसहो राएसी तुइ समुप्पण्णस्स वंसकरस्स मुहं पेक्खिस्सदि तदा तुए भूओवि मम समीवं आअन्तव्वंति। तदो मए महाराअविओअभीरुदाए जादमेत्तो एव्व विज्जागमणिमित्तं भवअदो चवणस्स अस्समपदे एसो पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पआसं णिक्खित्तो। अज्ज पिउणो आराहणसमत्थो संवुत्तोति कलअन्तीए णिज्जादिदो मे दीहाऊ। ता एत्तिओ मे महाराएण संवासो।)

(सर्वे विषादं रूपयन्ति।)

राजा—(सनिःश्वासम्।) अहो सुखप्रत्यर्थिता दैवस्य।

यासयति पीडयति। **उर्वशी**—वंशकरस्य—वंशं करोति प्रवर्तयतीति वंशकरस्तस्य तथाविधस्य। जातमात्रो जात एव जातमात्रः। विद्यागमनिमित्तं विद्यानामागमोऽधिगमः स निमित्तं यस्मिन्कर्मणि तद्यथा तथा। अप्रकाशं निभृतम्। निक्षिप्तः न्यासीकृतः। आराधनसमर्थः। 'आराधनं साधने स्यादवाप्तौ तोषणेपि च।' इत्यमरः। कलयन्त्या आलोचयन्त्या। **राजा**—सुखप्रत्यर्थिता प्रतिकूलमर्थयत इत्येवंशीलं प्रत्यर्थि सुखस्य प्रत्यर्थि सुखप्रत्यर्थि तस्य भावस्तत्ता। सुखप्रतिरोधिता। 'अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः।'

---

१ सुणादु महाराओ। अहं पुरा महाराअगहिदहिअआ गुरुसावसंमूढा महेन्देण अवधीकदुअ अम्भवणुण्णादा। इ. पा. २ रणसहाओ। इ. पिअवअस्सो। इ. समु०—समुप्पण्णसुतस्स वंसकरस्स—वंसधरस्स। इ. अज्जाए...णिक्खित्तो एसो पुत्तओ...अत्तणा णिखित्तो। कलअन्तिए—त्ति काउण णिज्जादिदो एसो दिहाऊआऊ। इ. पाठान्तराणि। ३ राजा—मोहमुपगच्छति। सर्वे—समस्ससदु महाराओ। कञ्चुकी—समाश्वासितु महाराजः। विदूषकः—अच्चब्भणणं। इत्यधिकं रङ्गनाथः पठति।

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोयम् ॥ १६ ॥

विदूषकः—अयं सोर्थः अर्थानुबन्धी संवृत्तः । सांप्रतं तर्कयामि तत्रभवता वल्कलं गृहीत्वा तपोवनं गन्तव्यमिति । (अअं सो अत्थो अणत्थाणुबन्धी संवुत्तो । संपदं तक्केमि तत्तभवदा वक्कलं गेण्हिअ तवोवणं गन्दव्वंति ।)

उर्वशी—मामपि मन्दभागिनीं कृतविनयस्य पुत्रस्य लाभानन्तरं स्वर्गारोहणेनावसितकार्यां महाराजः समर्थयते । (मंपि मन्दभाइणिं किदविणअस्स पुत्तस्स लाभाणन्तरं सग्गारोहणेण अवसिदकज्जं महाराओ समत्थेदि ।)

राजा—सुन्दरि मा मैवम् ।

न हि सुलभवियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासनं तिष्ठ भर्तुः ।

इत्यमरः । **आश्वासितस्येति**—हे कृशोदरि कृशमुदरं यस्यास्तत्सम्बुद्धिः हे तनुमध्ये । अत्रोदरशब्दो लक्षणया कट्यां वर्त्तते । सुतोपलब्ध्या पुत्रप्राप्त्या आश्वासितस्य कृतसान्त्वनस्य मम नाम । यावत्सन्तानचिन्तानिवृत्त्या कृतसमाधानोस्मि तावदित्यर्थः । सद्यः सपदि त्वया सहायं विप्रयोगश्चिरवियोग उपस्थितः प्राप्तः । उक्तार्थं उपमामाह–प्रथमाभ्रवृष्ट्या नूतनमेघवर्षणेन । 'अभ्रं मेघो वारिवाहः' इत्यमरः । व्यावर्तितातपरुजः । व्यावर्तिता दूरीकृता आतपरुग्घुष्मपीडा । तज्जनिता क्लान्तिरिति वा । यस्य तथाविधस्य वृक्षस्य वैद्युतो विद्युत्सम्बन्धी अग्निरिव । पूर्णेयमुपमा । 'आतपो रश्मिमात्रे स्यात्सूर्यरश्मौ च दृश्यते ।' इति धरणिः । अनर्थानुबन्धी अनर्थस्यानुबन्धः परम्परा अस्यास्तीति । 'अत्रभवान्देवराजः स्वयमनुग्राहयितव्यः' इत्यपि क्वचित्पाठः । इति रङ्गनाथः । तपोवनं गन्तव्यं नूनं तपोवनं गमिष्यति । कृतविनयस्य कृतः सम्पादितो विनयः शिक्षा येन । 'विनयं प्रणतौ प्राहुः शिक्षायां विनयो मतः ।' इति विश्वः । अवसितकार्यां समाप्तकर्तव्याम् । समर्थयते कदाचिन्मंस्यते । सुविनीतपुत्रस्य लाभानन्तरं कृतकृत्या भूत्वा मत्सुखासुखनिरपेक्षेयं स्वर्गं यास्यतीति कदाचिन्महाराजस्य बुद्धिः स्यादित्यर्थः । **न हीति**–सुलभवियोगा सुलभः

---

१ ० नुबन्धः; बन्धीति तक्केमि इ. पा. २ हा हदह्मि मन्दभाआ । मंत्रि किदविणाअस्स पुत्तअस्स लम्भाणन्तरं सग्गरोहणेण अवसिदकज्जं विप्पओअमुहिं महाराओ समत्थइस्सदि । इ. पा.

अहमपि तव सूनावायुषि न्यस्तराज्यो
विचरितमृगयूथान्याश्रयिष्ये वनानि ॥ १७ ॥

कुमारः—नार्हति तातः पुंगवधारितायां[1] धुरि दम्यं[2] नियोजयितुम्।

राजा—अयि वत्स[3]

शमयति गजानन्यान्गन्धद्विपः कलभोऽपि स-
न्भवति सुतरां वेगोदग्रं[4] भुजङ्गशिशोर्विषम्।
भुवमधिपतिर्बालावस्थोप्यलं परिरक्षितुं
न खलु वयसा जात्यैवायं स्वकार्यसहो भरः[5] ॥ १८ ॥

वियोगो यस्याः सा । परवत्ता पराधीनता । 'परतन्त्रः पराधीनः परवान्' इत्यमरः । आत्मप्रियाणि स्वस्येष्टानि कर्तुं न प्रभवति हि । परतन्त्रः पुरुष आत्मनः शरीरस्य तच्चेष्टितानां चानीशतया नियमेन आत्मप्रियाणि कर्तुं नैव शक्नोतीति भावः । अत एव भर्तुः स्वामिनो महेन्द्रस्य शासने तिष्ठ आज्ञानुरूपं वर्तस्वेत्यर्थः । अहमपि तव सूनावायुषि न्यस्तराज्यो निवेशितराज्यभरः । तस्मै राज्यं दत्वेत्यर्थः । विचरितमृगयूथानि विचरिता मृगयूथा मृगसमूहा येषु तानि । मृगाधिष्ठितानीत्यर्थः । वनानि आश्रयिष्ये । वानप्रस्थाश्रमं स्वीकरिष्यामीत्यर्थः । **कुमारः**—पुंगवधारितायां पुमांश्चासौ गौश्च पुंगवः महोक्षः । 'गोरतद्धितलुकि' इति टच् । तेन धारितायामूढायाम् । 'पुंगवधार्यायाम्' इति क्वचित्पाठः । पुंगवेन धारयितुमर्हायामिति तस्यार्थः । दम्यं वत्सतरम् । 'दम्यवत्सतरौ समौ' इत्यमरः । **शमयतीति**—गन्धप्रधानो द्विपः गन्धद्विपः गन्धगजः कलभो बालोपि सन्नन्यान्गजान् शमयति अभिभवति । गन्धद्विपपलक्षणं पालकाप्ये—'यस्य गन्धं समाघ्राय न तिष्ठन्ति प्रतिद्विपाः । तं गन्धहस्तिनं प्राहुर्नृपतेर्विजयावहम् ॥' इति । भुजंगशिशोरपि विषं गरलं सुतरामत्यन्तं वेगोदग्रं वेगैरुदग्रं चण्डम् । दष्टानां प्राणहरमित्यर्थः । भवति । अत्र रङ्गनाथटीका यथा—वेगैः 'धातोर्धोत्वन्तरप्राप्तिर्विषवेग इति स्मृतः' इति वचनोक्तैर्विषवेगैरुदग्रं क्रूरम् । भुजङ्गशिशोर्विषं गरलं प्रभवति मारणसमर्थं भवति । धातवश्च सप्त । उक्तं च वाग्भटादौ—'रसासृङ्मांसमेदोस्थिमज्जशुक्राणि धातवः' इति । एवं च सप्तैव विषवेगा अपि भवन्ति । तल्लक्षणानि च विषतन्त्रे पृथक्पृथङ्निरूपितानि । यथा—'वेगो रोमाञ्चमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्ध्वस्तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ । यो वेगः पञ्चमोऽसौ नयनविवशतां कण्भङ्गं च हिक्कां षष्ठो निःश्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्य ॥' इति । बालावस्थोप्यधिपती राजा भुवं परिरक्षितुं सर्वतः शत्रवादिभ्यो रक्षितुमलं

---

१ वद्य विन्यस्य राज्यम्. २ नृप०. तात नार्हसि मां नृपपुङ्गवधारितायां । इ. पा. ३ वत्स मा मैवम्. ४ प्रभवतितराम् । वेगोदग्रं—वेगोद्रिक्तम् । इ. पा. ५ गुणः । इ. पा.

ज्ञातव्यं मद्वचनादमात्यपरिषदं ब्रूहि संभ्रियतामायुषो राज्याभिषेकः[1] इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति दुःखितो निष्क्रान्तः ।)

(सर्वे दृष्टिप्रविघातं रूपयन्ति ।)

राजा—(आकाशमवलोक्य ।) किं[3] नु खलु निरभ्रे विद्युत्संपातः ।

उर्वशी—(विलोक्य ।) अहो भगवान् नारदः । (अम्मो भअवं णारदो ।)

राजा—[4]अये भगवान् नारदः । य एषः—

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते शशिकलामलवीतसूत्रः ।
मुक्तागुणातिशयसंभृतमण्डनश्री-
र्हेमप्ररोह इव जङ्गमकल्पवृक्षः ॥ १९ ॥

समर्थो भवति । उक्तार्थं अर्थान्तरं न्यस्यति—अयमुक्तरूपो भरः अतिशयः प्रकर्षः । ' अथातिशयो भरः ' इत्यमरः । जात्या जन्मनैव स्वकार्यसहः स्वकार्यनिर्वाहक्षमो भवति । वयसा तारुण्यादिना न खलु तथा भवति । पुरुषविशेषनिष्ठः स्वभावसिद्ध एव कोपि महिमातिशयः कार्यनिर्वाहसहिष्णुर्भवति । न तत्र वयआदि हेतुरिति भावः । अमात्यपरिषदममात्यसमूहम् । संभ्रियतां राज्याभिषेकः राज्याभिषेकस्योचिताः संभाराः क्रियन्ताम् । **राजा**—किं नु खलु इत्या०—विद्युत्तेजसेव नारददेहदीप्त्या चक्षुषि प्रतिहते इयमुक्तिः । अत्राद्भुतसम्प्राप्तेः ' उपगूहनम् ' नाम सन्ध्यङ्गमुक्तम् । तदुक्तं साहित्यदर्पणे—' तद्भवेदुपगूहनम् । यस्मादद्भुतसम्प्राप्तिः ' इति । **गोरोचनेति**—गोरोचनानिकषपिङ्गजटाकलापः गोरोचनायाः निकषाः कषपाषाणा लक्षणया तद्वता लेखास्तद्वत्पिङ्गः पिङ्गलो जटाकलापो जटासमूहो यस्य । शशिकलामलवीतसूत्रः शशिकलावदमलं धवलं वीतसूत्रमुपवीतं यस्य । शशिकलात्र द्वितीयाचन्द्रः । मुक्तागुणातिशयसम्भृतमण्डनश्रीः मुक्तागुणानां मौक्तिकहाराणामतिशयैरुत्कर्षैः । उत्कृष्टमुक्ताहारैरित्यर्थः । ' उत्कर्षोतिशये ' इत्यमरः । सम्भृता कृता

१ आर्य ज्ञातव्य । कञ्चुकी—आज्ञापयतु देवः । राजा—इ. पा.२सम्भ्रियन्तां कुमारस्यायुषो राज्याभिषेकसम्भाराः । इ.पा.३ युतो नु खलु मो विद्युत्सम्पातः । इ. पा. ४ (निपुणं विलोक्य) अये.

[1]अर्घ्यमस्मै ।

उर्वशी—(यथोक्तमादाय ।) इयं भगवतेऽर्हणा । (इअं भअवदो अरिहणा[2] ।)

(ततः प्रविशति नारदः)

नारदः—विजयतां[3] मध्यमलोकपालः ।

राजा—(उर्वशीहस्तादर्घ्यमादायावर्ज्य ।) भगवन्नभिवादये ।

उर्वशी—भगवन् प्रणमामि । (भअवं पणमामि ।)

नारदः—अविरहितौ दम्पती भूयास्ताम् ।

राजा—(आत्मगतम् ।) अपि नामैवं स्यात् । (प्रकाशम् । कुमारमाश्लिष्य ।) वत्स भगवन्तमभिवादयस्व ।

कुमारः—भगवन्नौर्वशेय[4] आयुः प्रणमति ।

नारदः—आयुष्मानेधि ।

मण्डनश्रीरलङ्कारशोभा यस्य । एतादृशः सन् हेमप्ररोहो हेम्नः सुवर्णस्य प्ररोहा जटाशाखादयो यस्य तादृशः जङ्गमकल्पवृक्षो गमनशीलः कल्पवृक्ष इव संलक्ष्यते । स्वभावोक्तिरुपमालङ्कारौ । नारदावतारस्यानुरूपं वर्णनं माघकविकृतं शिशुपालवधे प्रथमसर्गे द्रष्टव्यम् । अर्घः पूजाविधिस्तदर्थं द्रव्यमर्घ्यम् । तदुक्तम्—' गन्धमाल्यादिसंयुक्तमुदकमर्घ्यमुच्यते । ' इति । ' पादार्घाभ्यां च ' इति यत्प्रत्ययः । ' षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि । ' इत्यमरः । **उर्वशी**—अर्हणा पूजा । 'पूजा नमस्यापचितिः सपर्यार्चार्हणाः समा ।' इत्यमरः । **नारदः**—मध्यमलोकपालः मध्यमलोको मर्त्यलोकस्तस्य रक्षिता । 'पुंसि श्रुतौ मध्यमलोकमर्त्यौ ' इति त्रिकाण्डीशेषः । **नारदः**—दंपती जाया च पतिश्च । राजदन्तादिगणे जायाशब्दस्य दम्भावो जम्भावश्च निपात्यते । अत्र उर्वशीपुरूरवसोः निष्प्रत्यूहसमागमोपक्षेपणात् ' कार्यं ' नाम पञ्चम्यर्थप्रकृतिरुक्ता । **राजा**—अभिवादयस्व अभिवादनं कुरु । अभिवादनं नामोच्चारणपूर्वको नमस्कारः । आभिमुख्येन वाद्यते आशीरनेनेत्यभिवादनम् । ' समे तु पादग्रहणमभिवादनमित्युभे ।' इत्यमरः । **कुमारः**—और्वशेयः उर्वश्या अपत्यं पुमान्

१ (ससम्भ्रमम्) अ०;अर्घोर्घस्तावत्. १ अर्चना इ.;अअं भगवदो अग्घो । इ. पा ३ विजयतां विज०. ४ पौरूरवस और्वशेयः प्रणमति । इ. पा.

राजा—अयं विष्टरोनुगृह्यताम् ।

नारदः—(तथोपविष्टः ।)

(सर्वे नारदमनूपविशन्ति ।)

नारदः—राजन् श्रूयतां महेन्द्रसंदेशः ।

राजा—अवहितोऽस्मि ।

नारदः—प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति—

राजा—किमाज्ञापयति ।

नारदः—त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरसंगरो भावी[1] । भवांश्च सांयुगीनः सहायो नः । तेन त्वया न शस्त्रं संन्यस्तव्यम् । इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति ।

उर्वशी—(अपवार्य ।) अहो शल्यं मे हृदयादपनीतमिव । (अम्महे सल्लं मे हिअआदो अवणीदं विअ ।)

राजा—परवानस्मि देवेश्वरेण ।

नारदः—युक्तम् ।

राजा–विष्टरः आसनम् । 'विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् । ' इत्यमरः । ' वृक्षासनयोर्विष्टरः ' इति निपातः । **राजा**–प्रभावदर्शी अयं शब्दो व्याख्यातपूर्वः । **नारदः**–अनुशास्ति कर्तव्यत्वेन निर्दिशति । त्रिकालदर्शिभिः त्रीन्कालान्भूतभविष्यद्वर्तमानान्पश्यन्त्येवंशीलैः । सांयुगीनः संयुगे साधुर्युद्धकुशलः । ' प्रतिजनादिभ्यः खञ् ' इति खञ्प्रत्ययः । ' सांयुगीनो रणे साधुः ' इत्यमरः । संन्यस्तव्यं त्यक्तव्यम् । यावदायुर्यावज्जीवम् । इयं चोर्वशीत्यादिना समग्रफलसम्प्राप्तिकथनात् ' फलागमः ' नाम पञ्चम्यवस्था प्रदर्शिता । अस्याः कार्येणार्थप्रकृत्या योगान्निर्वहणसन्धिः । **उर्वशी**—शल्यमिव मे हृदयादपनीतमिति वा योजना । शल्यं बाणाग्रम् । अत्र दुःखापनयात् ' समयः ' नाम सन्ध्यङ्गमुक्तम् । ' समयो दुःखनिर्याणम् ' इति तल्लक्षणात् । **राजा**—परवानस्मि देवेश्वरेण महे-

---

१ त्रैलोक्यदर्शिभिरादिष्टः सुरासुरविमर्दो भावी । भवांश्च सांयुगीनसहायस्तेन न त्वयः शस्त्रसंन्यासः कार्यः । इयं चोर्वशी यावदायुस्ते धर्मचारिणी भवत्विति । इ. पा.

त्वत्कार्यं वासवः कुर्यात्त्वं च तस्येष्टमाचरेः ।
सूर्यः समेधयत्यग्निमग्निः सूर्यं च तेजसा ॥ २० ॥

(आकाशमवलोक्य ।) रम्भे[1] उपनीयतां स्वयं महेन्द्रेण संभृतः कुमारस्यायुषो यौवराज्याभिषेकः ।

(प्रविष्टा यथोक्तहस्ता अप्सरसः ।)

अप्सरसः—भगवन्नेतेऽभिषेकसंभाराः (भअवं इमे अभिसेअसंभाराः ।)

नारदः—उपवेश्यतामायुष्मान्भद्रपीठे[3] ।

रम्भा—इतो वत्स । (इदो वच्छ ।) (इति कुमारमुपवेशयति ।)

न्द्राज्ञानुरोधात्तदादिष्टमेव करोमीत्यर्थः । अत्र वाञ्छितसिद्धेर्गम्यमानत्वात् ' आनन्दः ' नाम सन्ध्यङ्गमुपक्षिप्तम् । **त्वत्कार्यमिति**—वासव इन्द्रस्त्वत्कार्यं तवाभीष्टं कुर्यात् । त्वं च तस्येष्टमाचरेः कुर्याः । एवं युवयोरन्योन्योपकार्योपकारकभावोस्त्वित्यर्थः । अत्र दृष्टान्तमाह–सूर्योग्निं तेजसा समेधयति वर्धयति । अग्निश्च सूर्यं तेजसा समेधयति । ' अग्नितेजो हि दिने सूर्यमनुप्रविशति रात्रौ सूर्यतेजोग्निमिति पौराणिकी प्रसिद्धिः । ' इति रङ्गनाथः । इमं विषयमधिकृत्य ' दिनान्ते निहितं तेजः सवित्रेव हुताशनः । ' इत्यत्र रघुवंशटीकायां मल्लिनाथोपि ' सौरं तेजः सायमग्निं संक्रमते । आदित्यो वा अस्तं यन्नग्निमनुप्रविशति । अग्निर्वादित्यं सायं प्रविशति । ' इति श्रुतीरुदाहरति । **अप्सरसः**–अभिषेकसंभाराः–'बिल्ववल्मीकमृत्तिकादिसामग्री ' इति रङ्गनाथः । अभिषेकवर्णनं कविनैव रङ्गवंशे सप्तदशे सर्गे सविस्तरं कृतं तत्रैव द्रष्टव्यम् । **नारदः**–भद्रपीठं हैमं मणिखचितमासनम् । 'नृपासनं तु यद्भद्रासनं सिंहासनं च तत् । हैमं ' इत्यमरः । अत्र रघुनाथः–भद्रासनलक्षणं चोक्तं देवीपुराणे–हैमं च राजतं ताम्रं क्षीरवृक्षमयं च वा । भद्रासनं प्रकर्तव्यं सार्धहस्तसमुच्छ्रितम् । सपादहस्तमानं च राज्ञो माण्डलिकान्तरात् ॥ ' वराहसंहितायां च–' त्रिविध-

---

१ तव कार्यमसौ कुर्यात्त्वं च तस्येष्टकार्यकृत् । सूर्यः संवर्धयत्यग्निमग्निः सूर्यं स्वतेजसा ॥ इ. पा. २ रम्भे आनीयतां कुमारस्यायुषो यौवराज्याभिषेकाय महेन्द्रेण संभृतः संभारः । इ. पा. ३ उपविश्यतामायुष्मन; अयमायु०. ४ भद्रपीठे उपवेशयति । इ. पा.

नारदः—(कुमारस्य शिरसि कलशमावर्ज्य ।) रम्भे निर्वर्त्यतां शेषो विधिः ।

रम्भा—(यथोक्तं निर्वर्त्य ।) वत्स प्रणम भगवन्तं मातापितरौ च । (वच्छ पणम भअवन्तं मादापिदरो अ ।)

कुमारः—(यथाक्रमं प्रणमति ।)

नारदः—स्वस्ति भवते ।

राजा—कुलधुरन्धरो भव ।

उर्वशी—पितुराराधयिता भव । (पिदुणो आराधइत्तओ होहि ।)

(नेपथ्ये वैतालिकौ ।)

प्रथमः—विजयतां युवराजः ।

अमरमुनिरिवात्रिर्ब्रह्मणोत्रेरिवेन्दु-
र्बुध इव शिशिरांशोर्बोधनस्येव देवः ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समाप्ता वंश एवाशिषस्ते ॥ २१ ॥

स्तस्योच्छ्रायो हस्तः पादाधिकोर्ध्वयुक्तश्च । माण्डलिकानन्तरजित्समस्तराज्यार्थिनां शुभदः ॥ ' इति । **नारदः**—शेषो विधिर्नीराजनादिः । **रम्भा**—भगवन्तं नारदमित्यर्थात् । ' भगवन्तं महर्षिम् ' इति क्वचित्पाठः । **राजा**—कुलधुरन्धरः कुलधौरेयः धुरं धारयतीति धुरन्धरः । ' संज्ञायां भृतृवृजिधारिसहितपिदमः ' इति खच् । सूत्रे धृधातोर्णिजन्तस्य ग्रहणात् ' खचि ह्रस्वः ' इत्यनेन ह्रस्वश्च । **अमरमुनिरिति**—अमरमुनिर्देवर्षिरत्रिः ब्रह्मण इव । अत्रिर्ब्रह्मणो मानसपुत्रः । तदुक्तं मानवसंहितायाम्—मरीचिमत्र्यङ्गिरसौ—इति । अत्रेरिन्दुश्चन्द्र इव चन्द्रोत्रेर्नेत्रसमुत्पन्न इति पुराणानि । तदुक्तं पाद्मे—ब्रह्मणो मानसः पुत्रस्त्वत्रिर्नाम महातपाः । स्रष्टुकामः प्रजा वत्स तपस्तेपे सुदुस्तरम् । ऊर्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवत् । नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः ॥ इत्यादि । एतत्सर्वं ' अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः । ' इत्यत्र मल्लिनाथेन विस्तरश उक्तमत एव विरम्यतेऽस्माभिः । बुधः किलः बृहस्पतिपत्नीतारागर्भे सोमेनोत्पादितः । अत्र मत्स्यपुराणम्—ततः संवत्सरस्यान्ते द्वादशादित्यसन्निभः ।

---

१ वंशवर्धनः । इ. पा. २ वैतालिकद्वयम्, विजयतां इ०. प्रथमः—

द्वितीयः—

तव पितरि पुरस्तादुन्नतानां स्थितेस्मिन्
स्थितिमति च विभक्ता त्वय्यनाकम्प्यधैर्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥ २२ ॥

अप्सरसः—(उर्वशीमुपेत्य ।) दिष्ट्या पुत्रस्य युवराजश्रिया भर्तुरविरहेण वर्धसे । (दिट्ठिआ[1] पुत्तस्स जुवराअसिरीए भत्तुणो अविरहेण वड्ढसि ।)

उर्वशी—साधारण एषोभ्युदयः । (कुमारं[2] हस्ते गृहीत्वा ।) एहि वत्स ज्येष्ठमातरमभिवन्दस्व । (साहारणो एसो अब्भुदओ । एहि वच्छ जेट्ठमादरं अभिवन्देहि ।)

दिव्यपीताम्बरधरः पीताभरणभूषितः । राज्ञः सोमस्य पुत्रत्वात्सौम्यो राजसुतः स्मृतः ॥ ' इत्यादि । बोधनस्य बुधस्य देवः पुरूरवा इव । त्वं लोककान्तैर्लोकह्यैर्गुणैः पितुरनुरूपः पित्रा तुल्यगुणो भव । अतिशयिनि सर्वोत्कर्षशालिनि ते वंशे कुले आशिषः समाप्ता एव । सर्वश्रेयोधिगमान्निरवकाशाः सत्यः पुनरुक्ततां भजन्ते इत्यर्थः । अत एव गुणैः पितुरनुरूपो भवेत्येवाशास्यसे । अनुरूपभावो रघुवंशे पञ्चमसर्गे यथा—'आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते । पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ ' इति । **तव पितरीति**—उन्नतानां महात्मनां पुरस्तादग्रे स्थितेऽस्मिन् तव पितरि । अनाकम्प्यधैर्ये अनाकम्प्यमक्षोभ्यं धैर्ये चित्तस्थैर्यं यस्य तस्मिन् । स्थितिमति मर्यादापालके त्वयि च । विभक्ता राजलक्ष्मीर्हिमवति हिमाचले जलधौ च व्यस्ततोया विभक्तजला गङ्गेवेदानामधिकतरं राजते शोभते । ' उन्नतानां पुरस्तात्स्थिते ' ' स्थितिमति ' ' अनाकम्प्यधैर्ये ' इत्येतानि विशेषणानि हिमवत्पक्षे जलधिपक्षे च योज्यानि । उभयोर्मालिनीवृत्तम् । **उर्वशी**—साधारणोस्माकं सर्वासामप्सरसामित्यर्थात् ।

---

१ दिट्ठिआ प्पिअसहीपुत्तअस्स जुअराअसिरिं पेक्खिअ भत्तणो अविरहे वाड्ढिदि । इ. पा.

२ रम्भा—(कुमारं—) जेट्ठमादरं—पढमं मादरं । अभिवन्दहि अहिवादेहि । वन्देहि इ.पा.

कुमारः—(प्रतिष्ठते ।)

नारदः—तिष्ठ समये तत्रभवत्याः समीपं गच्छसि ।

आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥ २३ ॥

राजा—एवमनुगृहीतो भगवता[1] कथं न योग्यो भविष्यति ।

नारदः—किं ते भूयः पाकशासनः प्रियं करोतु[2] ।

राजा—यदि मे मघवा प्रसन्नः किमतः परमिच्छामि । तथापीदमस्तु[3]

(भरतवाक्यम् ।)

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरवत्योर्भूतयेस्तु सदा सताम्[4] ॥ २४ ॥

[इति निष्क्रान्ताः सर्वे ।]

॥ इति विक्रमोर्वशीये नाटके पञ्चमोऽङ्कः ॥

॥ समाप्तमिदं विक्रमोर्वशीयं नाटकम् ॥

ज्येष्ठमातरमौशीनरीम् । **नारदः**—समये योग्यकाले । **आयुष इति**—ते तवात्मजस्यायुषो यौवराज्यश्रीर्युवराजलक्ष्मीः । मरुत्वतेन्द्रेण सेनापतेर्भावः **सैनापत्यं** तत्राभिषिक्तं महासेनं कार्तिकेयं स्मारयति स्मृतिगोचरीकरोति । ' इन्द्रो मरुत्वान्मघवा ' इत्यमरः । ' कार्तिकेयो महासेनः ' इति च सः । **राजा**—एवं स्वयमभिषेककलशमावर्जयता । **नारदः**—पाकस्य तन्नामकदैत्यस्य शासनो हन्ता इन्द्रः । ' भूयः प्रियं करोतु' इत्यनेन काव्यसंहारलक्षणमङ्गमुपक्षिप्तम् । तल्लक्षणं तु— ' वरप्रदानसम्प्राप्तिः काव्यसंहार इष्यते ' । **राजा**—भरतवाक्यं नटवाक्यम् । नाटकाभिनयसमाप्तौ नटेन सामाजिकेभ्य आशीर्दीयते । प्रस्तावनानन्तरं नटवाक्याभावादिदं भरतवाक्यमित्युच्यते । **परस्परेति**—परस्परविरोधिन्योः पर-

१ **राजा**—तिष्ठ । समेव तत्रभवत्याः समीपं यास्यामस्तावत् । इ. पा.
२ अनुगृहीतोस्मि भगवता । इ. पा. ३ प्रियमाहरतु । उपहरतु । उपकरोतु । इ. पा.
४ भूयादुद्भूतये सताम् । इ. पा. अस्मादनन्तरम्—

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु । इति पद्यं पुस्तकद्वये

स्परं विरोधो वैरमनयोरस्तीति तयोः निसर्गभिन्नास्पदयोरित्यर्थः । प्रायेण हीश्वरा अनक्षराः पण्डिताश्च दरिद्रा भवन्ति । एतदनुरोधादिदमुक्तम् । श्रीसरस्वत्योः । एकसंश्रयदुर्लभमेकत्रवासदुर्लभं संगतं मिलनम् । सहवसतिरित्यर्थः । सतां सज्जनानां भूतयेऽभिवृद्ध्यर्थं सदास्तु । अत्र सज्जनानां प्रशंसाया गम्यमानत्वात् ' प्रशस्तिः ' नामाङ्गमुक्तम् । तल्लक्षणमादिभरते-'देवद्विजनृपादीनां प्रशस्तिः स्यात्प्रशंसनम् । ' इति ॥

काळेवंशोद्भवेनेयं रामचन्द्रस्य सूनुना ।
मोरेश्वरेणाल्पधिया निर्मितार्थप्रकाशिका ॥
नाम टीका सुबोधार्थं बालानां न्यूनमत्र यत् ।
तद्बुधाः क्षन्तुमर्हन्ति हंसक्षीरनयेन मे ॥
स्वतन्त्राः सर्वतन्त्रेषु लोकमाण्डितपण्डिताः ।
तेभ्योर्पिता तया लक्ष्मीमाधवौ परितुष्यताम् ॥

इति काळेवंशोत्पन्नेन रामचन्द्रसूनुना मोरेश्वरेण विरचितायां श्रीमद्विक्रमोर्वशीयटीकायामर्थप्रकाशिकायां

पञ्चमोऽङ्कः ।

शुभं भूयादध्यापकस्याध्येतुश्च ।

परिशिष्टम् ।

चतुर्थाङ्कगतानि रङ्गनाथपठितानि प्राकृतपद्यादीनि ।

पृ. ९१ पं. १–

(नेपथ्ये सहजन्याचित्रलेखयोः प्रावेशिक्याक्षिप्तिका ।)

पिअसहिविओअविमणा सहिंसहिआ [हंसी] वाउला समुल्लवइ ।
सूरकरफंसविअसिअतामरसे सरवरुच्छङ्गे ॥ १ ॥

(ततः प्रविशति सहजन्या चित्रलेखा च ।)

चित्रलेखा—(प्रवेशानन्तरे द्विपदिकया दिशोऽवलोक्य ।)

---

१ प्रियसखीवियोगविमनाः सखीसहिता व्याकुला समुल्लपति ।
सूर्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥

पिअसहीति—सखीं सखीति वा । उर्वशीविरहदूनचेताः सहजन्योपेता विह्वला कासारोपान्तोपविष्टा चित्रलेखा विलपतीत्यर्थः । सखीं सहजन्यां प्रति सखी चित्रलेखा वदतीत्यर्थ इति वा । रविकरसंपर्कसंजातविकासरक्तसरोजवन्मत्सख्याः कदा नु भर्तृसंदर्शनादिजानितं सुखं संपत्स्यत इति सरोविशेषणध्वनिः । आक्षिप्तिकालक्षणमाह भरतः—चञ्चत्पुटादितालेन मार्गत्रयविभूषिता । आक्षिप्तिका स्वरपदग्रथिता कथिता बुधैः ॥ ' इति । पात्रप्रवेश एवैतस्या निवेशः । गाथा छन्दः । तल्लक्षणं च पिङ्गले—' पढमं बारह मत्ता बीए अट्ठारहेण संमुत्ता । जह पढमं तह तीअं दहपञ्चविहूसिआ गाहा ॥ ' इति । दशपञ्चेन्यर्थाच्चतुर्थचरणे पञ्चदशमात्राविभूषिता भवतीत्यर्थः । विशेषोन्तरं च तत्रैव—' सत्तगणादहिन्ता जो ण लहू छट्ठणे जो विसमो । तह गाहे विइ अद्धे छट्ठं लहुअं विआणेहु ॥ ' इति । गणश्चतुष्कलः । प्राकृतपद्ये न जगणः षष्ठः । छट्ठं लहुअमिति । एको लघुरेव षष्ठो गणः कार्य इत्यर्थः । विषमे जगणाभावः । अन्ते गुरुश्चात्राप्यावश्यक इति । हृदयम् ॥ **द्विपदिकया दिशोऽवलोक्येति** । द्विपदिकाख्यगीतिविशेषेण दिगवलोकनं विधायाग्रिमां गाथां पठतीत्यर्थः । दिशोऽवलोक्य द्विपदिकाख्यगीत्या वदतीत्यर्थो वा । तल्लक्षणं चाह भगवान्भरतमुनिः—' शुद्धा खण्डा च मात्रा च संपूर्णेति चतुर्विधा । द्विपदी करणाख्येन तालेन परिगीयते ॥ पादे न पञ्चभागोऽन्ते जौ स्तः षष्ठद्वितीयकौ । चतुर्भिरीदृशैः पादैः शुद्धा द्विपदिछोच्यते ॥ अर्धान्तेऽन्ये स्वरानाहुः खण्डा स्याच्छुद्धयार्धया । षष्ठेनैकेन गुरुणा मात्राद्विपदिका मता ॥ ज्ञेया शुद्धैव संपूर्णा गुरुणान्तेऽधिकेन तु ॥ ' इति । हंसीयुगलान्योक्त्या स्वपीडाति-

[1]**सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअम् ।**
वाहोवग्गिअणअणअं तम्मइ हंसीजुअलअम् ॥ २ ॥

पृ. ९४ पं. १०— (अनन्तरे जम्भलिका ।)

[2]**सहअरिदुक्खालिद्धअं सरवरअम्मि सिणिद्धअम् ।**
अविरलवाहजलोल्लअं तम्मइ हंसीजुअलअम् ॥ ३ ॥

सहजन्या—[3]सहि अस्थि कोवि समागमोवाओ ।

चित्रलेखा—गोरी[4]चरणरागसंभवं संगममणिं वज्जिअ कुदो से समागमोवाओ ।

पृ. ९५ पं. ४— (अनन्तरे खण्डधारा ।)

[5]**चिन्तादुम्मिअमाणसिआ सहअरिदंसणलालसिआ ।**
विअसिअकमलमणोहरए विहरइ हंसी सरवरए ॥ ४ ॥

पृ. ९५ पं. ७—

(नेपथ्ये पुरूरवसः प्रावेशिक्याक्षिप्तिका ।)

१ सहचरीदुःखालीढं सरोवरं स्निग्धम् ।
बाष्पापवल्गितनयनं ताम्यति हंसीयुगलम् ॥
२ सहचरीदुःखालीढं सरोवरे स्निग्धम् ।
अविरलबाष्पजलार्द्रं ताम्यति हंसीयुगलम ।
३ सखि अस्ति कोऽपि समागमोपायः ।
४ गौरीचरणरागसंभवं संगममणिं वर्जयित्वा कुतोऽस्याः समागमोपायः ।
५ चिन्तादूनमानसा सहचरीदर्शनलालसा ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥

शयं वर्णयति—**सहअरीति** । अपवल्गितमुपप्लुतम् । ताम्यति ग्लानिं भजते ॥ **अनन्तरे जम्भलिकेति** । जम्भलिका गीतिविशेषः । तथा चाह भरतः— उद्ग्राहो द्विःसकृद्वैकखण्डो द्विशकलोऽथवा । यत्र ध्रुवो द्विराभोगो ध्रुवेऽमुक्तिः स जम्भकः ॥ ' इति । एतस्यैव नाम जम्भलिकेति मतङ्गमतम् । ' ध्रुवे मुक्तिरहिता पूर्वोक्तलक्षणलक्षिता सा इति श्रीमद्भट्टसोमचरणाः ' । पुनः ' सहचरि ' इत्येव पठति तृतीयचरणपरिवर्तनेन । अविरलवाहजलोल्लअं अविरलबाष्पजलार्द्रम् । ओल्लअमित्यार्द्रं देशी ॥ **खण्डधारेति** । खण्डधाराख्यो गीतिविशेषः । तल्लक्षणं तु—' यद्गीतं गुणचर्या च रागेण क्रीडनेन च । तालेन सा खण्डधारा याष्टिकेन प्रकाशिता ॥ ' इति ॥ हंस्यन्यापदेशेन पुनः स्वावस्थामाह— **चिन्तेति** । गजान्योक्त्या जायाविरहायासितस्योन्मत्तस्य पुरूरवसो रंगभू-

गहणं गइन्दणाहो पिअविरहुम्माअपअलिअविआरो ।
विसइ तरुकुसुमकिसलअभूसिअणिअदेहपब्भारो ॥ ५ ॥

पृ. ९५ पं. ९—

(लोष्टं गृहीत्वा हन्तुं धावन् । अनन्तरे द्विपदिकया दिशोऽवलोक्य ।)

हिअआहिअपिअदुक्खओ सरवरए धुदपक्खओ ।
वाहोवग्गिअणअणओ तम्मइ हंसजुआणओ ॥ ६ ॥

पृ. ९६ पं. ४—

(इति मूर्छितः पतति । पुनर्द्विपदिकयोत्थाय निःश्वस्य ।)

मइ जाणिअ मिअलोअणि णिसअरु कोइ हरेइ ।
जाव णु णवतडिसामल धाराहरु वरिसेइ ॥ ७ ॥

पृ. ९७. पं. २— (अनन्तरे चर्चरी ।)

जलहर संहर एहु कोपमिआढत्तओ
अविरलधारासारदिसामुहकुन्तओ ।
ए मइं पुहवि भमन्ते जइ पिअ पेक्खिहिसि
तच्छे जं जु कराहास तं तु सहीहिमि ॥ ८ ॥

---

१ गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥

२ हृदयाहितप्रियादुःखः सरोवरे धुतपक्षः ।
व्याधापवल्गितनयनस्ताम्यति हंसयुवा ॥

३ मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति ।
यावच्च नवतडिच्छटाश्यामलो धाराधरो वर्षति ॥

४ जलधर संहराम्र कोपमारब्धः । अविरलधारासारदिशामुखकान्तः ।
ए अहं पृथ्वीं भ्रमन्यदि प्रियां प्रेक्षिष्ये । तदा यद्यत्करिष्यसि तत्तत्सहिष्ये ॥

मावाक्षिप्तिकया प्रवेशं सूचयति—**गहणमिति** । देहप्राग्भारो देहाभोगः । हंसान्यापदेशेन राजा स्वदुःखातिरेकमाह—**हिअअ इति** । व्याधापवल्गितनयनः । पक्षे बाष्पापवल्गितनयनः । धुतपक्षः । कम्पितपक्षः **पक्षेऽसहायः** । ' पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु ' इति त्रिकाण्डी । व्याधत्रासितनेत्रः ॥ **मइ जाणिअ इति**–नुर्निश्चये । यावज्जलधरो वर्षति तावन्मृगलोचनामुर्वशीं कोऽपि राक्षसो हरतीति मया निश्चयेन ज्ञातम् । वर्षणोत्तरं तु जलदनिश्चयाभावेन नीता क्व वा गता मत्प्राणप्रिया किमिदानीं करोमि मन्दभाग्य इति । इति क्वापि सकरुणं विचिन्त्येत्युत्तरचूर्णिकासंगतिः । ' मइ कोइ ' इति च 'मया कोऽपि इत्यर्थे देशी ॥ **अनन्तर इति** –चर्चरीसंज्ञो गीतिविशेषः । तदुक्तम्— ' द्रुतमध्यलयं समाश्रिता पठति प्रेमभरान्नटी यदि । प्रतिमण्ठकरासकेन वा द्रुतमध्या प्रथमा हि चर्चरी ॥ ' ' सोमो वा प्रतिमण्डकः । लघ्वादितालो लोकेऽसौ रास इत्यभिधीयते ॥' इति । मेघं प्रत्याह–**जलहरेति**–ए इति संबोधन

९७ पं. ५–प्रत्यादिशामि (अनन्तरे चर्चरी ।)

गन्धुमाइअमहुअरगीएहिं
वज्जन्तेहिं परहुअतूरेहिं ।
पसरिअपवणुव्वेल्लिअपल्लवणिअरु
सुललिअविविहपआरेहिं णच्चइ कप्पअरु ॥ ९ ॥

इति नर्तित्वा ।

पृ. ९८ पं. २—अन्वेषयामि—

(पाठस्यान्ते भिन्नकः ।).

दहआरहिओ अहिअं दुहिओ विरहाणुगओ परिमन्थरओ !
गिरिकाणणए कुसुमुज्जलए गअजूहवई तह झीणगई ॥ १० ॥

(अनन्तरे द्विपदिकया परिक्रम्यावलोक्य च सहर्षम् ।)

पृ. ९९ पं. ६— (अनन्तरे खण्डकः ।)

संपत्तविसूरणओ तुरिअं परवारणओ ।
पिअतमदंसणलालसओ गअवरु विम्हिअमाणसओ ॥ ११ ॥

१ गन्धोन्मादितमधुकरगीतैर्वाद्यमानैः परभृतैर्यैः ।
प्रसृतपवनोद्वेल्लितपल्लवनिकरः सुललितविविधप्रकारैर्नृत्यति कल्पतरुः ॥
२ दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरः ।
गिरिकानने कुसुमोज्ज्वले गजयूथपतिस्तथा क्षीणगतिः ॥
३ संप्राप्तखेदस्त्वरितं परवारणः ।
प्रियतमदर्शनलालसो गजवरो विस्मितमानसः ॥

एवमर्थे वा । ' संहर एहु कोपम् ' इति पदत्रयम् । एहु एतस्मिन्मल्लक्षणे जने कोपं संहर । मा कुर्वित्यर्थः इति वा । 'मइं तच्छे जं जुं' इत्यादयोऽहं तदा यद्यदित्यर्थे देशीशब्दाः । वसन्तवर्णनेन जलधरसमयप्रत्यादेशमाह–**गन्धुम्माइअ इति** गीतैस्तूर्यैरित्युपलक्षणे तृतीया । प्रसृतेनेतस्ततः संचलता वायुनोद्वेलनशीलश्चञ्चलः पल्लवनिकरः किसलयसमूहो यस्य सः । एतेन पल्लवनिकरस्य करत्वं गम्यते । **पाठस्यान्ते भिन्नक इति** । ' पाठो वाद्याक्षरोत्करः ' इति भरतः । भिन्नको रागविशेषः । तथा चाह भरतः--'षड्जमध्यमिकोत्पन्नो भिन्नको मध्यमो बहुः । षड्जग्रहांशो मन्यासो मदसोऽन्तोऽथवा भवेत् ॥ षड्जादिमूर्च्छनः शुद्धः संचारिणि सकाकलिः । प्रसन्नादियुतो दानवीरे रौद्रेऽद्भुते रसे ॥ दिनस्य पश्चिमे यामे प्रयोज्यः सोमदैवतः ॥' इति ॥ गजान्योक्त्या स्वावस्थामाह—**दहआरहिओ इति** । भ्रमतीत्यध्याहारः । गजयूथपतिरहं स्वीयां प्राणप्रियामपि रक्षितुं न शक्तः । कथं मे यूथपतित्वं धिक् च मामित्यतिदुःखे कारणम् । **अनन्तरे खण्डक इति** । खण्डको गीतिविशेषः । तल्लक्षणं तु—' विरहव्याप्ता या तु पठेद्गीतिं कुशीलवी । प्राकृतेन प्रबन्धेन खण्डकः स उदाहृतः ॥ ' इति । गजान्यापदेशेन स्वावस्थां पुनराह— **संपत्तविसूरणेति** । विचरतीति

(तेना खण्डकान्तरे चर्चरी ।)

बंहिण पै इअ अब्भत्थिअमि आअक्खहि मं ता
एत्थ अरण्णे भमन्ते जइ पइ दिट्ठी सा महु कान्ता ।
णिसम्महि मिअङ्कसरिसे वअणे हंसगई
ए चिण्हे जाणिहिसि आअक्खिउ तुज्झ मई ॥ १२ ॥

(चर्चरिकयोपविश्य । अञ्जलिं बद्ध्वा । ।)

पृ. ९९ पं. ८— (चर्चरिकया विलोक्य ।)

पृ. १०० पं. ७— (अनन्तरे खुरकः ।)

---

१ बर्हिण परमित्यभ्यर्थये आचक्ष्व मम ताम्
अत्रारण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता ।
निशामय मृगाङ्कसदृशेन वदनेन हंसगतिः
अनेन चिह्नेन ज्ञास्यस्याख्यातं तव मया ॥

शेषः । परबलदलनोऽप्यहं स्वप्रियतमामरक्षणेऽपि क्षमो नास्मीति खेदे विस्मये च हेतुगर्भं विशेषणं परवारण इति । विसूरण इति ' खिदेर्विसूरः ' इति विसूरादेशः ॥ **तेना खण्डकान्तरे चर्चरीति** । तेनेति मङ्गलार्थकमक्षरद्वयम् । तेनकलक्षणमाह भगवान्भरतमुनिः—' ॐ तत्सदिति निर्देशात्तत्त्वमस्यादिवाक्यतः । तदिति ब्रह्म तेनायं ब्रह्मणा मङ्गलात्मकः ॥ लक्षितस्तेन तेना' इति । अन्यत्रापि–' तेकारः शंकरः प्रोक्तो नाकारश्च उमा तथा । गीतादौ तेन वक्तव्यं तेना इत्यक्षरद्वयम् ॥ इति । खण्डकचर्चर्योर्लक्षणं प्रागुक्तमेव । बर्हिणं प्रत्याह–**बंहिण पै इति** । बर्हिण पै परम् । त्वामिति वा । ' आअक्खहि म ता अथ वण भमन्ते' इत्यपि क्वचित्पाठः । निशामय शृणु । पाठान्तरे— 'आचक्ष्व मां ताम् । अथ वने भ्रमता ।' मां प्राते तामाचक्ष्वेत्यर्थः । वदनेनेत्युपलक्षणे तृतीया ॥ चर्चरिकयोपविश्येत्यादौ चर्चरिका गतिविशेषः । तालविशेषो वा । बभाण च भरतः–' विरामान्तद्रुतद्वन्द्वं लघून्यष्टौ च चर्चरी ' इति । यथा–'०० । ऽ । । । । । । । । ' 'अञ्जलिं बद्ध्वेति । यदुक्तम्–'पताकाहस्ततलयोः संश्लेषादञ्जलिर्मतः । देवतागुरुविप्राणां नमस्कारेष्वयं क्रमात् ॥ कार्यः शिरोमुखोरःस्थो नृभिः स्त्रीभिर्यथेष्टतः ॥' इति । **अनन्तरे खुरक इति**–खुरको नृत्यविशेषः । तदुक्तम्--पठमञ्जरिरागसंयुतं यद् द्रुतमध्येन लयेन यत्प्रयुक्तम् । प्रतितालयुतं च नर्तनं तत्खुरकाख्यं मुनये शिवेन दत्तम् ॥ ' लघुर्द्रुतद्वयं यत्र प्रतितालः प्रकीर्तितः ' इति । सुरकाख्यो गेयविशेषो वा । आह च भरतः–'पूर्वपूर्वाक्षरत्यागे योऽन्यो वर्णचयः स चेत् । उत्तरोत्तरसंघादौ

विज्जज्झरंकाणणलीणओ
दुक्खविणिग्गहबाहुपीडओ ।
दूरोसारिअहिअआणन्दओ
अम्बरमाणे भमइ गइन्दओ ॥ १३ ॥
(खुरकान्ते चर्चरी)

हेल्ले हेले

परहुअ महुरपलाविणि कन्ति णन्दणवण सच्छन्द भमन्ती ।
जइं पंइ पिअअम सा महु दिट्ठी ता आअक्खहि महु परपुट्ठी ॥१४॥

(एतदेव नर्तित्वा वलन्तिकयोपसृत्य जानुभ्यां स्थित्वा) भवति

पृ, १०० पं. ११— (वामकेन किंचिद्वलित्वा) (आकाशे ।)

पृ. १०१ पं. १०—

सुखमास्तां भवती । साधयामस्तावत् । (उत्थाय द्विपदिकया परिक्रम्यावलोक्य च ।) अये दक्षिणेन वनधारां प्रियाचरणनिक्षपशंसी नूपुरशब्दः यावदेनमनुगच्छामि । (परिक्रम्य ।)

---

१ विद्याधरकाननलीनो दुःखविनिर्गतबाष्पोत्पीडः ।
दूरोत्सारितहृदयानन्दः अम्बरमानेन भ्रमति गजेन्द्रः ॥
२ परभृते मधुरप्रलापिनि कान्ते नन्दनवने स्वच्छन्दं भ्रमन्ती ।
यदि परं प्रियतमा सा मम इष्टा तर्ह्याचक्ष्व मम परपुष्टे ॥

खुरकः परिकीर्तितः ॥' इति । गजान्यापदेशेन पुनः स्वावस्थामाह—**विज्जज्झरंति**—अम्बरमानेनेत्युपलक्षणे तृतीया अतिविशाल इत्यर्थः । परभृतां प्रत्याह—हेल्ले हेले हे रे हे रे । **परहुएति** । आदरे द्विरुक्तिः संबोधने **मधुरप्रलापिनि** । कान्ता मनोनयनानन्ददायिनी । नन्दनवने स्वच्छन्दं भ्रमन्तीत्यादीनि प्रियतमाविशेषणानि वा । 'परभृते परपुष्टे' इत्यर्थपौनरुक्त्यं वक्तुरुन्मत्तत्वान्न दोषावहम् । यद्वा । 'मधुपरपुष्टे' इत्येकं पदम् । मधुना पुष्परसेन परमत्यन्तं पुष्टे इत्यर्थः । मधुपरा चासौ पुष्टेति वा । मधौ वसन्त इति वा ॥ [**वलन्तिकयेति** ।] वलन्तिका रागविशेषः । तथा च संगीतरत्नाकरे—' वलन्तिका तदुपाङ्गं स्याद्विहीना मन्द्रदेवता । सन्यासांशग्रहे.....
शृङ्गारे शार्ङ्गिणोदिता ॥ ' इति । **वामकेनेति** । वामकं पार्श्वस्थितवस्त्ववलोकने संस्थानविशेषः । यदुक्तम्—' धुतेन शिरसा यत्तु पार्श्वेन वलितेन च । तद्वामकं वै करणं पार्श्वस्थस्यावलोकने ॥' इति । **दक्षिणेनेति** । वनधाराया दक्षिणभागे । धारा पङ्क्तिः । दक्षिणेनेत्येनप्प्रत्ययान्तो निपातः । तद्योगे च वनधारामिति द्वितीया । ' धारा पङ्क्तौ द्रवद्रव्यस्रवेऽश्वगतिपञ्चके । '

पिअअमविरहकिलामिअवअणओ
अविरलवाहजलाउलणअणओ ।
दूसहदुक्खविसंठुलगमणओ
पसरिअउरुतावदिविअअङ्गओ ।
अहिअं दुम्मिअमाणसओ दरिअं गओ
